सुगन्धिद्रव्यं ददानि ३ ॥ ४ ॥

५ छत्राश्वदानं गन्धर्वपुरे ॥ सम्पदां भूषणं छत्रं वर्षातपनिवारणम् । यात्रिकप्रीतिदं मार्गे शान्तिं यच्छतु मे गृहे ॥ अद्यतावत् पितुः पञ्चपाक्षिके पञ्चमे एको—गन्धर्वपुरे अतिवृष्ट्याद्यनेकपीडानिवारणार्थं छत्राश्वौ ददानि ३ ॥ ५ ॥

६ गोधूमपिष्टदानं शैलमुञ्चकपुरे ॥ गोधूमजनितं पिष्टं शिलायंत्रविनिःसृतम् । द्विजश्रेष्ठ गृहाण त्वमतः शान्तिं प्रयच्छ मे ॥ अद्यतावत् पितुः तृतीयमासिके षष्ठे एको—शैलमुञ्चकपुरे क्षुत्पिपासादिपीडानिवारणार्थमिमं गोधूमादिपिष्टं ददानि ३ ॥ ६ ॥

७ गजलवणदानं क्रूरपुरे ॥ अन्नाद्याः साधुतां यान्ति लवणेन रसाश्च ये । नित्यं लवणदानेन मम सन्तु मनोरथाः ॥ अद्यतावत् पितुः चतुर्थमासिके सप्तमे

CC-0 Pulwama Collection. Digitized by eGangotri

एको—क्रूरपुरे गजं सलवणं ददानि ३ ॥ ७ ॥

८ गोदानं चित्रनगरे ॥ गवामङ्गेषु तिष्ठन्ति भुवनानि चतुर्दश । यस्मात्तस्माच्छुभं मे स्यादिहलोके परत्र च ॥ अद्यतावत् पितुः पञ्चममासिके अष्टमे एकोद्दिष्टे श्राद्धे चित्रनगरे गां ददानि ३ ॥ ८ ॥

९ नौकाछत्रदानं नदीतटे ॥ संसाराब्धेः परं पारमनायासेन तारिणीम् । नानाविधाऽरित्रयुक्तामिमां नौकां ददाम्यहम् ॥ सम्पदां भूषणं छत्रं वर्षातपनिवारणम् । यात्रिकप्रीतिदं मार्गे शान्तिं यच्छतु मे गृहे ॥ अद्यतावत् पितुः ऊनषाण्मासिके नवमे एको—नदीतटे वैतरणीनदीसुखसन्तारणार्थमिमां नौकां छत्रसंयुतां ददानि ३ ॥ ९ ॥

१० सप्तान्नदानं बह्वापदपुरे ॥ धान्यं यवा माषमुद्गमकायमाषकाःकराः । [illegible] सप्तस-

CC-0 Pulwama Collection. Digitized by eGangotri

तोऽस्तु शिवाय मे ॥ हिरण्यगर्भः समवर्तताग्रे भूतस्य
जातः पतिरेक आसीत् । स दाधार पृथिवीं द्यामुतेमां
कस्मै देवाय हविषा विधेम ॥ अद्यतावत् पितुः एका-
दशमासिके पञ्चदशे एको० तस्यपरलोके पर्जन्यपुरे
सुखसंप्राप्त्यर्थं सुवर्णयुतं छत्रं ददानि ॥

१५ चामरदानं षोडशे । घर्मदेशे घोररूपे मक्षिकादि-
विदूषिते । तेषां निवारणार्थाय तालवृन्तं दधाम्यहम् ॥
अद्यतावत् पितुः ऊनसांवत्सरिके वा द्वादशमासिके
षोडशे शीताभिधानपुरे इमं चामरं ददानि ॥ ३॥

१७ अनाथानां दधियुतान्नदानं वा अश्वदानं प्रेतवा-
हपुरे ॥ कान्तारमार्गदुःखौघवारणं कारणं मतम् ।
सम्पदां त्वां स्वभक्त्याहं दास्येऽन्नं दधिसंयुतम् ॥
अद्यतावत् पितुः ऊनसांवत्सरिके सप्तदशे अनाथस्वा-
स्थ्यकरं दध्यादियुतमन्नं (अश्वं) वा ददानि ॥ इति
दानप्रतिष्ठा ॥

CC-0 Pulwama Collection. Digitized by eGangotri

पता

पं०केशवभट्ट पाठशालाटीचर रैणावारीभाग काश्मीर श्रीनगर

१ नित्यकर्मविधिः नं१ ≡
२ नित्यकर्मविधिः नं२ ।=)
३ नित्यकर्मविधिः नं३ ।=)॥
४ शिवपूजा ।=)
५ गणेशदुर्गास्तोत्रावली ।-)
६ सौन्दर्यलहरी पञ्चस्तवी ।)॥
७ देवीपूजा ।-)
८ चमानुवाक्यम् =)॥
९ रुद्रपञ्चकम् ।)
१० कर्मकाण्डी नं१ ॥।=)
११ कर्मकाण्डी नं२ १)
१२ कर्मकाण्डी नं३ ३)
१३ वेदकल्पद्रुम नं१ १।)
सजिल्द नं२ १।=
१४ मेखलापुस्तक १॥)
१५ वटुकपूजा ।≡
१६ पार्थिवेश्वरपूजा ।=
१७ उपदेशपञ्चक ≡
१८ योगवासिष्ठसार ≡
१९ भक्तिविवेकसार ॥-
२० भवानीसहस्रनामावली च ।-
२१ विष्णुसहस्रनामावली च ।-
२२ गणेशराज्ञीज्वालाशारिकासहस्रनामावली ॥-
२३ आदित्यहृदयम् ।-
२४ कलशस्थापनोद्धार -
२५ स्तोत्रमणिमाला नं१ ४
२६ स्तोत्रमणिमाला नं२ ५

CC-0 Pulwama Collection. Digitized by eGangotri

-0 Pulwama Collection. Digitized by eGang

शः दिक्पतीन् तीर्थानि नदीः सप्तलोकान् विश्वान्देवान् श्रियं सरस्वतीं दिवाचरान् नक्तंचरान् सप्तर्षीन् बालखिल्यानृषीन् शेषर्षींस्तर्पयामि अपसव्येन उशन्तस्त्वा० पितॄन् तर्पयामि पितामहान् प्रपितामहान् मातृः पितामहीः प्रपितामहीः मातामहान् प्रमातामहान् वृद्धप्रमातामहान् मातामहीः प्रमातामहीः वृद्धप्रमातामहीः समस्तमातापितरः मातृपत्न्यातु, शय्योदकेन ते सर्वे—हिमपानादि । सव्येन वसन्ताय नमः । नमो देवेभ्यः ॥ ततः शय्यायामुपविष्टस्य ब्राह्मणस्य पादाभ्यङ्गादि सेवां पुरुषसूक्तलक्ष्मीसूक्ताभ्यां कुर्यात् । नागेन्द्रभोगशयनासन देवदेव लक्ष्मीनिवास पुरुषोत्तम वाजिवक्त्र । नानाविचित्रमणिरत्नविभूषिताङ्ग दुःस्वप्ननाश भगवञ्जय वासुदेव ॥ ततो ब्राह्मणशय्ययोः पृच्छां सम्पाद्य । ॐ भूः पुरुषं-
CC-0 Pulwama Collection. Digitized by eGangotri

विसर्जयामि नमः ३ अद्यतावत् भगवतः शेषशायिनः नारायणस्य पृथ्वीरूपायाः शय्यायाः अत्मनो पितुस्तस्यपरलोके अनन्तैश्वर्यभोगसिद्ध्यर्थं शय्यादाननिमित्तं ब्राह्मणपूजनं शय्यापूजनमच्छिद्रं सम्पूर्णमस्तु । यवोदकं नमः । प्रतिमाशय्ययोः क्षमापुष्पाणि ॥ आपन्नोस्मि शरण्योसि । ध्येयःसदा सवितृमण्डल इत्यादि विष्णोः क्षमापुष्पाणि ॥ ततः प्रतिगृहीता पठेत् । प्रतिग्रह्णामि शय्ये त्वां कुटुम्बार्थे विशेषतः । सर्वदेवमयीं देवीं लक्ष्मीरूपां नमाम्यहम् ॥ आयुर्बलं यशोवर्चः प्रजापशुवसूनि च । ब्रह्मप्रज्ञां च मेधां च त्वं नोदेहि जगन्मयि ॥ उदकलशं ॥ मन्त्रार्थः । पूर्णां दत्त्वा वैश्वदेवादि नित्यकर्म कृत्वा ब्रह्मकलशपृच्छां सम्पाद्य क्षमापुष्पाणि । नमो ब्रह्मणे । उदकलशं । मन्त्रार्थः ॥ इति शय्यादानम् ॥

CC-0 Pulwama Collection. Digitized by eGangotri

अथ दानप्रतिष्ठा ।

१ घटदानं याम्यपुरे । कलशं शुभदं दिव्यं जलेन परिपूरितम् । दानेनास्य सदा सौख्यं शान्तिरस्तु गृहे मम ॥ जलं ब्रह्ममयं साक्षाज्जीवितं सर्वदेहिनाम् । जलदानं तु तस्माद्धि वाञ्छितार्थप्रदायकम् ॥ वारिणा पूरितं कुम्भं तापत्रयहरं शुभम् । पितॄणां तुष्टिदं सौख्यं गृहाण त्वं सुखाय नः ॥ घोरायां याम्ययात्रायां क्षुत्पिपासाश्रमभयाः । तेषां निवारणार्थाय सान्नं कुम्भं ददाम्यहम् ॥ अन्नं ब्रह्मरसं साक्षाल्लोकानां प्राणधारकम् । अन्नदानेन वै कामान् भुक्त्वा सायुज्यमाप्नुयात् ॥ अन्नाद्याः साधुतां यान्ति लवणेन रसाश्च ये । नित्यं लवणदानेन मम सन्तु मनोरथाः ॥ सौभाग्यदं निष्कदानं नृभिःकार्यं प्रयततः । सर्वकामप्रदं पर्वकालेषु च विशे-

CC-0 Pulwama Collection. Digitized by eGangotri

षतः ॥ अद्यतावत् पितुः आद्यमौर्ध्वदैहिके प्रथमे एको-याम्यपुरे अत्यन्तविश्रान्तिप्राप्त्यर्थमिदं जलकुम्भं लवणवस्त्रतुण्डलादियुतं ददानि ३ प्रतिगृह्णामि ३ ॥ १ ॥

२ अन्नदानं सौरिपुरे । अन्नं ब्रह्मरसं साक्षाल्लोकानां प्राणधारकम् । अन्नदानेन वै कामान् भुक्त्वा सायुज्यमाप्नुयात् ॥ अन्नाद्याः साधुतां यान्ति लवणेन रसाश्च ये । नित्यं लवणदानेन मम सन्तु मनोरथाः ॥ सौभाग्यदं निष्कदानं नृभिः कार्यं प्रयत्नतः । सर्वकामप्रदं पर्वकालेषु च विशेषतः ॥ अन्नपते अन्नस्य नो देहि अनमीवस्य शुष्मिणः । प्रप्रदातारं तारिषमूर्जं नो देहि द्विपदे शं चतुष्पदे ॥ अद्यतावत् पितुः प्रथममासिके द्वितीये एको-सौरिपुरे क्षुत्पिपासादिदुःखनिवारणार्थमिद-

CC-0 Pulwama Collection. Digitized by eGangotri

मन्नं ददानि ३ ॥ २ ॥

३ वस्त्रदानं नगेन्द्रभवने ॥ शीतोष्णवातादिभयहारकं कान्तिभाग्यदम्। लज्जादिशमनं वस्त्रं स्वस्तिदं मेऽस्त्वतः सदा ॥ युवा सुवासाः परिवीत आगास उच्छ्रेयान्भवति जायमानः। तन्धीरासः कवय उन्नयन्ति साध्यो मनसा देवयन्तः ॥ अद्यतावत् पितुः त्रिपाक्षिके तृतीये नगेन्द्रभवने शीतादिपीडानिवारणार्थं शय्यावस्त्रादि दधानि ३ ॥ ३ ॥

४ सुगन्धद्रव्यदानं सौम्यपुरे ॥ गन्धो मनोहरो भाव्यः शान्तिदः सुखदः सदा। तत्प्रदानेन चैवाद्य शान्तिरस्तु सदा मम ॥ कर्पूरादि शुभं विप्र गृहाणेमं सुपूजितम्। पुण्यगन्धप्रिया सा मे कमला प्रीयतां मम ॥ अद्यतावत् पितुः द्वितीयमासिके चतुर्थे सौम्यपुरे विविधयाम्यपीडानिवारणार्थमिदं

CC-0 Pulwama Collection. Digitized by eGangotri

अन्तरिक्षाय दिवे सूर्याय प्रजापतये वायवे तारकेभ्यो सप्ताऽकाशेभ्यो द्वादशादित्येभ्यो चतुर्दशप्रजापतिभ्यो दशवसुभ्यो सप्तविंशतिनक्षत्रेभ्यो आदित्याय रवये गभस्तये भानवे सवित्रे दिवाकराय धर्माय तपनाय भास्कराय सूर्याय त्वष्ट्रे स्वर्पतये विवस्वते अर्काय सहस्ररश्मये पूष्णे मित्राय मधुच्छन्दसे गार्ग्याय उपमन्यवे कश्यपाय मनवे अत्रये विष्णवे हारीताय याज्ञवल्क्याय नारदाय अङ्गिरसे यमाय आपस्तम्भाय संवर्ताय कात्यायै बृहस्पतये पराशराय व्यासाय शंखलिखिताभ्यां दक्षाय गौतमाय शातातपाय प्राणाय अपानाय समानाय उदानाय व्यानाय नागाय कूर्माय कृकराय देवदत्ताय धनञ्जयाय त्रिशूलिने ब्रह्मणे विष्णवे रुद्राय शय्यायै अर्घोनमः पुष्पंनमः । धूपोनमः । वासोनमः । ए-

CC-0 Pulwama Collection. Digitized by eGangotri

तासां दे० । अन्नंनमः अपोशानंनमः । सैव दक्षि-
णा । दिक्पालयुतवेदचतुष्टयीं विसर्ज्य । ॐगायत्र्यै
नमः अद्यतावत् इन्द्रस्यवज्रहस्तस्य० । विष्णोः सा-
नुचरस्य पृथिव्याः अग्नेः० आत्मनो पितुः स्वर्गैश्वर्य-
प्राप्त्यर्थं शय्यादाननिमित्तं दिक्पालयुतचतुर्वेदेश्वरपू-
जनमच्छिद्रं । यवोदकं । आपन्नोऽस्मि । ऐरावणस-
मारूढं स्वर्णवर्णकिरीटिनम् । सहस्रनयनं शक्रं व-
ज्रहस्तं विभावयेत् १ सप्तार्चिषं तु बिभ्राणमक्ष-
मालाकमण्डलुम् । ज्वालामालाकुलं रक्तं शक्तिहस्तं
विभावयेत् २ कृतान्तं महिषारूढं दण्डहस्तं भया-
नकम् । कालपाशधरं कालं ध्याये दक्षिणादिक्-
पतिम् ३ रक्तनेत्रं शवारूढं ध्याये नीलोत्पलप्रभ-
म् । कृपाणपाणिमस्रौघं पिवन्तं राक्षसेश्वरम् ४ ना-
गपाशधरं हृष्टं रत्नौघद्युतिविग्रहम् । शशाङ्कधवलं

CC-0 Pulwama Collection. Digitized by eGangotri

ध्याये वरुणं मकरासनम् ५ आपीतहरिणच्छायं विलोलध्वजधारिणम् । प्राणभूतं स्मरेन्नृणां हरिणस्थं समीरणम् ६ कुवीरमीश्वरभक्तं सर्वगं सर्वविग्रहम् । स्वर्णच्छायं गदाहस्तमुत्तराधिपतिंस्मरेत् ॥ ७ ॥ ईशानं वृषभारूढं त्रिशूलव्यालधारिणम् । शरच्चन्द्रावतंसं च चन्द्रमौलिं त्रिलोचनम् ८ पीनं पीतं चतुर्बाहुं ब्रह्माणं चतुराननम् । हंसयानं च बिभ्राणं दण्डाक्षस्रक्कमण्डलुम् ९ अनन्तं पुण्डरीकाक्षं कूर्मारूढं विचिन्तयेत् । शङ्खचक्रगदापद्मवनमालायुतं स्मरे ॥ १० ॥ आह्वानं । नमोब्रह्मणे ॥ ततः । एह्येहि सर्वामरेत्यावाहनश्लोकमन्त्रैः शय्यायाः पूर्वादिदिक्षु दिक्पालकलशान् पादेषु वेदेश्वराश्च । अग्निमीळे इत्यादिमन्त्रैः प्रक्षिपेत् ॥ शय्यायाः पूर्वदिशि घृतकुम्भसप्तसस्यादि सर्वसम्भारान् संस्थाप्य कर्पासाच्छादि-

CC-0 Pulwama Collection. Digitized by eGangotri

तद्दक्षिणखुरेणोपरिस्पर्शेन प्रतिपादयेत् । सावित्राणि अद्यतावत् पितुः अक्षयैश्वर्यप्राप्त्यर्थं विष्णुरूपाय ब्राह्मणाय इमां शय्यां भूमिरूपां घृतकलशयुतां सप्तसस्यमणिमुक्तपञ्चरत्नकुङ्कुमचन्दनादियुतां सर्वदेवतास्थानभूतां सहिरण्यां सवाससं ददानि ३ दत्त्वा विज्ञापयेद्देवं विष्णुं वै विश्वरूपिणम् । लक्ष्मीयुतं महौजस्कं शेषशायिनमीश्वरम् ॥ वासुदेवो जगन्नाथस्तथा सङ्कर्षणो विभुः । प्रद्युम्नश्चानिरुद्धश्च भवन्तु विजयाय मे ॥ यस्मादशून्यंशयनं केशवस्य शिवस्य च । शय्या ममाप्यशून्यास्तु तस्माज्जन्मनि जन्मनि ॥ शेषभूतं तु पर्यङ्कमुपस्करणसंयुतम् । श्रीविष्णवे ब्राह्मणाय दत्तमस्तु सुखप्रदम् ॥ लक्ष्मीरूपामिमां शय्यामुपस्करणसंयुताम् । धर्मसंवर्धनायैवमङ्गीकुरु जनार्दन ॥ शय्यां ददानि ३ ॥ क इदं

CC-0 Pulwama Collection. Digitized by eGangotri

कस्मा अदात् ॥ प्रतिग्रह्णामि ३ ततो विप्रहस्ते तर्पणम् । ब्रह्माणं तर्पयामि विष्णुं महेश्वरं वह्निं सूर्यं सोमं वरुणं वायुं यमं कुवेरं इन्द्रं पृथिवीं अपः तेजसं आकाशं अग्निं आदित्यं वरुणं चन्द्रमसं कुमारं अङ्गारकं विष्णुं बुधं इन्द्रं बृहस्पतिं सरस्वतीं शुक्रं प्रजापतिं शनैश्वरं विनायकं राहुं रुद्रं केतुं ब्रह्माणं ध्रुवं केशवं अनन्तं अगस्त्यं कालं विश्वकर्माणं प्रजापतिं वसून् रुद्रान् आदित्यान् मरुतः साध्यान् ॥ कण्ठोपवीती । ऋषीन् तर्पयामि देवर्षीन् ब्रह्मर्षीन् राजर्षीन् सिद्धर्षीन् विद्याधरर्षीन् गन्धर्वान् नागान् वैनतेयान् अप्सरसः समुद्रान् पर्वतान् नक्षत्राणि नक्षत्रदेवताः देवमातॄः देवपत्नीः देवपुत्रान् वेदान् वेदाङ्गानि यज्ञान् यज्ञाङ्गानि धर्मं अर्थं कामं शास्त्रप्रणीतॄन् सत्यान् दिशः विदि-

CC-0 Pulwama Collection. Digitized by eGangotri

पश्चिमेदेशे छन्दांसि सर्वसिद्धये ॥ अग्न आयाहि० । उत्तरे । दिशश्चन्द्रमसं देवमथर्वणायुतं शुभम् । आवाहयामि ब्रह्माणं छन्दांसि चोत्तरादिशि ॥ शन्नोदेवी । भगवन्पु० । एवं पाद्यादि दक्षिणान्तं ॥ अथाग्निकर्म० । पूर्णां दत्त्वा शय्यापूजा ॥ नमस्कारः । प्रसीद मम हे विद्वन् भगवंस्त्वा नुता वयम् । अनुग्रहार्थमस्माकं शय्येयं प्रतिगृह्यताम् । प्राङ्मुखः प्रतिगृहीता । तद्वामेशय्यामभ्युक्षेत् । आपोहिष्ठाः ३ हिरण्यवर्णाः शु० ४ न वहन्तीभिः स्नायाद्यद्वहन्तीभिः स्नायात्क्षेत्रं यश ऋच्छेन्न कूप्याभिः स्नायाद्विषं यश ऋच्छेत् स्थावराभिः स्नायादेता वामपां दीक्षिताः पशुमतीर्याः स्थावरा लोमशाः सन्ततः लोमशाः पशवो यजमानमेव यशमर्पयन्ति ॥ वनस्पते विदाङ्गोहि भूयादस्मत्सखा प्रत-

CC-0 Pulwama Collection. Digitized by eGangotri

रणाः स्ववीरः । गोभिः सन्नद्धो अस्य वीरयस्व स्वस्थोजयतु जितानि ॥ अत्रादौ शय्यायामुपरि विष्णुप्रतिमां यथाचितं सर्वसम्भारं च संस्थाप्य ॥(शय्यापद्चतुष्टये रत्नदीपचतुष्टयं स्थाप्यं दत्ते अन्नादीनि वामे सस्यादीनि पूर्वे आज्यपात्रं अधो भाण्डादीनि स्थापयेत् कुशब्राह्मणं च संस्थाप्य)। ॐभूः पुरुषमावाहयमीति सर्वा त्रिष्णुगायत्रीः शय्यासनायै वि, चतुष्पदायै धी, तन्नः शय्या प्र ३ ॥ धर्मरूपायै वि, चतुरङ्गायै धी, तन्नः शय्या प्र ३ ॥ महालक्ष्म्यै वि, पृथ्वीरूपायै धी, तन्नः शय्या प्र ३ ॥ अद्यतावत् भगवतः शेषशायिनः लक्ष्मीयुतस्य नारायणस्य वासुदेवस्य धर्मस्य विष्णो पृथ्वीरूपायाः शय्यायाः आत्मनो० पितुस्तस्यानन्तैश्वर्यभोगासिद्ध्यर्थं शय्यादाननिमित्तं ब्राह्मणपूजनं शय्यापूजन-

CC-0 Pulwama Collection. Digitized by eGangotri

मर्चामहं करिष्ये । एवं शेषशायिनः । पृथ्वीरूपायाः शय्यायाः इदमासनंनमः। शेषशायिने लक्ष्मीयुतायनारायणाय पृथ्वीरूपायै शय्यायै त्वां पूजयामि । भगवन्तंशेषशायिनं लक्ष्मीयुतं नारायणं पृथ्वीरूपां शय्यामावाहयिष्यामि ॥ किं भूयसा तरुणनीरदनीलमूर्तिः पीताम्बरः कमलपत्रविशालनेत्रः। कौमोदकीकमलकम्बुरथाङ्गलक्ष्मा लक्ष्मीपतिः पथिपथि प्रभुराविरास्ताम् ॥ शन्नोदेवी । शेषशायिने० पृथ्वीरूपायै शय्यायै पाद्यंनमः । भगवन् शेषशायिन् नारायण पृथ्वीरूपे शय्ये इदं वोर्घ्यंनमः । शेषशायिने नारायणाय पृथ्वीरूपायै शय्यायै समालभनं गन्धोनमः । पुरुषसूक्तलक्ष्मीसूक्ताभ्यां, पुष्पार्घौ पूर्वंनारायणायनम इत्यादि । खरेषु । ऋग्वेदायनमः यजुर्वेदायनमः सामवेदायनमः अथर्व-

CC-0 Pulwama Collection. Digitized by eGangotri

णवेदायनमः वासुदेवाय जगन्नाथाय सङ्कर्षणाय प्रद्युम्नाय अनिरुद्धाय आखण्डलाय अग्नये । प्रच्छादनवस्त्रे । कान्त्यै लक्ष्म्यै मेधायै धरायै धृत्यै तुष्ट्यै पुष्ट्यै श्रद्धायै क्रियायै मत्यै बुद्ध्यै लज्जायै वपुषे शान्त्यै मातृभ्यः पूर्वे मेरवे दक्षिणे मन्दाराय पश्चिमे कैलासाय उत्तरे मलयाय आग्नेये गन्धमादनाय नैर्ऋते श्रीगिरये वायवे हेमकूटाय ईशाने सह्याय 'मध्ये' ऐरावणाय पुण्डरीकाक्षाय वामनाय । अथध्वजपूजा । कुमुदाय अञ्जनाय पुष्पदन्ताय सार्वभौमाय सुप्रतीकाय वर्धमानाय सुवृद्ध्यै अतिवृद्ध्यै पृथुश्रवाय कूर्माय अनन्ताय वासुकये कार्कोटाय तक्षकाय पद्माय महापद्माय कुलिकाय शङ्खपालाय । मध्ये । अचलादेव्यै । शिरउपधाने । शिरस्त्राणरूपाय ध्रुवाय अनन्ताय शेषाय 'ऊर्ध्वे' उदयाचला-

CC-0 Pulwama Collection. Digitized by eGangotri

य 'अधः' अस्ताचलाय 'मध्ये' पृथिव्यैनमः । ततः शय्याया वास्तुरूपत्वात् । ईशानाय पर्जन्याय जयन्ताय इन्द्राय सूर्याय सत्याय भृशाय आकाशाय अग्नये पूष्णे वितथाय गृहक्षताय यमाय गन्धर्वाय भृङ्गिराजाय मृगाय पितृगणाय दौवारिकाय सुग्रीवाय पुष्पदन्ताय वरुणाय असुराय शेषाय रोगाय वायवे वासुकये मुख्याय बलाटाय सोमाय सूर्याय अदितये दितये अर्यम्णे सवित्रे सावित्राय विवस्वते इन्द्राय जयाय मित्राय रुद्राय राजयक्ष्मणे पृथ्वीधराय आपाय आपवत्साय ब्रह्मणे ॐभूर्लोकाय भुवोलोकाय स्वर्लोकाय महोलोकाय जनोलोकाय तपोलोकाय सत्यलोकाय अतलाय वितलाय सुतलाय रसातलाय तलातलाय महातला पातालायनमः । अथ छत्रपूजा । आकाशाय

CC-0 Pulwama Collection. Digitized by eGangotri

स्वस्थोजयतु जित्वानि । ब्रह्मजज्ञानं- । वषट्ते वि-ष्णा- । प्रतद्विष्णुः ॥ अयङ्गौः पृश्निरक्रमीदसदन्मातरं पुनः । पितरं च प्रयत्सुः ॥ रथे अक्षेषु । या हस्तिनि । सिंहे व्याघ्रे- । या राजन्ये- । वनस्पतेः पृथिवी सजुषा उभारोदसी परिपासितुनः । अनुड्वदुर्वीरोद-सी जिहीथा सनोधृतो वरुण इन्द्रसखा ॥ वासु-देवाय० ८ शेषशायिने नारायणाय ततो दिक्पाल-कलशेषु ॥ इन्द्रः पर्वता बृहता- । इन्द्रायनमः । अग्निं सप्तिं,-अग्नयेनमः । यमो दाधार,-यमायनमः ॥ यन्ते देवी,-नैर्ऋतयेनमः । उदुत्तमं,-वरुणायनमः । वायवायाहि,-वायवेनमः । सोमोधेनुं,-कुवेरायनमः । ईशानन्त्वा,-ईशानायनमः । ब्रह्म जज्ञानं,-ब्रह्मणेनमः अयङ्गौः पृश्निरक्रमीदसदन्मातरं पुनः । पितरं च प्रयत्सुः । अनन्तायनमः ॥ वेदचतुष्टये । वषट्ते वि-

CC-0 Pulwama Collection. Digitized by eGangotri

ष्णा- । अग्निमीळे- । इषेत्वोर्जेत्वा- । अग्न आयाहि- । शन्नोदेवी- । विष्णुपञ्चायतनदेवताभ्योनमः ऐन्द्राग्नं ॥ यजमानमानीय । अनाभौ । पुरुषसूक्तन्यासः तीर्थेस्नेयं । यत्रास्तिमाता । महागणपतये । वासुदेवाय ८ शेषशायिने नारायणाय । इन्द्रय वज्रहस्ताय १० । त्रिष्णवेसानुचराय पृथिव्यै अग्नये ऋग्वेदाय ब्रह्मणे छन्दोभ्यः ४ हेरुकादिभ्यो शय्यादाननिमितं दीपोनमः धूपोनमः । अपसव्येन । समस्तमातापितृभ्यो दीपः स्वधा । सव्येन । अश्विनोः० । अनाभौ ॐभूः पुरुषमावाहयामि नमः ३ सर्वा विष्णुगायत्रीः । अद्यतावत्० महागणपतेः वासुदेवस्य शेषशायिनः नारायणस्य । इन्द्रस्यवज्रहस्तस्य १० विष्णोः सानुचरस्य पृथिव्याः० हेरुकादीनां आत्मनो पितृणां स्वर्गप्राप्त्यर्थं कलशपू० वि-

CC-0 Pulwama Collection. Digitized by eGangotri

ष्णुपू० दिक्पालपू० चतुर्वेदेश्वरपूजनमर्चामहं करिष्ये ॐकुरुष्व ॥ एवमेवासनं । महागणपतये त्वां पूजयामि । सहस्रशीर्षा । युञ्जते मान० महागणपतिं वासुदेवं शेषशायिनं नारायणं । इन्द्रं वज्रहस्तं । विष्णुं सानुचरं पृथिवीं हेरुकादीन् आवाहयिष्यामि ॥ आवाहयाम्यमर० । दिक्पालेषु ॥ पूर्वे । एह्येहि सर्वामरसिद्धसाध्यैरभिष्टुतो वज्रधरामरेश । संवीज्यमानोऽप्सरसां गणेन रक्षाध्वरं नो भगवन्नमस्ते । इन्द्रापर्वता ॥ आग्नेये । एह्येहि वैश्वानर हव्यवाह मुनिप्रवीरैरभितोभिजुष्टः । तेजोवतीलोकगणेन सार्धं ममाध्वरं रक्ष विभो नमस्ते ॥ अग्निं सप्तिं० ॥ दक्षिणे ॥ एह्येहि वैवस्वत लोकनाथ सुरासुरैरर्चित दिव्यमूर्ते । शुभाऽशुभाचारविचारसाक्षिन् शिवाय नः पाहि मखं नमस्ते ॥ यमो दा-

CC-0 Pulwama Collection. Digitized by eGangotri

धार० ॥ नैर्ऋते ॥ एह्येहि रक्षोगणनायकस्त्वं विशालवेतालपिशाचसंघैः । ममाध्वरं पाहि शुभाधिनाथ लोकेश्वरस्त्वं भगवन्नमस्ते ॥ यन्ते देवे० ॥ पश्चिमे । एह्येहि यादोगणवारिधीनां गणेशपर्जन्ययुतः प्रचेताः । विद्याधरेन्द्रामरगीयमानः पाहि त्वमस्मान्भगवन्नमस्ते ॥ उदुत्तमं ॥ वायवे । एह्येहि यज्ञे मम रक्षणाय मृगाधिरूढः सह सिद्धसंघैः । समीरण प्राणवतीसहायो गृहाण पूजां भगवन्नमस्ते ॥ वायवायाहि ॥ उत्तरे । एह्येहि यक्षेश्वर यज्ञरक्षां कुरुष्व यक्षादिगणेन साकम् । सर्वैर्निधीशैः सह भूतसंघैर्गृहाण पूजां भगवन्नमस्ते ॥ सोमोधेनुं । इशाने । एह्येहि विश्वेश्वर नस्त्रिशूलकपालखट्वाङ्गधरैश्च साकम् । भूतेश लोकेश्वर यज्ञसिद्ध्यै गृहाण पूजां भगवन्नमस्ते । ईशानन्त्वा० ॥ ऊर्ध्वे ।

CC-0 Pulwama Collection. Digitized by eGangotri

एह्येहि विश्वाधिपते मुनीन्द्रलोकेन सार्धं पितृदेवताभिः । चतुर्मुख त्वं भव नः शिवाय पितामहायाद्य विभो नमस्ते । ब्रह्म जज्ञानं० । अधः । एह्येहि पातालधराधरेन्द्रनागाङ्गनाकिन्नरगीयमानः । रक्षोगणेन्द्रामरलोकयुक्तोऽप्यनन्त रक्षाध्वरमस्मदीयम् । आयङ्गौः पृश्निरक्रमीदसदन्मातरं पुनः । पितरं च प्रयत्सुः । वषट्ते विष्ण० । मध्ये । आवाहयाम्यहं देवं विष्णुं सानुचरं विभुम् । चतुर्वेदेश्वरं श्रेष्ठं मध्ये तिष्ठन्तमव्ययम् । प्रतद्विष्णुः० । पूर्वे । आवाहयामि पृथिवीमग्निना संयुतां शुभाम् । ब्रह्माणं पूर्वतो देशे छन्दांसि सर्वसिद्धये । अग्निमीळे ॥ दक्षिणे आवाहयाम्यन्तरिक्षं यजुर्वेदं च मारुतम् । ब्रह्माणं दक्षिणेदेशे छन्दांसि सर्वसिद्धये । इषे त्वोर्जे । पश्चिमे । दिवमावाहयिष्यामि सूर्यसोमसमन्विताम् । ब्रह्माणं

CC-0 Pulwama Collection. Digitized by eGangotri

दक्षिणतस्त्यक्त्वा प्राणायामं कृत्वाऽग्निहस्ताभ्यां गृहीत्वा यो अश्वत्थः शमीगर्भः-अजयो लोकान्प्रदिशश्वतस्र "इत्यन्तं चन्द्रसूक्तं पठन्नवसान्यां क्षिपेत्" ॥ उर्वश्यसि आयुरसि पुरूरवा असि यत एव प्रथमं जज्ञे। अग्निरेभ्यो योनिभ्यो जनितो जातवेदाः स गायत्र्या त्रैष्टुभा जगत्याऽनुष्टुभा देवेभ्यो हव्यं वहतु प्रजानन् । सहाऽग्नेरग्निना जायस्व सह रय्या सह पुष्ट्या सह प्रजया सह ब्रह्मवर्चसेन अजनि । अग्निर्होता पूर्वःपूर्वेभ्यः पवमानः पावकः शुचिरीड्यः असुरासि प्रथमजा । असुर्नामासुरध्यसे असुरहमसुस्त्वं किमद्यासुरसुङ्करदसोरसुं प्रतीतनमज्ञन्वीध्वम् । भूर्भुवः स्वराङ्गिरसां त्वां देवानां व्रतेनादधे । आदित्यानां त्वां देवानां व्रतेनादधे । द्यौर्महा भूमिर्भूम्ना तस्यास्ते देव्यदिते उपस्थेनादमन्नाद्यानुप-

CC-0 Pulwama Collection. Digitized by eGangotri

त्यायादधे । अयं गौः पृश्निरक्रमीदस्मन्मातरं पुरः पितरं च प्रयत्सुः । अग्ने गृहमतेऽहिर्बुध्न्य परिषद्य दिवः पृथिव्याः पर्यन्तरिक्षाद्विन्द । यजमानाय पृथिव्या मूर्द्धन्सीद यज्ञिये लोको यो नो अग्ने ऽनिष्टो यो अग्निष्ठो अभिदासति इदमहं तं त्वया-भिदधामि । सुगार्हपत्ये निर्णुदन्नुशतीं रुषे श्री-यसी श्रेयसे नः । दीर्घायुत्वाय शतशारदायाभिय-स्व महते सौभगाय "इति सहिरण्यरत्नजलेन सिञ्च-यित्वा" यास्ते शिवास्तन्वो जातवेदो या अन्तरि-क्षे दिवि याः पृथिव्यां ताभिः सम्भूय सगणास-जोषा हिरण्ययोने वह हव्यमग्ने । स त्वमग्ने ज्यो-तिषा भाहि समन्तरिक्षेण सं पार्थिवेन वैश्वानर्या समिधा देधिहि नः । ऊर्जस्वत्या भास्वत्या रश्मि-वत्या ज्योतिष्मत्या ॥ सप्त ते अग्ने समिधः सप्त

CC-0 Pulwama Collection. Digitized by eGangotri

जिह्वाः सप्तर्षयः । सप्त धाम प्रियाणि सप्तहोत्रा अनुविद्वान्सप्त योनीरापृणस्वघृतेन । पुनस्त्वादित्या रुद्रावसवः समिन्धन्तां पुनर्ब्रह्मणोऽवसनीथ यज्ञैः । घृतेन ते तनुं वर्धयामि सत्याः सन्तु यजमानस्य कामाः । "इत्यरणीकाष्ठं सप्तसमिधो वाऽग्नौ दद्यात्" ॥ प्रजापतये स्वहा ॥ अग्न आयाहि वीतये गृणानो हव्यधातवे । निहोता सत्सि बर्हिषि ॥ अग्निर्दूतं वृणीमहि होतारं विश्ववेदसम् । अस्य यज्ञस्य सुक्रतुम् ॥ अग्निमग्निं हवीमभिः सदा वहन्तु विश्पतिम् । हव्यवाहं पुरुप्रियम् ॥ अग्निर्देवो इहावह जज्ञानो वृक्तु बर्हिषि । अस्य होता न ईड्यः ॥ ते विश्वतो विबोधय यदग्ने यामि दूत्यम् । देवैरासर्पि बर्हिषि ॥ घृतावहन्तु दीदिवा प्रतिष्म रिषतो दह । अग्ने त्वं रक्षस्वनः ॥ अग्निमग्निं समि-

CC-0 Pulwama Collection. Digitized by eGangotri

ह्यते कविर्ग्रहपतिर्युवा । हव्यवाहाज्जुह्वस्याः ॥ क-
विमग्निमुपस्तुहि सत्यै धर्माणमध्वरे । देवममीवचा-
तनम् ॥ यस्त्वामग्ने हविष्मतिर्दूतं देवसुपर्षति ॥ त-
स्य सुप्राविता भव ॥ यो अग्निर्देववीतये हविष्मां
अविवासति । स नः पापमपनुदत् ॥ तस्मै पावक
दीदिवो अग्निदेव इहावह । उप प्रियं हविं च नः ॥
अग्ने शुक्रेण शोचिषा विश्वेभिर्देवहुतिभिः । इमं
स्तोमं जुषस्व नः ॥ चितिः स्रुक्चित्तमाज्यं वा-
ग्वेदिराधीतं बर्हिः केतो अग्निर्विज्ञातमग्निर्वाचस्प-
तिर्होता मन उपवक्ता प्राणो हविः सामाऽध्वर्युरि-
न्द्रं गच्छ ॥ "इति पुष्पाद्यैः सम्पूज्य प्रार्थयेत्" ॥
संमुखा तिष्ठ वेदि त्वं यथा स्थास्यन्ति देवताः ।
स्थानभूता शिवादीनां शक्तीनां सुरपूजिते ॥ ब्र-
ह्माज्ञयाद्य मे यज्ञं सफलीकर्तुमर्हसि ॥ "आकृष्णे-

CC-0. Purwama Collection. Digitized by eGangotri

नेति प्रदक्षिणं कृत्वा मुखेन अग्नेशकेमेति मन्त्रं पठित्वा धमयेत्" ओं हुं हुतभुजे स्वाहा ३ ॥ "ततोऽन्नसहितहिरण्यादि सङ्कल्पयेत्" ओं अद्यतावत् पितॄणां स्वर्गप्राप्त्यर्थं आत्मनः पुण्यवृद्ध्यर्थं अग्निप्रतिग्रहणार्थमिममन्नादि सङ्कल्पयामिनमः ॥ ततोग्निकर्म ॥ पात्रं तिला । अग्निकुण्डपूजा अग्नये समनमदिति पठेत् ॥

इत्यग्निसाधनविधिः ॥

अथ शय्यादानविधिः

आदौ तण्डुलचूर्णेन ब्रह्मकलशं प्रतिमाकलशं तद्दक्षिणे दशदिक्पालानां तन्मध्ये वेदचतुष्टयीकलशान्क्षेत्रपालद्वयं च संस्थाप्य ॥ अभिनोदेवी–वषट् ते विष्णा तावत् ॥ प्रदानं । तद्विष्णोः । वासुदेवाय नमः ८ विष्णुप्रतिमायां वनस्पते विदाङ्गोहिभूया अस्मत्सखा प्रतरणः स्ववीरः । गोभिः सन्नद्धो असि वीरयस्व

CC-0 Pulwama Collection. Digitized by eGangotri

अभिष्टुतः पवित्रमतिगाहने । रक्षोहावारमव्ययम्
॥ ४ ॥ यदन्ते यच्च दूरके भयं विन्दति मामिह ।
पावमानं वित्तज्जहि ॥ पावमानः सो अद्यनः पवि-
त्रेण विचर्षणि । यः पूतः स पुनातु मा ॥ यत्ते
पवित्रमर्चिष्यग्ने विततमन्तरः । ब्रह्मं स्तेन पुनीहि
नः ॥ यत्ते पवित्रमग्निवदग्ने तेन पुनीहि नः । ब्रह्म
स वै पुनीहि मा ॥ उभाभ्यां देव सवितः पवि-
त्रेण सवेन च । मां पुनीहि विश्वतः ॥ ५ ॥
"इत्युपस्थाने पावमान्यब्राह्मणं समाप्तम् ॥

अथ तर्पणे पावमानीब्राह्मणम् ॥ अस्य पावमानीसू-
क्तस्य "गायत्रीच्छन्दः सप्तर्षयो देवता आत्मनो० त-
र्पणे विनियोगः" ओं त्रिभिष्ट्वन्देव सवितर्वसिष्ठैः सो-
मधामभिः । अग्ने दक्षैः पुनीहि मा ॥ "अनुष्टुप्छन्दः" ।
पुनन्तु मा देवजनाः पुनन्तु वसवो धिया । विश्वे देवाः

CC-0 Pulwama Collection. Digitized by eGangotri

पुनीतमा जातवेदः पुनीहि मा । "द्वे गायत्रीच्छन्दः" । आप्ययस्व प्रस्यन्दस्व सोम विश्वेभिरंशुभिः । देवेभ्य उत्तमं हविः ॥ उपप्रियं परिपूतं च्युवानमाहुतीवृधम् । अगर्म विद्रुतो नमः । "उष्णिक्छन्दः" । अलाय्यस्य परशुना शतमा पर्वसु देवसाम । आखुश्चिदेव सोम ॥ "द्वे अनुष्टुप्छन्दः" । यः पावमानीरध्येत्यृषिभिः सम्भृतं रसम् । सर्वं स पूतमश्नाति सुदितं मातरिश्वना ॥ पावमानीर्यो अध्येत्यृषिभिः सम्भृतं रसम् । तस्मै सरस्वती दुहे क्षीरं सर्पिर्मधूदकम् ॥ पावमानीः स्वस्त्ययनीः सुदुघा हि घृतश्च्युतः । ऋषिभिः सम्भृतो रसो ब्राह्मणेष्वमृतं हितम् ॥ पावमानीर्दिशन्तु न इमं लोकमथो अमुम् । कामान्समवयन्तु नो देवैर्देवीः समाहृताः ॥ येन देवाः पवित्रेणात्मानं पुनते सदा । तेन सहस्रधारेण पा-

CC-0 Pulwama Collection. Digitized by eGangotri

वमानः पुनातु मा ॥ प्राजापत्यं पवित्रं शतद्योतं हिरण्ययम् । तेन ब्रह्मविदो वयं पूतं ब्रह्म पुनीमहे ॥ इन्द्रः सुनीत्या सहसा पुनातु सोमः स्वस्त्या । वरुणः समीद्ध्या ॥ यमो राजा प्रसृणाभिः पुनातु जातवेदाः । ऊर्जयन्त्या पुनातु मा ॥ ऋषयस्तु तदपस्तापे सर्वे सर्वजिगीषवः । तपसस्तपसोऽध्यायन्तु पावमानी ऋचोदब्रवीत् ॥ यन्मे गर्भे वसतः पापमुग्रं यज्जायमानस्य च किञ्चिदन्यत् । जातस्य च यच्चापि च वर्धतो मे तत्पावमानीभिरहं पुनामि ॥ माता पित्रोर्यन्न कृतं वचो मे यत्स्थावरं जङ्गममाबभूव । विश्वस्य यत्प्रहरिषितं वचो मे तत्पावमानीभिरहं पुनामि ॥ गोघ्नातुष्कराद्वा स्त्रीवधाद्यत्किल्विषम् । पापकं च चरणेभ्यस्तत्पावमानीभिरहं पुनामि ॥ ब्रह्मवधात्सुरा-
CC-0 Pulwama Collection. Digitized by eGangotri

पानात्सुवर्णस्तेयाद्वृषलिगमनमैथुनसङ्गमात् । गुरोर्दाराभिगमनाच्च तत्पावमानीभिरहं पुनामि । बालघ्नान्मातृपित्रोर्वधाद्भूमितस्करात्सर्ववर्णगमनमैथुनसङ्गमात्पापेभ्यश्च प्रतिग्रहात् । सद्यः प्रहरन्ति सर्वदुष्कृतं तत्पावमानीभिरहं पुनामि ॥ क्रियविक्रयाद्योनिदोषाद्भक्ष्याद्भोज्यात्परिग्रहात् । असम्भोनाच्चापि नृशंसं तत्पावमानीभिरहं पुनामि ॥ दुरिष्टं दुरधीतं पापं यच्चाज्ञानतः कृतम् । अयाचिताच्चासंयाज्यात्तत्पावमानीभिरहं पुनामि ॥ ऋतस्य योनयोऽमृतस्य धाम विश्वादेवेभ्यः पुण्यगन्धास्ता न आपः प्रहरन्ति पापम् । शुद्धो गच्छामि सुकृतां लोके तत्पावमानीभिरहं पुनामि ॥ पावमानीः स्वस्त्ययनीर्याभिर्गच्छति नन्दनम् ॥ पुण्यांश्च भक्ष्यान्भक्षयत्यमृतत्वं च गच्छति ॥ पावमान्यं परंब्रह्म शुक्रं ज्योतिः

CC-0 Pulwama Collection. Digitized by eGangotri

सनातनम् । पितॄंस्तस्योपतिष्ठन्ति क्षीरं सर्पिर्मधूद-
कम् ॥ पावमानीः पितॄन्देवान्ध्यायेद्यच्च सरस्वती-
म् । पितॄंस्तस्योपतिष्ठेत्तु क्षीरं सर्पिर्मधूदकम् ॥
अनेन० अक्षय्यतृप्तिरस्तुपावमानीमन्त्रा प्रीयन्तां प्रीताः
सन्तु ॥ इति तर्पणे पावमानीब्राह्मणम् ॥

अथाग्निसाधनम् ।

"घृतलिप्तकांस्यपात्रे संस्थापितमग्निं कन्याहस्तेनानीय ।
ब्राह्मणः" सं त्वः सृजामि । अश्विनोः । गायत्रं नमः ३
हिरण्यवर्णाः शु ४ आपो हिष्ठेति संजीव्य" । क्र-
व्यादमग्निं प्रहिणोमि दूरं यमराज्ञो गच्छतरिप्रवाहः ।
इहैवायमितरो जातवेदा देवेभ्यो हव्यं वहतु प्रजानन्
"इति दर्भद्वयं प्रज्वाल्य" । योऽग्निः क्रव्यात्प्रविवेश
वो गृहमिदं पश्यन्नितरं जातवेदसम् । तं हरामि
पितृयज्ञाय देवं सुघर्मपिन्वाद्धर मे सधस्थे "इति

CC-0 Pulwama Collection. Digitized by eGangotri

स्तु, वायुः प्रीयतां वायुः प्रीतोऽस्तु, सूर्यः प्रीयतां सूर्यः प्रीतोऽस्तु, ब्रह्मा, प्रजापतिः कूष्मर्षयः प्रीयन्तां प्रीता सन्तु, पापान्मुक्तिः पुण्यवृद्धिरस्तु ॥ इति कूष्माण्डमन्त्राः ॥

॥ अथ कूष्माण्डब्राह्मणम् ॥

"ब्राह्मणः प्रजापतेर्यजुः" ॥ वातरशना ह वा ऋषयः श्रमिण ऊर्ध्वमन्थिनो बभूवुस्तानृषयोऽर्थमायन् ते निलायमाचरंस्तान्प्रदद्दशुः, कूष्माण्डानि तांस्तेऽन्वपश्यञ्छ्रद्धया च तपसा च तानृषयोऽपृच्छन् कथानिलायं चरथेति, त ऋषीनब्रवन्नमो वोस्तु भगवन्तोऽस्मिन्धाम्नि केन वः सपर्यामेति तानृषयोऽब्रवन् पवित्रं नो ब्रूत, येनाऽरेपसो भविष्याम इति । त एतानि सूक्तान्यपश्यन् "यद्देवा देवहेळनं । यद्दीव्यन्नृणमहं । आयुस्ते विश्वतो दधत्" इत्येतैराज्यं जुहुत, तेनाऽरेपसो भविष्यथेति,

CC-0 Pulwama Collection. Digitized by eGangotri

त एतैराज्यमजुहुबुस्ते वाऽरेपसोऽभवन्कर्मादिष्वेतै-र्जुहुयात्पूतो देवलोकान्समश्नुते १ कूष्मा ह वै नाम ऋषयो वातरशनास्ते हंसा हिरण्मया ज्योतिष्पत्त्रा अजिराभूत्वाऽचरँस्तेऽकामयन्ताऽण्डेषु नः प्रजा ब्रह्म वदेयुरिति तेषामण्डेष्वेव प्रजा ब्रह्माऽवादिषुस्त अ-ण्डस्था अवदंस्तस्मात्कूष्माण्डानि कूष्माण्डैर्जुहु-यात् योऽपूत इव मन्येत यदर्वाचीनमेनो भ्रूणह-त्यायास्तस्मान्मुच्येयमित्ययोनौ वा रेतः सिक्त्वा जुहुयात् यथा वै स्तेनो यथा भ्रूणहैवमेष भवति योऽयोनौ रेतः सिञ्चति, यदेतैराज्यं जुहोति, तै-रेवाऽत्मानं पुनीते दीक्षामुपैति दीक्षित एतैः सदाधि जुहोति संवत्सरं दीक्षितो भवति, संवत्सरादेवा-त्मानं पुनीते मासंदीक्षितो भवति यो वै मासः स संवत्सरः संवत्सरादेवात्मानं पुनीते, द्वादशरात्री-

CC-0 Pulwama Collection. Digitized by eGangotri

दीक्षितो भवति द्वादशमासः संवत्सरः संवत्सरादेवात्मानं पुनीते, षड्रात्रीर्दीक्षितो भवति षड्वा ऋतवः संवत्सरः संवत्सरादेवात्मानं पुनीते । तस्य व्रतं "न मांसमश्नीयात्, न स्त्रियमुपेयात्, नोपर्यासीत, जुगुप्सेतानृतात्" पयो ब्राह्मणस्य व्रतं, यवागूराजन्यस्य, आमिक्षा वैश्यस्य, सौम्येप्यध्वरे इत्येतद्व्रतं ब्रूयात् यदि मन्येतोपदास्यामीत्योदनं धानाः सक्तून् घृतमित्यनुव्रतयेदात्मनोऽनुपसादायेति ॥ इति कूष्माण्डब्राह्मणम ॥

॥ अथ पावमान्यब्राह्मणम् ॥

"वैश्वानरेणेति पावमान्यब्राह्मणेन चोपस्थानम्"॥ "ओं त्वं सोमासि द्वात्रिंशद्भारद्वाजः कश्यपो गोतमोऽत्रिर्विश्वामित्रो जमदग्निर्वसिष्ठ इतीह त्र्यृचाः सप्तर्षयः शेषं पवित्रो वसिष्ठो भाविताग्निस्त्रः पापाण्यो

CC-0 Pulwama Collection. Digitized by eGangotri

यत्ते पवित्रमाग्नेयी सावित्र्यग्निः सावित्री वैश्वदेवी पवस्व सोमेति षोडशाक्षरास्तिस्रो द्विपदास्त्रिंशी पुरा उष्णिक् सप्तविंशत्याऽनुष्टुबन्ते च ते पावमान्यधेत्यस्तु ते जगती उपस्थाने विनियोगः" ॥

ओं त्वं सोमासि धारयुर्मन्द्र ओजिष्ठो अध्वरे । पवो समं हयद्रविः ॥ त्वं सदो नृपादने दधन्वात्सत्सरित्तमः । इन्द्राय सूरिरन्धसा ॥ त्वं सुष्वाणो अद्रिभिरभ्योऽकर्षत्कनिक्रदत् । द्युमन्तं शुष्ममुत्तमम् ॥ इन्दुं हिन्वानि आर्षति तिरो वाराण्यव्यया । हरिवाजमचिक्रदत् ॥ इन्दो व्यवमर्षसि विश्रवांसि विसौभगः । विवाजान्सोमगो मतः ॥ १ ॥ आन इन्दो शतग्विनं रयिङ्गोमन्तमश्विनम् । भिरासोमसहस्रिणम् ॥ पावमानः स इन्दवः स्थिरः पवित्रमाशव । इन्द्रं यामेभिराशत ॥ ककुदः सोम्यो

CC-0. Pulwama Collection. Digitized by eGangotri

रस इन्दुरिन्द्राय पूर्व्याः । आयुः पवत आयवे ॥
हिन्वन्ति सूर सुस्रयः पवमानः मधुश्च्युतम् । अ-
भिगिरा समस्वरन् ॥ अविता नो अजाश्वः पूषा
यामनि वासनि । आभक्षत्कन्यासु नः ॥ २ ॥
अयं सोम कपर्दिनो घृतन्नः पवते शुचि । आ
भक्षत्कन्यासु नः ॥ वाचो जन्तुः कवीनां पव-
स्व सोम धारय । देवेषु रत्नधा असि ॥ आकल-
येषु धावति श्येनो वर्म विगाहते । आभिद्द्रोणा
कनिक्रदत् ॥ परि प्रसोमतेरसौरसालिकलशोऽसुतः ।
श्येनो न उक्तो आर्षति ॥ ३ ॥ पवस्व सोम
मन्दयन्निन्द्राय मधुमत्तमः । असृग्रन्देववीतये ॥
वाजयन्तो रथा इव ते सुतासो मदिन्तमाः । शु-
क्रावायुमसृक्षत ॥ ग्राव्णा तन्नो अभिष्टुतः पवित्रं
सोम गच्छसि । दधत्स्तोत्रे सुवीर्यम् ॥ एष तन्नो

CC-0.Purwama Collection. Digitized by eGangotri

"वैश्वानरेण सूक्तेन प्राङ्मुखः प्राञ्जलिरुपतिष्ठते, जपेत्सूक्तानि पराञ्चि यानि वैश्वानरीयं च" वैश्वानराय प्रति वेदयामो यदी मृळं सङ्गर देवतासु। स एतान्पाशान्प्रमुञ्च प्रवेद सनो मुञ्चतु दुरितादवद्यात् ॥ ६२ ॥ वैश्वानरः पावयानः पवित्रैर्यत्सङ्गरमभिधावाम्याशाम्। अनाजानन्मनसा याचमानो यदत्रैनो अपतत्सुवामि ॥ ६३ ॥ अमू ये सुभगे दिवि विचृतौ नाम तारके। प्रेहामृतस्य यच्छतमेतद्बद्धकमोचनम् ॥ ६४ ॥ विजिहीष्व लोकान्कृधि बन्धान्मुञ्चासि बद्धकम्। योनेरिव प्रच्युतो गर्भः सर्वान्पथो अनुष्यात् ॥ ६५ ॥ सुप्रजानन्प्रतिगृह्णाति विद्वान्प्रजापतिः प्रथमजा ऋतस्य। अस्माभिर्दत्तं जरसः परस्तादच्छिन्नं तन्तुमनु सन्तरेम ॥ ६६ ॥ उत तन्तुमन्वेके सन्तरन्ति येषां दत्तं

CC-0 Pulwama Collection. Digitized by eGangotri

पित्र्यमायतनवत् ॥ अबन्ध्वेके ददतः प्रयच्छन्दातुं
चेच्छक्नुवान्स स्वर्ग एषाम् ॥ ६७ ॥ आरभेथा-
मऽनु संरभेथां समानं पन्थामवतो घृतेन । यद्वां
पूर्तं परिविष्टं यदग्नौ तस्य गुप्त्या इह जायापती
संरभेथाम् ॥ ६८ ॥ यदन्तरिक्षं पृथिवीमुत द्यां
यत्पितरं मातरं वा जिहिंसिम । अग्निर्नस्तस्मादेनसो
औपासन उन्नैनेषद्दुरिता यानि चकृम ॥ ६९ ॥
भूमिर्मातादितिर्नो जनित्रं भ्रातान्तरिक्षमभिशस्त्या
नः । द्यौर्नः पिता पित्र्याच्छं भवाति जामिमृत्वा
मावपत्सि लोकान् ॥ ७० ॥ यत्रासुहार्दः सुकृतो
मदन्ति विहाय रोगं तन्वं स्वाम् । अश्रोणा अङ्गै-
रह्रुताः स्वर्गेलोके तत्र पश्येम पितरं च पुत्रम्
॥ ७१ ॥ यदन्नमद्म्यऽनृतेन देवा दास्यन्नदास्य-
न्नुत वा करिष्यन् । यद्देवानां चक्षुष्या गो अस्ति

CC-0 Pulwama Collection. Digitized by eGangotri

यदेव किञ्च प्रतिजग्राहाहमग्निर्मा तस्मादऽनृणं करोतु ॥ ७२ ॥ यदन्नमद्मि बहुधा विरूपं वासो हिरण्यमुत गामजामविम् । यद्देवानां चक्षुष्या गो अस्ति यदेव किञ्च प्रतिजग्राहाहमग्निर्मा तस्मादऽनृणं करोतु ॥ ७३ ॥ महापापापनुत्यर्थं कूष्माण्डानि जपेद्द्विजः । कृतव्रतः पौर्णमास्यां दर्शे वा प्रातरेवच ॥ १ ॥ पयो यवागूरामिक्षा द्विजादीनां व्रतं क्रमात् । नवां स्थालीं समाहृत्य तस्यां पायसमाश्रपेत् ॥ २ ॥ देवतास्तेन यष्टव्या ऋचो होम्या जपेत च । कूष्माण्डानि जपेन्नित्यं जुहुयाद्दर्शपूर्णयोः ॥ ३ ॥ पापी पापाद्विनिर्मुक्तः शुद्धात्मा स्वर्गमाप्नुयात् । प्रायश्चित्तानि हुत्वाथ द्विजान्छक्त्या प्रपूजयेत् ॥ ४ ॥ अनेन कूष्माण्डमन्त्रहोमेन "वा" पाठेन आत्मनो अग्निः [illegible] प्रीतो

CC-0 Pulwama Collection. Digitized by eGangotri

पतो यश्च नः शपतः शपात् । इध्मस्येव प्रख्या-
यतस्तस्य मुच्छेषि किञ्चन ॥ ३१ ॥ संशितं मे
ब्रह्म संशितं वीर्यं बलम् । संशितं क्षत्रं मे जिष्णु
यस्याहमस्मि पुरोहितः ॥ ३२ ॥ उदेषां बाहू अ-
तिरमुद्वर्चो अथो बलम् । क्षणोमि ब्रह्मणा मित्रा-
नुन्नयामि स्वाँनहम् ॥ ३३ ॥ पुनर्मनः पुनरायुर्म
आगात्पुनश्चित्तं पुनराधीतं म आगात् । पुनश्चक्षुः
पुनःश्रोत्रं म आगात् । वैश्वानरो अदब्धस्तनूपा
अवबाधतां दुरितानि विश्वा ॥ ३४ ॥ "सौत्रामण्या
निचाङ्कुणस्य" यद्देवा देवहेळनं देवासश्चक्रमा वयम् ।
अग्निर्मा तस्मादेनसो विश्वान्मुञ्चत्वंहसः ॥ ३५ ॥
यदि दिवा यदि नक्तमेनांसि चकृमा वयम् । वायु-
र्मा तस्मादेनसो विश्वान्मुञ्चत्वंहसः ॥ ३६ ॥ यदि
जाग्रद्यदि स्वप्नमेनांसि चकृमा वयम् । सूर्यो मा

CC-0 Pulwama Collection. Digitized by eGangotri

तस्मादेनसो विश्वान्मुञ्चत्वंहसः ॥ ३७ ॥ "प्रायश्चित्तानि सर्वान्तीयानि शिशुशैशवयोः" भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षिभिर्यजत्राः । स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिर्व्यशेम देवहितं यदायुः ॥ ३८ । स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः । स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥ ३९ ॥ पृषदश्वा मारुतः पृश्निमातरः शुभं युवानो विदथेषु जग्मयः । अग्निजिह्वा मनवः सूरचक्षसो विश्वे नो देवा अवसाऽगमन्निह ॥ ४० ॥ शतमिन्नु शरदो अन्ति देवा यत्रा नश्चक्रा जरसं तनूनाम् । पुत्रासो यत्र पितरो भवन्ति मा नो मध्या रीरिषतायुर्गन्तोः ॥ ४१ ॥ "शेषः कोकिलस्य राजपुत्रस्य राज्यप्सोः" पुनन्तु मा पितरः सोम्यासः पुनन्तु मा पितामहाः । पुनन्तु

CC-0. Pulwama Collection. Digitized by eGangotri

प्रपितामहाः पवित्रेण शतायुषा ॥ ४२ ॥ पुनन्तु
मा पितामहाः पुनन्तु प्रपितामहाः । पवित्रेण श-
तायुषा विश्वमायुर्व्यश्नवै ॥ ४३ ॥ अग्न आयूंषि
पवस आसुवोर्जमिषं च नः । आरे बाधस्व दुच्छु-
नाम् ॥ ४४ ॥ पुनन्तु मां देवजनाः पुनन्तु मन-
सा धियः । पुनन्तु विश्वाभूतानि जातवेदः पुनीहि
मा ॥ ४५ ॥ पवित्रेण पुनीहि मा शुक्रेण देव-
दीद्यत् । अग्ने क्रत्वा क्रतूँरनु ॥ ४६ ॥ यत्ते पवि-
त्रमर्चिष्यग्ने विततमन्तरा । ब्रह्म तेन पुनातु मा
॥ ४७ ॥ पवमानः सोअद्य नः पवित्रेण विचर्ष-
णिः । यः पूतास पुनातु मा ॥ ४८ ॥ उभाभ्यां
देव सवितः पवित्रेण सवेन च । मां पुनीहि वि-
श्वतः ।४६ वैश्वदेवी पुनती देव्यागाद्यस्यामिमास्तन्वो
वीतपृष्ठाः । तया मदन्तः सधमादेषु वयं स्याम

CC-0 Pulwama Collection. Digitized by eGangotri

पतयो रयीणाम् ॥ ५० ॥ "ब्राह्मणो यच्चानिरुक्तम्"
पुनर्मा मैत्विन्द्रियं पुनरायुः पुनर्भगः । पुनर्ब्रह्म-
णमैतु मा पुनर्द्रविणमैतु माम् ॥ ५१ ॥ यन्मे-
ऽद्य रेतः पृथिवीमस्कन्यदोषधीरप्यसरद्यदपः । तद-
हं पुनराददे ॥ ५२ ॥ यन्मे रेतः प्रसिच्यते यन्म
आजायते पुनः । यद्वा मे प्रतितिष्ठति तेन माम-
मृतं कुरु तेन सुप्रजसं कुरु ॥ ५३ ॥ "अपां यो
द्रविण इति प्रजापतेः" ॥ रथे अक्षेषु वृषभस्य वाजे
वाते पर्जन्ये वरुणस्य शुष्मे । इन्द्रं या देवी सुभ-
गा जजाना सेयमगाद्वर्चसा संविधाना ॥ ५४ ॥
या हस्तिनि द्वीपिनि या हिरण्ये गोष्वऽश्वेषु पुरु-
षेष्वन्तः । इन्द्रं या० ॥ ५५ ॥ सिंहे व्याघ्र उत
या पृदाकौ त्विषिरग्नौ ब्राह्मणे सूर्ये या । इन्द्रं या
देवी० ॥ ५६ ॥ या राजन्ये दुन्दुभावायतायाम-

CC-0 Pulwama Collection. Digitized by eGangotri

श्वस्य क्रन्दे पुरुषस्य मायौ । इन्द्रं या० ॥ ५७ ॥ "हिरण्यवर्णा इति कश्यपस्य" हिरण्यवर्णाः शुचयः पावका यासु जातः कश्यपो यास्विन्द्रः । या अग्निं गर्भं दधिरे विरूपास्ता न आपः शंस्योना भवन्तु ॥ ५८ ॥ यासां देवा दिवि कृण्वन्ति भक्ष्यं या अन्तरिक्षे बहुधा भवन्ति । या अग्निं० ॥ ५९ ॥ यासां राजा वरुणो याति मध्ये सत्यानृते अवपश्यञ्जनानाम् । या अग्निं० ॥ ६० ॥ "कूष्माण्डब्राह्मणं च हुत्वा" तेजोसि । ओं अग्नयेनमः, वायवे नमः, सूर्यायनमः, ब्रह्मणेनमः, प्रजापतयेनमः, कूष्मर्षिभ्यःनमः, "इति व्रतहोमः" "अग्ने त्वं पारयेति स्विष्टकृतम्" ॥ अग्ने त्वं पारयानव्यो अस्मान्स्वस्तिभिरतिदुर्गाणि विश्वा । पूंश्च पृथ्वी बहुलान उर्वी भवा तोकाय तनयाय शंय्योः ॥ ६१ ॥

CC-0 Pulwama Collection. Digitized by eGangotri

त् । नेन्न ऋणादृणवा इच्छमानो यमस्य लोके अधिरज्जुरायत् ॥ ११ ॥ अव ते हेळो वरुण नमोभिरवयज्ञेभिरीमहे हविर्भिः । क्षयन्नस्मभ्यमसुर प्रचेतो राजन्नेनांसि शिश्रथः कृतानि ॥ १२ ॥ उदुत्तमं वरुण पाशमस्मदवाधमं विमध्यमं श्रथाय । अथा वयमादित्यव्रते तवानागसो अदितये स्याम १३ इमं मे वरुण श्रुधी हवमद्या च मृळय । त्वामवस्युराचके ॥ १४ ॥ तत्त्वा यामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः । अहेळमानो वरुणेह बोध्युरुशंसमान आयुः प्रमोषीः ॥ १५ ॥ त्वं नो अग्ने वरुणस्य विद्वान्देवस्य हेळोऽवयासिसीष्ठाः । यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषांसि प्रमुमुग्ध्यस्मत् ॥ १६ ॥ स त्वन्नो अग्नेऽवमो भवोती नेदिष्ठो अस्या उषसो व्युष्टौ अव य-

CC-0 Pulwama Collection. Digitized by eGangotri

त्त्व नो वरुणं रराणो वीहि मृळीकं सुहवो न
एधि ॥ १७ ॥ सङ्कसुको विकसुको निर्ऋथो यश्च
निःस्वरः । तेऽस्मद्यक्ष्ममनागसो दूराद्दूरमचीचतन्
॥ १८ ॥ निर्यक्ष्ममचीचतन् कृत्यां निर्ऋतिं च ।
तेनान्योऽस्मत्समृच्छतां तमस्मै प्रसुवामासि ॥ १९ ॥
दुःशंसानुशंसाभ्यां घनेनानुघनेन च । तेन योऽन्यो-
ऽस्मत्समृच्छतां तमस्मै प्रसुवामासि ॥ २० ॥ संव-
र्चसा पयसा सन्तनूभिरगन्महि मनसा संशिवेन ।
त्वष्टा सुदत्रो विदधातु रायो नोऽनु मार्ष्टु तन्वो
यद्विलिष्टम् ॥ २१ ॥ आयुस्ते विश्वतो दधदयम-
ग्निर्वरेण्यः । पुनस्ते प्राण आयातु परायक्ष्मं सुवा-
मि ते ॥ २२ ॥ इममग्न आयुषे वर्चसे कृधि ति-
ग्ममोजो वरुण संशिशाधि । मातेवास्मा अदिते
शर्म यच्छ विश्वेदेवा जरदष्टिर्यथासत् ॥ २३ ॥ अग्न

CC-0 Pulwama Collection. Digitized by eGangotri

आयूंषि पवस आसुवोर्जमिषं च नः । आरे बाध-
स्व दुच्छुनाम् ॥ अग्निर्ऋषिः पवमान पाञ्चजन्यः
पुरोहितः । तमीमहे महागयम् ॥ २५ ॥ अग्ने पव-
स्व स्वपा अस्मे वर्चः सुवीर्यम् । दधद्रयिं मयि
पोषम् ॥ २६ ॥ अग्ने जातान्प्रणुदानः सपत्नान्प्र-
त्यजाताञ्जातवेदो नुदस्व । अधि नो ब्रूहि सुमना
अहेळञ्शर्मं ते स्याम त्रिवरूथ उद्भौ ॥ २७ ॥
सहसा जातान्प्रणुदानः सपत्नान्प्रत्यजाताञ्जातवेदो
नुदस्व । अधि नो ब्रूहि सुमनस्यमानो वयं स्याम
प्रणुदानः सपत्नान् ॥ २८ ॥ अग्नेयो नोऽभितो
वृको जनो वारो जिघांसति । तं त्वं वृत्रहञ्जहि
वस्वस्मभ्यमाकृधि ॥ २९ ॥ अग्नेयो नोऽभिदास-
ति समानो यश्च नेष्ठ्यः । तं वयं समिधं कृत्वा
तुभ्यमग्नेऽपिदध्मसि ॥ ३० ॥ यो नः शपादऽश-

CC-0 Ruwarna Collection. Digitized by eGangotri

चतुर्थ्यादि द्वावनुष्टुब्नवमी जगती पङ्क्तिर्द्विशक्वर्यन्तम् ॥ अथ कूष्माण्डैर्जुहुयाद्योऽपूत इव मन्येत यथा वै भ्रूणहैव सैष भवति योऽयोनौ रेतः सिञ्चति यदर्वाचीनमेनो भ्रूणहत्यायास्तस्मान्मुच्येयमित्यऽयोनौ रेतः सिक्त्वा स्वप्नादन्यत्र भ्रूणहत्याया ब्रह्महत्याया वा पवित्रकामः पौर्णमास्याममावस्यायां वा केशश्मश्रुलोमनखानि वापयित्वा शुद्धपक्षस्य पुण्याहे पर्वणि रोहिण्यां वा स्नातः शुचिः शुचिवासाः कृष्णाजिनवासा वा ब्रह्मचारिकल्पेन व्रतमुपैति, संवत्सरं मासं चतुर्विंशति द्वादश षट् तिस्रो वा रात्रीः, न मांसमश्नीयात् न स्त्रियमुपेयात् नोपरि शयीत जुगुप्सेतानृतात् पयो भक्षयति इति प्रधानकल्पः । यावकमुपभुञ्जीत कृच्छ्रं द्वादशरात्रं वाऽचरेत्, यवागूं राजन्यस्यामिक्षां वैश्यस्य सौम्ये-

CC-0 Pulwama Collection. Digitized by eGangotri

ऽप्यध्वर इत्येतद्व्रतं ब्रूयात् यदि मन्येतोपदास्यामी- त्येवमोदनं धाना सक्तून् घृतमित्यनुव्रतयेदात्मनो- ऽनुपदासायेति पूर्वाह्णेऽग्निमुपसमाधाय चरुं श्रपयि- त्वाऽग्नेयाद्याः षट् देवताः कलशेऽभ्यर्च्य निर्वपेत् । य- आज्यभागान्तं हुत्वाऽथ स्रुवेनाज्यस्य जुहोति । य- द्देवा देवहेळनं, यददीव्यनृणमहं, आयुस्ते विश्वतो दधादित्येतैः सूक्तैः प्रत्यृचमाज्यं जुहुयात् । यद्देवा देवहेळनमिति तिसृभिः । भद्रं कर्णेभिरिति चतुसृ- भिः । पुनन्तु मा पितर इति नवभिः, पुनर्मामैत्वि- न्द्रियमिति तिसृभिः । रथे अक्षेष्विति चतुसृभिः । हिरण्यवर्णा इति तिसृभिः प्रतिमन्त्रमाज्यस्य हुत्वा अथ व्रतहोमान् जुहोति । "अग्नये वायव्ये सूर्याय ब्रह्मणे प्रजापतये कूष्मार्षिभ्य" इति व्रतहोमः । "अग्ने त्वं पारयेति स्विष्टकृतम् । वैश्वानर्येणेति सूक्तेन प्राङ्-

CC-0 Pulwama Collection. Digitized by eGangotri

मुखः प्राञ्जलिरुपतिष्ठते, जपेत्सूक्तानि पराञ्चि यानि वैश्वानरीयं च । एवमोदनमासाद्याग्न्याधेये दशहोता दर्शपौर्णमासयोश्चतुर्होता चातुर्मास्येषु पञ्चहोता पशुयज्ञे षड्होता सोमे सप्तहोतेति ह विज्ञायते कर्मादिष्वेतैर्जुहुयात्पूतो देवलोकं समश्नुत इत्येतदित्येतत् ॥ इति कूष्माण्डार्षम् ॥

अथ कूष्माण्डम् ॥

अस्य श्रीकूष्माण्डमन्त्रस्य ब्रह्मा ऋषिः, गायत्रंच्छन्दः श्रीकूष्माण्डो देवता, आत्मनो० अहोरात्रकृतदशविधपापनिष्कृत्यर्थं पाठे होमे वा विनियोगः ॥ ध्यानम्

कूष्मा नाम मुनीश्वरास्त्रिभुवने ख्याताः सुरूपाः शुभा
अण्डानाममृतेश्वरा विचरतां मध्ये स्वहंसात्मकाः ।
तेऽपि यत्पठनात्परात्परतरां श्रेष्ठां गतिमास्थिताः
सोयं नो विदधातु सौख्यनिचयं पापारिनाशं सदा ।१।

CC-0. Panini Kanya Maha Vidyalaya Collection. Digitized by eGangotri

यत्पाठात्प्रलयं प्रयान्ति शतशः पापारिसंघाः चणा-द्धोमात्तर्पणसञ्चयात्सुमहतामभ्यासनात्सद्वरात्। सोयं ब्रह्ममुखोद्गतः परतरो मन्त्रादिगर्भो महान् कूष्माण्डो विदधातु सौख्यनिचयमग्नेः पुरःसंस्थितिम्॥ २॥

कूष्माण्डानि कूष्माणां शकुनीनामण्डस्थानाम्॥

यद्देवा देवहेळनं यद्वाचानृतमूदिम। आदित्यास्तस्मान्मुञ्चंतर्तस्यर्तेन मामुत॥ १॥ देवा जीवनकाम्या यद्वाचानृतमूदिम। तस्मान्न इह मुञ्चत विश्वेदेवाः सजोषसः॥ २॥ ऋतेन द्यावापृथिवी ऋतेन त्वं सरस्वति। कृतान्नः पाह्येनसो यत्किञ्चानृतमूदिम॥ ३॥ इन्द्राग्नी मित्रावरुणौ सोमो धाता बृहस्पतिः। ते नो मुञ्चन्त्वेनसो यत्किञ्चानृतमूदिम॥ ४॥ सजातशंसादुत जामिशंसाज्ज्यायसः शंसादुत वा कनीयसः। अनाधृष्टं देवकृतं

CC-0 Pulwama Collection. Digitized by eGangotri

यदेनस्तस्मात्त्वमस्माज्जातवेदो मुमुग्धि ॥ ५ ॥ यदन्त
रिक्षं पृथिवीमुत द्यां यत्पितरं मातरं वा जिहिंसिम ।
अग्निर्नस्तस्मादेनसो गार्हपत्यः प्रमुञ्चतु चकृम यानि
दुष्कृता ॥ ६ ॥ येन त्रितो अर्णवान्निर्बभूव येन
सूर्यस्तमसो निर्मुमोच । येनेन्द्रो विश्वा अजहादरा-
तींस्तेनाहं ज्योतिषां ज्योतिरानशान आक्षि ॥ ७ ॥
यत्कुसीदमप्रतीतं मयीह येन यमस्य मिथुना चरा-
मि । एतत्तदग्ने अनृणो भवामि जीवन्नेव प्रति तत्ते
दधामि ॥ ८ ॥ यददीव्यन्नृणमहं बभूवा दित्स-
न्वासञ्जगरज्जनेभ्यः । अग्निर्मा तस्मादिन्द्रश्च संवि-
दानौ प्रमुञ्चताम् ॥ ९ ॥ यद्धस्ताभ्यां चकर कि-
ल्विषाण्यक्षाणां वग्नुमुपजिघ्रमाणः । उग्रपश्या च
राष्ट्रभृच्च तान्यप्सरस अनुदत्तामृणानि ॥ १० ॥
उग्रंपश्ये राष्ट्रभृत्किल्विषाणि यदक्षवृत्तमनुदत्तमेत-

CC-0 Pulwama Collection. Digitized by eGangotri

जनयन्देव एकः ॥" "यो विश्वचक्षुरुत" इति विश्वचक्षुर्वै देवानां भवति, "विश्वतो मुख" इति विश्वमुखां दर्शयति, "विश्वतो हस्त" इति विश्वहस्त उत्तमा भवति, "उत विश्वतस्पात्" इति विश्वतस्पाद्धार- "सम्बाहुभ्यामिति" सर्वबाहुर्वै, नमते नमस्कुर्याः कुर्वन्ते, "संयजत्रैरिति" सर्वस्य जित्यै, "द्यावापृथिवी" इति द्यावापृथिव्योर्धारयते, "जनयन्देव एक" इति जनमिति जनानां जनपतेर्जन्तूनामात्मा वै सर्वान्ध्यायन्ते देव एको भवति स देवः सर्वेभ्यो रक्षांसि भवति य एवं वेद ॥ इति यो विश्वब्राह्मणम् ॥

प्रातःकाले कुमारी कुमुदकलिकया जप्यमालां जपन्ती मध्याह्ने प्रौढरूपा विकसितवदना चारुनेत्रा विशाला । सन्ध्यायां वृद्धरूपा गलितकुचयुगे मुण्डमालां वहन्ती सा देवी दिव्यदेहा हरिहरनमिता पातु

CC-0 Pulwama Collection. Digitized by eGangotri

नो ह्यादिमुद्रा ॥ ॐआ ब्रह्मन्ब्राह्मणो ब्रह्मवर्चस्वी जायतामस्मिन्राष्ट्रे राजन्य एषव्यः शूरो महारथो जायतां दोग्ध्री धेनुर्वोढाऽनड्वानाऽऽशुः सप्तिर्जिष्णू रथेष्ठाः पुरन्धिर्योषा सभेयो युवाऽस्य यजमानस्य वीरो जायतां निकामे निकामे नः पर्जन्यो वर्षतु फलवत्यो न ओषधयः पच्यन्तां योगक्षेमो नः कल्पताम् ॥ "आ ब्रह्मन्ब्राह्मणो ब्रह्मवर्चस्वी जायता"मित्याह, ब्राह्मण एव ब्रह्मवर्चसं दधाति, तस्मात्पुरा ब्राह्मणो ब्रह्मवर्चस्वी जायताम्, "अस्मिन्राष्ट्रे राजन्य एषव्यः शूरो" इति इषव्योऽतिव्यते, महारथो जायतामिति राजन्य एव शौर्यं महिमानं दधाति, तस्मात्पुरा राजन्यः शूर इषव्योऽतिव्यते महारथो जज्ञे, दोग्ध्री धेनुरिति धेन्वामेव पयो दधाति, तस्मात्पुरा धेनुर्दोग्ध्री जज्ञे, वोढाऽनु-
CC-0 Pulwama Collection. Digitized by eGangotri

ड्वानिति अनुडुह्येव बलं दधाति, तस्मात्पुराऽनुड्वान्वोढा जज्ञे, आशुः सप्तिरिति अश्व एव बलं दधाति, तस्मात्पुराऽऽशुरश्वोऽजायत, "पुरन्धिर्योषेति" योषित्येव ज्योतिरिव रूपं दधाति, तस्माद्रूपिणी ज्योतिः प्रिया भावुका, "जिष्णू रथेष्ठा"इति राजन्य एव जैत्रं महिमानं दधाति, तस्मात्पुरा राजन्यो जिष्णुर्जज्ञे, "सभेयो"युवेति एष वै सभेयो युवा यः प्रथमवयसि तस्मात्प्रथमवयसि स्त्रीणां प्रियो युवा पुमान्भावुकः, "अस्य यजमानस्य वीरो जायता"मित्याह वै तत्र यजमानस्यैव प्रजायां वीर्यं दधाति, तस्मात्पुरा राजन्यस्य वीरो जज्ञे, "निकामे निकामे नः पर्जन्यो वर्षतु" इति निकामे निकामो वै तत्र पर्जन्यो वर्षति यत्रैतेन यज्ञेन यजन्ते, "फलवत्यो न ओषधयः पच्यन्ता"मिति फलवत्यो वै तत्रौषधयः पच्यन्ते यत्रैते-

CC-0 Pulwama Collection. Digitized by eGangotri

न यज्ञेन यजन्ते, योगक्षेमो नः कल्पतामिति योगक्षेमो वै तत्र कल्प्यते यत्रैतेन यज्ञेन यजन्ते, तस्माद्यत्रैतेन यज्ञेन यजन्ते क्लृप्तप्रजानां योगक्षेमो भवति य एवं वेद ॥ श्रीमहागायत्र्यै स्वाहा, सावित्र्यै स्वाहा, सरस्वत्यै स्वाहा ॥ अनेन मन्त्रहोमेन आत्मनो० श्रीमहागायत्रीदेवी सन्तोषणार्थं महागायत्री सावित्री सरस्वती सव्याहृतिः प्रीयतां प्रीताऽस्तु ॥

॥ अथ कूष्माण्डार्षम् ॥

ब्रह्मा स्वयम्भूर्लिङ्गोक्ता देवताः समिधादानं पाप्मापहं च यद्देवा देवहेळनमित्यष्टौ आद्याश्चतस्रोऽनुष्टुभः, पञ्चम्यष्टम्यौ त्रिष्टुभौ षट्सप्तम्यौ जगत्यौ ॥ यददीव्यन्निति सप्तोनाष्टौ त्रिष्टुप् महान्त्या प्रस्तारपङ्क्तिः, षष्ठी गायत्री दशम्यनुष्टुबुपान्त्याद्व्युष्णिक् ॥ आयुस्ते विश्वतो दधादिति सप्तोनाद्या द्विपद्

CC-0 Pulwama Collection. Digitized by eGangotri

सप्तम्यास्त्रिष्टुप् तृतीयाद्यास्तिस्रो गायत्रं पञ्चाष्टम्याद्यानुष्टुप् शक्वर्यन्तम् । सौत्रामण्या निचाकुणस्य । यद्देवा देवहेळनमिति तिसृभिरनुष्टुप् । भद्रं कर्णेभिरिति चतसृभिः शिशुशैशवयोः । आद्यान्ते त्रिष्टुप् द्वितीया विराट् तृतीया जगती । "शेषः कोकिलस्य राजपुत्रस्य राज्येप्सोः । पुनन्तु मा पितर इति" नवभिः चतुर्थी चाद्या द्वेऽनुष्टुभौ त्रिष्टुबन्त्या वैश्वदेवी, शेषं गायत्रं तृतीया पञ्चम्याद्याश्चतस्रो गायत्रं । "ब्रह्मणो यश्चानिरुक्तम्" पुनर्मामैत्विन्द्रियमिति तिसृभिरनुष्टुबष्टरूपा प्रस्तारपङ्क्तिः अपां यो द्रवण इति चतस्रः प्रजापतेस्त्रिष्टुप् । "हिरण्यवर्णा" इति तिसृभिः । कश्यपस्य त्रिष्टुप् जगत्यस्य । अग्ने त्वं पारयेतित्रयोदश स्वयम्भूर्ब्रह्मा च लिङ्गोक्ताद्यास्तिस्रः षष्ठ्यादि तिस्रास्त्रिष्टुबेकादशी

CC-0 Pulwama Collection. Digitized by eGangotri

तिष्ठति, तस्माद्गायत्री चतुर्विंशत्यक्षरा भवति, सर्वस्याप्त्यै सर्वस्यावरुद्ध्यै न ब्रह्मचारिणं शतं सहस्रमयुतं च प्रजावान्पशुमान्रयिमानायुष्मन्तं करोति, तस्माद्गायत्री आयुरिव परमं कामं गायत्र्याऽभितिष्ठति य एवं वेद ॥

इति तत्सवितुर्ब्राह्मणम् ॥ चतुर्भुजामऽर्कसहस्रकोटिभां त्रिलोचनां हारकिरीटशोभिताम्। चतुर्मुखस्याङ्कगतां महोज्ज्वलां वेदेश्वरीं पञ्चमुखीं नमाम्यऽहम् ॥ "ॐ ओजोऽसि सहोऽसि बलमसि भ्राजोऽसि देवानान्धामनामासि विश्वमसि विश्वायुः सर्वमसि सर्वायुरभिभूः" ॥ ॐदेवाश्चवा असुराश्च संय्यत्ता आसस्तान्गायत्र्यऽन्तराऽतिष्ठदोजो वै वीर्यमन्नाद्यं परिगृह्य संवत्सरो वा वैनान्सोऽन्तरातिष्ठच्चतुर्विंशति गायत्र्या अक्षराणि, चतुर्विंशति संवत्सरस्यार्धमासा-

CC-0 Pulwama Collection. Digitized by eGangotri

स्ते विदुर्यतरान्वा इयमुपवर्त्स्यतिं, त इदं भविष्यंति तं व्यह्वयंस्तदाभीत्यऽसुरा आह्वयन्विश्वकर्मन्निति देवा अस्मान्यतरांश्च नोपवर्तत, ते देवा एतद्यजुरपश्यन् "ओजोसि सहोसि बलमसि भ्राजोसि देवानान्धामनामासि विश्वमसि विश्वायुः सर्वमसि सर्वायुरभिभूरिति" स देवानुपावर्तत, ततो देवा अभवन् परासुरा अभवन्नाग्नेय्यमऽष्टाकपालं निर्वपेद्भ्रातृव्यवान्वा स्पर्धमानो वा तमाऽसाद्यैतैर्यजुरभिमृशेदोजो वै वीर्यं संवत्सर ओज एव वीर्यं भ्रातृव्यस्य वृंक्ते, सनिर्वीर्यः पराभवति, सैषा गायत्री नामेष्टिरथो आहुः क्षेत्रस्य संवर्ग इति ॥ इति ओजोसिब्राह्मणम् ॥ ब्राह्मी हंसरथस्थिता मुखसरोजोद्यच्चतुर्वाङ्मयी मुद्रापुस्तककुण्डलाक्षवलयाधारा चतुर्भिर्भुजैः । रक्ता रक्तविभूषणा प्रहसिता रक्ताम्ब-

CC-0 Pulwama Collection. Digitized by eGangotri

रालङ्कृता कौमारी मम जीविताावधि सदा भूयादघध्वंसिनी ॥ "अश्वमेधे घोराणामार्षम् । द्रष्ट्रेनम उपद्रष्ट्रे नमोऽनुद्रष्ट्रे नमः ख्यात्रेनम उपख्यात्रे नमोऽनुख्यात्रे नमः श्रृण्वते नम उपश्रृण्वते नमः सते नमोऽसते नमो जाताय नमो जनिष्यमानाय नमो भूताय नमो भविष्यते नमश्चक्षुषे नमः श्रोत्राय नमो मनसे नमो वाचे नमो ब्रह्मणे नमः शान्ताय नमस्तपसे नमः ॥ भूतं भव्यं भविष्यद्वषट्स्वाहा नम, ऋक्सामयजुर्वषट्स्वाहा नमो गायत्री त्रिष्टुब्जगती वषट्स्वाहा नमः पृथिव्यन्तरिक्षं द्यौर्वषट्स्वाहा नमोऽन्नं कृषिर्वृष्टिर्वषट्स्वाहा नमः पिता पुत्रः पौत्रो वषट्स्वाहा नमः प्राणो व्यानोऽपानो वषट्स्वाहा नमो भूर्भुवःस्वर्वषट्स्वाहा नमः" ॥ "द्रष्ट्रेनम उपद्रष्ट्रेनमोऽनुद्रष्ट्रेनम" इत्यग्निर्वै

CC-0 Pulwama Collection. Digitized by eGangotri

द्रष्टा ब्रह्मण उपद्रष्टा वायुरनुद्रष्टा तेभ्य एव नमस्करोति, "ख्यात्रेनम उपख्यात्रेनमोऽनुख्यात्रे नम" इति संवत्सरो वै ख्याताऽदित्य उपख्याता चन्द्रमाऽनुख्याता तेभ्य एव नमस्करोति, "शृण्वतेनम उपशृण्वतेनम" इति द्यावापृथिवीभ्यामेव नमस्करोति, "सतेनमोऽसतेनम" इति सदसद्भ्यामेव नमस्करोति, "जातायनमो जनिष्यमाणाय नम" इति यज्ञाय वै दक्षिणायै च नमस्करोति, "भूतायनमो भविष्यतेनम" इति ऋक्सामभ्यामेव नमस्करोति, "चक्षुषेनमः श्रोत्रायनम" इति यथा यजुरेकविंशतिकृत्वो नमस्करोति, पञ्चर्तवो द्वादश मासास्त्रय इमे लोका असावादित्य एकविंश एष स्वर्गो लोकः स्वर्गस्य लोकस्य समष्ट्यै सर्वा वा एतर्ह्येतास्मिन्देवता आशंसन्ती सामाभिव्याहरिष्यन्तीत्यग्निः सर्वा

CC-0 Pulwama Collection. Digitized by eGangotri

देवता असावादित्योऽग्निर्यदेतैर्नमस्कारैरादित्यमुपति-
ष्ठते, सर्वाभिरेवैनं देवताभिः समर्धयत्यश्वं वद्कारं
ये ते पन्थानः सविता पूर्व्यास इति वितता अन्त-
रिक्षे तेभिर्नो अद्य पथिभिः सुगेभिरक्षा च नो अ-
धि च ब्रूहि देव इति स्वर्गस्य लोकस्य समष्ट्यै
नमोऽग्नये पृथिवीक्षित इत्यग्निनाऽयतनेषु निदधा-
तीमानेवैनांल्लोकानुगमयति य एवं वेद ॥ इति द्र-
ष्टृब्राह्मणम् ॥ ओं यस्या भूः पाददेशे वसति तदु-
परि खं गुदे स्वर्गलोको नाभौ मध्ये महाख्यो जन
उरसि गतः कण्ठगामी तपश्च । सत्यं मूर्ध्नीश्वरा-
ख्या त्रिगुणविरहिता निष्कला स्वस्वरूपा सा देवी
विश्वरूपा वितरतु विभवं वेदमूला पराख्या ॥ "यो
विश्वचक्षुरुत विश्वतो मुखो विश्वतो हस्त उत वि-
श्वतस्पात् । सम्बाहुभ्यां नमते संयजत्रैर्द्यावापृथिवी

CC-0 Pulwama Collection. Digitized by eGangotri

सहिरण्यं० ॥ ततोऽक्षय्यम् । अद्यतावत्० कान्तासहि-
तमाधवक्रियासहितगोविन्दप्रीत्यर्थं पितुः विष्णोः दी-
पश्राद्धनिमित्ते दत्तमन्नमक्षयमस्तु स्वधा नमः । यदम-
न्नमक्षयमुपतिष्ठतु स्वधा नमः ॥ ओंभूः पुरुषमिति
ब्राह्मणपृच्छां विसर्जयेत् । अद्य तावत्० पितुर्विष्णो-
स्तिलोदकं दत्त्वा अपसव्येन । नित्यकुम्भं अद्य तावत्०
पितुः विष्णोः दीपश्राद्धनिमिते कान्तासहितमाधवक्रि-
यासहितगोविन्द० सोदकुम्भान्नदानसहिते नित्यकुम्भे
एतत्ते तिलोदकमेतत्ते उदकतर्पणम् ॥ सव्येन । गवां
ग्रासादि । कलशाच्छिद्रम् । पात्राणि चालयेत् ।
आचम्य उदकलशं । मन्त्रार्थाः० । अद्य तावत्०
पितुर्विष्णोस्तस्य परलोके पाददाहादिपीडानिवार-
णार्थं तृणासनं तृणपादुकं काष्टपादुकमग्निभाण्डं
ददानि ३ ॥ अनन्तशाखकल्पाय० ॥ सन्ध्याकाले

CC-0 Pulwama Collection. Digitized by eGangotri

प्रज्वलुद्दीपाष्टकस्य स्थापनाश्रयाः ॥ "[1]गो[2]देवशू-
न्या[3]गारेषु [4]नद्यां [5]तीर्थेऽध्वनि[6] स्मृता । [7]गोवि-
ट्राशौ चतु[8]मार्गो ज्वलद्दीपस्थितिः निशि ॥

सामग्री । शालिचूर्णं अक्षोटाः १५ दीपाः २० तृणासनं काष्टपादिका अपूपाः २० मीनमांसं तृणआ-रि २० स्वर्वणदीपः रजतवर्तिका यज्ञोपवीत ६ तिला मधु दधि क्षीरं वस्त्रम् तिलतैलम् अग्निभाण्डं डण्डं काष्टपीठिका विष्णुप्रतिमा तस्या उपकरणानि च ॥

गोगृहे, देवालये, शून्यालये, नद्यां, तीर्थे, मार्गे, गोमयराशौ, चतुष्पथे च स्थाप्या दीपाः ॥

इति दीपश्राद्धविधिः ॥

॥ अथ गायत्रीब्राह्मणम् ॥

अस्य श्रीमहागायत्रीब्राह्मणमन्त्रस्य प्रजापतेर्भू-लोकस्यानुष्टुप् ककुभापृथिवी ऋषिः, विराट्छन्दः,

CC-0 Pulwama Collection. Digitized by eGangotri

ब्रह्मा देवता, प्रणवऋषिः, गायत्रं छन्दः, परमाग्नि-वायुर्देवता, व्याहृतीनां जमदग्निभारद्वाजभृगव ऋषयः, अग्निवायुसूर्या देवताः, आत्मनो वाङ्मनः० सूर्याद्यावाहनपूर्वकं श्रीमहागायत्रीप्रीत्यर्थं होमे पाठे वा विनियोगः ॥ ओंकारो यस्य मूलं० । मुक्तावि० । आयातु वरदादेवी० । ३ ॥ "ओंअग्नयेस्वाहा, ओंभूःस्वाहा, ओंभुवःस्वाहा, ओंस्वःस्वाहा, ओंभूर्भुवःस्वःस्वाहा, ओंभूःस्वाहा, ओंभुवःस्वाहा, ओंस्वःस्वाहा, ओंमहःस्वाहा, ओंजनःस्वाहा, ओंतपःस्वाहा, ओंसत्यंस्वाहा" ॥ "ओंअग्नयेस्वाहेत्यग्निः सर्वादेवताः सौख्यं करोत्यसौ वा अग्निः प्रीणाति, "ओंभूःस्वाहेति" भूमिं वै उर्वन्तरिक्षमुर्वादींस्तेन प्रीणाति, "ओंभुवःस्वाहेति" भुवनानां पतय इत्युद्भुतं तेन प्रीणाति, "ओंस्वःस्वाहेति" आप-एष इमं

CC-0 Pulwama Collection. Digitized by eGangotri

लोकं जयतु तेन सोमपः प्रीणाति, "ओंभूर्भुवःस्वःस्वाहेति" अग्निं सूर्यं ज्योतिष्मन्तं करोति यजमानो वृद्ध्यते। "ओंभूःस्वाहेति" भूमिर्वै द्विपदाश्चैव चतुष्पदस्तेन वृद्ध्यंते, "ओंभुवःस्वाहेति" अन्तरिक्षं वै वायुर्देवता तेन वायून्वै प्रीणाति, "ओंस्वःस्वाहेति" वाचो मे प्राणापानौ सम्राट् चक्षुषस्तेन प्रीणाति, "ओंमहःस्वाहेति" महामनसां महालोकाञ्जयति होतारं तेन प्रीणाति, "ओंजनःस्वाहेति" जनानां जनपतिर्जन्तूनामिमं लोकं तेन प्रीणाति, "ओंतपःस्वाहेति" तपो वाऽसावादित्यो द्वादशमासाः संवत्सरं तेन प्रीणाति, "ओंसत्यंस्वाहेति" सत्यमिति वरुणचन्द्रमसौ नक्षत्राणि सप्तार्णवांस्तेन प्रीणाति, अथोत्तरस्मै सर्वा देवतास्तेन प्रीणाति, तेन सौख्यं करोति, यजमानो वृद्ध्यते, सन्तत्यै प्रजावत्या भवति, अवि-

CC-0 Pulwama Collection. Digitized by eGangotri

च्छिन्नं प्रदीयते य एवं वेद ॥ इति व्याहृतिब्राह्मणम् ॥ मध्याह्ने वृषवाहना त्रिनयना शुक्लाम्बरालेपना खट्वाङ्गं त्रिशिखं कपालडमरू दोर्भिर्वहन्ती सदा । शुक्ला शुक्लविभूषणा नरशिरोमालाभिरावेष्टिता भूयाद्यौवनवत्यसौ त्रिजगतां सर्वार्तिविद्राविणी ॥ ओंतत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् ३ ॥ "ओंतत्सवितुरिति" तदादित्यः सविता प्रसविता प्रजया पशुषु प्रतितिष्ठति, "वरेण्य"मित्यऽग्निर्वै वरिवः कृणोति, "भर्गेति" रश्मयः शतं सहस्रमऽयुतं च प्रतनोति, "देवस्य" द्योतनपरमं कामस्य, "धीमहीति" धीमान् विश्वस्याप्नोति, "धियोयोन" इति अहोरात्रिः सन्ध्यामुपयन्ति, "प्रचोदयादिति" प्रजापतिर्वा प्रजामुपसृजति, पशुषु प्रति-

CC-0 Pulwama Collection. Digitized by eGangotri

लोकनाथ नमस्तेस्तु वीरभद्र नमो नमः ॥ नमः कृष्णाय रामाय नमश्चक्रायुधाय च । नमः कमलनेत्राय नमः कमलमालिने ॥ अथ पूर्वे । यत्सन्निधानेन विना जगत्स्यादसत्खपुष्पेण समं समग्रम् । तद्वापि न स्यात्किमुतान्ध्यरूपं तं स्वप्रकाशं प्रनतोस्मि देवम् ॥ 'दक्षिणे' जले स्थले वा दिवि भूतले वा बुधेऽबुधे वाप्यजडे जडे वा। सर्वत्र यत्स्यादवभासमानं समप्रभं तं प्रनतोस्मि देवम् ॥ 'पश्चिमे' विकारिषु स्थावरजङ्गमेषु भावेषु दृश्येषु न दृश्यमानम् । विश्वान्तरालस्थमरालवृत्तमनन्तमाद्यं प्रनतोस्मि देवम् ॥ 'उत्तरे' शान्तं सुसौम्यं त्रिपुटीबहिस्थं द्रष्टारमाद्यं पुरुषं पुराणम् । सर्वस्य दातारमनन्तवीर्यमात्मानमीशं प्रणतोस्मि देवम् ॥ 'मध्ये' सहस्रशीर्षाननबाहुपादं मोहापहं दीप्ततया समन्तात्।
CC-0 Pulwama Collection. Digitized by eGangotri

स्थितं जगत्पद्मसुकर्णिकायां ज्वालायुतं तं प्रणतो-स्मि देवम् ॥ पुनः पूर्वे । मोहान्धकारप्रशमं प्रदीपं नतोऽस्मि विष्णुं त्रिदिवेशतुल्यम् । शचीयुतो वज्र-धरो महेन्द्राकारेण यः पाति पुरन्दराशाम् ॥ 'आग्नेये' मोहान्धकारप्रशमं प्रदीपं नतोऽस्मि विष्णुं त्रिदिवेशरूपम् । तेजःपतिर्वह्निदिशं सदा यः स्वा-हापतिः याति हुताशरूपः ॥ 'दक्षिणे' घोरान्ध-कारप्रशमं प्रदीपं नतोऽस्मि विष्णुं च यमस्वरूपम् । प्रेताधिपो दण्डधरः स्वशक्त्या पात्यन्तकात्मा सहि दक्षिणाशाम् ॥ 'नैर्ऋते' घोरान्धकारप्रशमं प्रदीपं नतोऽस्मि विष्णुं निर्ऋतिस्वरूपम् । रक्षोधिपः खड्ग-धरः स्वशक्त्या पात्यर्चितो दक्षिणपश्चिमां यः ॥ 'पश्चिमे' घोरान्धकारप्रशमं प्रदीपं नतोऽस्मि विष्णुं वरुणस्वरूपम् । जलाधिपः पाशयुतः प्रतीचीं यः

CC-0 Pulwama Collection. Digitized by eGangotri

पाति वारुण्यधिपो दयालुः ॥ 'वायवे' घोरान्धकारप्रशमं प्रदीपं नतोस्मि विष्णुं श्वसनस्वरूपम्। प्राणाधिपः वायुदिशं करस्थध्वजोऽनिशं पाति सदागतिर्यः ॥ 'उत्तरे' घोरान्धकारप्रशमं प्रदीपं नतोस्मि विष्णुं धनदस्वरूपम्। गदायुधो यक्षपतिर्दिशं यः पात्युत्तरामुत्पलनेत्रधारी ॥ 'ईशाने' घोरान्धकारप्रशमं प्रदीपं नतोऽस्मि विष्णुं गिरिशस्वरूपम्। सर्वाधिपः शूलधरो दिशं यः पूर्वोत्तरां पाति गणैः समर्च्यः॥ पुनः पूर्वे। सीतायुतं नौमि सलक्ष्मणं त्वां तेजोमयं राघवमर्च्यमैन्द्याम्। यद्दुष्कृतं स्यान्नवरन्ध्रजातं तत्सर्वमान्ध्यं क्षपयाशु विष्णो ॥ 'दक्षिणे' दाक्षायणीयुक्तमहं प्रपद्ये त्वां रुद्रमर्काग्निशशांकनेत्रम्। यद्दुष्कृतं० ॥ 'पश्चिमे' छायायुतं नौमि दिवाकरं त्वामर्च्यं प्रतीच्यां त्रिज-

CC-0 Pulwama Collection. Digitized by eGangotri

गत्प्रकाशम् । यद्दुष्कृतं स्यान्नवरन्ध्रजातं तत्सर्वमान्ध्यं क्षपयाशु विष्णो 'उत्तरे' त्वां रोहिणीयुक्तमहं प्रपद्ये प्रपूजितं चन्द्रमथोत्तरस्याम् । यद्दुष्कृतं स्यान्नवरन्ध्रजातं तत्सर्वमान्ध्यं क्षपयाशु विष्णो ॥ 'मध्ये' सूर्यो न यत्राग्निविधू भवेतां मोहान्ध्यमार्गे गतिराश्रयो वा । छेद्यं न यत्सर्वमणिप्रकाशैस्तदन्तरान्ध्यं कुरु कृष्ण दूरम् ॥ त्वमेव पापहा देवो भुक्तिदो मुक्तिदा सदा । इह लोके परत्रापि रक्षको भव केशव ॥ क्षमस्व मम दीप त्वं शम्भोर्नेत्रसमुद्भव । तावच्छिवपुरीं गच्छ यावत्प्रज्वाल्यते पुनः ॥ क्षमेतां क्षेत्रपालौ वां नानासिद्धिप्रदायकौ । नानालङ्कारसंयुक्तौ गच्छेतां स्वगृहं प्रति ॥ आह्वानं० । नमो ब्रह्मणे० । ततो दीपकलशौ साक्षौ पूर्वादितो यथाक्रमं ब्राह्मणा प्रति-

CC-0 Pulwama Collection. Digitized by eGangotri

पादयेत् ॥ सावित्राणि० अद्य तावत् कान्तासहित-माधवक्रियासहितगोविन्द प्रीत्यर्थं पितुर्विष्णोस्त-स्य परलोके प्रकाशवृद्ध्यर्थं मोहान्धकारनिवारणा-र्थं 'पूर्वे' सीतायुतराघवसलक्ष्मणदीपं सकलशं स-हिरण्यं सवाससं सान्नं विष्णुरूपाय ब्राह्मणाय द-दानि ३ प्रतिगृह्णामि १। एवं 'दक्षिणे' दाक्षायणी-युतरुद्रकलशदीपं० २। 'पश्चिमे' छायायुतदिवाक-रकलशदीपं ३। 'उत्तरे' रोहिणीयुतचन्द्रमःकल-शदीपं ४। आग्नेये इन्द्राग्निकलशदीपं ५। 'नैर्ऋते' यमनैर्ऋतिकलशदीपं ६। 'वायवे' पाशिमरुत्कल-शदीपं ७। 'ईशाने' धनदशङ्करकलशदीपं ८। 'मध्ये कर्णिकायां' अनन्तशिरोमुखज्वालायुतदीपरा-जकलशदीपयुतविष्णुप्रतिमां ९ ॥ नित्यकुम्भम् ॥ कलशं शुभदं० अद्य तावत्० । इमं नित्यकुम्भं

CC-0 Pulwama Collection. Digitized by eGangotri

ऋयुक्तम्। ज्वालायुतं सकलमध्यविराजमानं घोरान्धकाο ॥ सहस्रशीर्षाः पुο। क्षेत्रपालेषु। आवाहयामि क्षेत्रेशौ तेजचण्डौ महाधियौ। शूरौ सर्वगतौ सिद्धौ प्रेतस्यास्य विमुक्तये॥ क्षेत्रस्य पतिο भगवन्पुण्डरीकाक्षο। दक्षिणान्तं। वैश्वदेवादि नित्यकर्म कृत्वा, राघवादीनां मीनमांसयुतापूपिकावलिं। राघवाद्या महादीपाः परलोके प्रकाशदाः। अपूपान् मीनसंयुक्तान् गृह्णीध्वं प्रेतमुक्तये॥ ओं तत्सद्ब्रह्मο पितुर्विष्णोर्दीपश्राद्धे कान्तासहितο (पूर्वे) सीतायुताय राघवाय सलक्ष्मणाय (दक्षिणे) दाक्षायणीयुताय रुद्राय (पश्चिमे) छायायुताय दिवाकराय (उत्तरे) रोहिणीयुताय चन्द्रमसे (आग्नेये) इन्द्राग्निभ्यां (नैर्ऋते) यमनैर्ऋतिभ्यां [वायवे] पाशिमरुद्भ्यां [ईशाने] धनदशङ्कराभ्यां (मध्ये) अनन्तबाहुचरणशिरोमुखाय विश्वरूपा-

CC-0 Pulwama Collection. Digitized by eGangotri

य दीपराजाय । मीनमांसयुताऽपूपिकाबलिं समर्पयामि नमः इति दत्वा ॥ अष्टौ वा चतुरो ब्राह्मणानुदङ्मुखानुपविश्य स्वपितृयुतान्देवांश्च स्मृत्वा श्राद्धमारभेत ॥ आचम्य ॐ भूःपुरुषमावाहयामि नमः ३ नमोऽस्त्वनन्ताय० सर्वा विष्णुगायत्रीः । स्वप्रकाशाय विद्महे ज्योतीरूपाय धीमहि । तन्नः प्रकाशः प्रचोदयात् ३ अद्य तावत् कान्तासहितमाधवक्रियासहितगोविन्दप्रीत्यर्थं पितुः विष्णोः परलोके प्रकाशवृद्ध्यर्थं मोहान्धकारनिवृत्यर्थं दीपश्राद्धे ब्राह्मणपूजनमर्चामहं करिष्ये० तिलान्विकीर्य । पितुः विष्णोरिदमासनं नमः । पित्रे विष्णवे त्वां पूजयामि । पितरं विष्णुमावाहयिष्यामि । यवान्विकीर्य। शन्नोदेवी । लाजाश्च० पित्रे विष्णवे पाद्यं नमः । आचम्य । शन्नोदेवी । आपः क्षीरं । पितः विष्णो

CC-0 Pulwama Collection. Digitized by eGangotri

दीपश्राद्धे कान्तासहित० इदं ते अर्घ्यं नमः । पित्रे विष्णवे समालभनं गन्धो नमः । आचम्य । पित्रे विष्णवे अर्घपुष्पदीपधूपवासो नमः । पितुर्विष्णोरर्घ्यदानाद्यर्च० । इदमन्नमिदं देवेभ्यः भृतमभिघार्य । अन्नाल्याग्रतो मत्त्रणमवदधाति । श्रियै गन्धादि । प्रणवं मनसा ध्यात्वा । ओंओं चीरं घृतमासिच्य । पित्रे विष्णवे अन्नं नमः २ अन्नं मधु २ पृथिवीते० । पृथिव्यै नमः विष्णवे नमः विष्णो इदं रत्तस्व । पित्रे विष्णवे यथोपस्थितं० । शन्नोदेवी । पित्रे विष्णवे अपोशानं नमः । अमृतेन सह भोक्तव्यमसुरा निवर्तन्तां विष्णवादयः कारणा आगच्छन्तु ॥ दीपाग्रे पूर्वाग्रान्दर्भान् आस्तीर्य । पित्रे विष्णवे दीपश्राद्धे कान्तास० भूपृष्ठे अवनेजनं नमः उशन्तस्त्वा हवामहे । तिलास्तोयं पाथेयं न्नित्यानं पिण्ड-

CC-0 Pulwama Collection. Digitized by eGangotri

स्थाने परिकल्प्य। अपसव्येन। देवताभ्यः० अद्यतावत् पितः विष्णो एतत्ते पाथेयं नित्यान्नमित्यभिमंत्रयेत्। सव्येन पित्रे विष्णवे वासांसि नमः। गन्धो नमः। अर्घो नमः पुष्पं नमः। भक्ष्यभोज्य। तिलमधुमिश्रं। पित्रे विष्णवे हिमपानं नमः रजतं २। आचम्य। वसन्ताय नमः। चण्डै महालक्ष्म्यै अम्बामातृकाभ्यः ऊँनमो नैवेद्यम्। इति रक्तगुग्गुलयुतमन्नमभिमंत्र्य चण्डाल्यै देयम्। मा मे क्षेष्ठाः। नैवेद्यम्। सर्वमन्नमुपादाय दीपश्राद्धं कच्चित्सम्पन्नं भोः सुसम्पन्नम् तृप्यंतु भवन्तः तृप्ता स्मः विष्णुस्तृप्यतु॥ शेषमन्नमिष्टैर्मित्रपुत्रभृत्यैः सार्धं पश्चाद्भुञ्जीत वाग्यतः॥ आचम्य। पित्रे आचमनीयं नमः। शन्नोदेवी। दक्षिणायै। अक्षय्यं विना। क्षेत्रेशबलिः। ततः प्रतिमाया दीपराजानां च पृच्छां सम्पाद्य। ऊँभूःपुरु-

CC-0 Pulwama Collection. Digitized by eGangotri

पं वि० ३ नमोस्त्वनन्ताय ३ वासुदेवाय० ३ जितन्ते०
३ नमः कारण० ३ विश्वरूपाय० ३ नरसिंहाय० स्वप्र-
काशाय० ३ अद्य तावत्० वासुदेवस्य ८ 'पूर्वे' सीता-
युतस्य राघवस्य सलक्ष्मणस्य 'दक्षिणे' दाक्षायणीयु-
तस्य रुद्रस्य 'पश्चिमे' च्छायायुतस्य दिवाकरस्य 'उत्तरे'
रोहिणीयुतस्य चन्द्रमसः इन्द्राग्न्योः यमनैर्ऋतयोः
पाशिमरुतोः धनदशङ्करयोः अनन्तबाहुचरणशिरो-
मुखस्य ज्वालायुतस्य दीपराजस्य तेजस्य चण्डस्य
आत्मनो० पितुः विष्णोः तस्य परलोके वैकुण्ठपदवी-
प्राप्त्यर्थं कान्तासहितमाधवक्रियासहितगोविन्दप्रीत्यर्थं
विष्णुप्रतिमासहित-दीपराजपूजनमच्छिद्रं । यवोदकं
नमः आपन्नोस्मि० ध्येयः सदा० । प्रसीद भगवन्विष्णो
प्रसीद पुरुषोत्तम । प्रसीद देवदेवेश प्रसीद गरुड-
ध्वज ॥ नमः कमलनाभाय नमः कैटभसूदन ।

CC-0 Pulwama Collection. Digitized by eGangotri

वासुदेवस्य ८ (पूर्वे) सीतायुतस्य राघवस्य सलक्ष्मणस्य। (दक्षिण) दाक्षायणीयुतस्य रुद्रस्य। (पश्चिमे) च्छायायुतस्य दिवाकरस्य। (उत्तरे) रोहिणीयुतस्य चन्द्रमसः। इन्द्राग्न्योः यमनैर्ऋत्योः पाशिमरुतोः धनदशङ्करयोः अनन्तवाहुचरणशिरोमुखस्य ज्वालायुतस्य दीपराजस्य तेजस्य चण्डस्य आत्मनो० कान्तासहितमाधव क्रियासहितगोविन्द प्रीत्यर्थं पितुर्विष्णोः सान्नदीपश्राद्धनिमित्तं तस्य परलोके प्रकाशवृद्ध्यर्थं० विष्णुपूजनं कलशपूजनं दीपराजपूजनमर्चामहं करिष्ये। पुरुष एव ध्रुवा द्यौरित्यासनम्॥ महागणपतये० वासुदेवाय० सीतायुताय राघवाय सलक्ष्मणाय। दाक्षायणीयुताय रुद्राय। च्छायायुताय दिवाकराय। रोहिणीयुताय चन्द्रमसे। इन्द्राग्निभ्यां यमनैर्ऋति-

CC-0 Pulwama Collection. Digitized by eGangotri

भ्यां पाशिमरुद्भ्यां धनदशङ्कराभ्यां अनन्तबाहुचरणशिरोमुखाय ज्वालायुताय दीपराजाय तेजाय चण्डाय युष्मान्वः पूजयामि ॐपूजय । महागणपतिं कुमारं श्रियं सरस्वतिं० । वासुदेवं० ८ । सीतायुतं राघवं सलक्ष्मणं दाक्षायणीयुतं रुद्रं च्छायायुतं दिवाकरं रोहिणीयुतं चन्द्रमसं इन्द्राग्नी यमनैर्ऋती पाशिमरुतौ धनदशङ्करौ अनन्तबाहुचरणशिरोमुखं ज्वालायुतं दीपराजं तेजं चण्डमावाहयिष्यामि ॐमावाहय ॥ यवान्विकीर्य । आवाहनं विष्णोः प्रतिमायाः । आवाहयाम्यमरवृन्दनुताङ्घ्रि० अनादिनिधनं देवं सकिरीटकमण्डलुम् । शङ्खचक्रगदापद्मवनमालाविभूषितम् । चतुर्भुजं कृष्णवर्णं धात्रीचरणमध्यगम् । देवमावाहये विष्णुं निष्कृत्यर्थं पितॄन्सदा ॥ दीपकलशेषु तत्रादौ (पूर्वे) आवाहया-

CC-0 Pulwama Collection. Digitized by eGangotri

मि विबुधार्चितपादपीठं श्रीराघवं रघुवरं कमनीय-रूपम् । सीतायुतं सकललोकनुतं वरेण्यं घोरान्ध-कारशमनाय प्रकाशरूपम् ॥ आवाहयाम्यहं देवं राघवं सीतया युतम् । सलक्ष्मणं चतुर्बाहुं नाना-लङ्कारभूषितम् ॥ तेजोरूपं सदाकान्तं कान्तया सहितं विभुम् । परलोकगतस्याद्य प्रेतस्य मुक्तिहे-तवे । श्यामवर्णो० ॥ प्रतद्विष्णु० । (दक्षिणे) आ-वाहयामि गणसेवितपादपीठं तेजोमयं तपनवह्निश-शाङ्कनेत्रम् । दाक्षायणीयुततनुं वृषभाधिरूढं घो-रान्धकारशमनाय प्रकाशरूपम् ॥ आवाहयाम्यहं रुद्रं दाक्षायण्या समन्वितम् । घोरमोहान्ध्यशमनं परलोके प्रकाशकम् ॥ शुक्लवर्णो० । योरुद्रो० ॥ (पश्चिमे) आवाहयामि सुरसेवितपादयुग्मं तेजोनिधिं दशशतैः किरणैरुपेतम् । छायायुतं मनुजवृन्दसुर-

CC-0 Pulwama Collection. Digitized by eGangotri

र्नमस्य घोरान्धकार० ॥ आवाहयाम्यहं देवं छायायुक्तं दिवाकरम् । मोहान्धकारशमनं परलोके प्रकाशदम् । रक्तवर्णो० ॥ आ कृष्णेन० । (उत्तरे) आवाहयामि मुनिवन्दितपादयुग्मं तारापतिममृतरूपकलानिधानम् । श्रीरोहिणीयुततनुममरेशवन्द्यं घोरान्धका० ॥ आवाहयाम्यहं चन्द्रं रोहिण्याश्लिष्टमादरात् । निशायामपि तामिस्रहास्तिनो हनने हरिम् । शुक्लवर्णो० ॥ या ते धामानि० । (आग्नेये) आवाहयामि वरदाविन्द्राग्नी दीपसंज्ञकौ । नानातेजोभिः संयुक्तौ सर्वदेवनमस्कृतौ ॥ परलोकगतस्याद्य प्रेतस्य मुक्तिदायिनौ ॥ आवाहयामि त्रिदशार्चितपादयुग्मामिन्द्रं गजाधिपगतं सुरलोकनाथम् । वह्निं च विश्वजनपापनिषूदनं तं घोरान्ध० ॥ इन्द्रापर्व० । अग्नि स० । (नैर्ऋते) आवाहयामि लोकेशौ यमनैर्ऋतिसंज्ञकौ ।

CC-0 Pulwama Collection. Digitized by eGangotri

यमनियमसंयुक्तौ दीपरूपौ मनोरमौ। परलोकग०। आवाहयामि महिषाश्रितपादपीठं शान्तं समस्तजनताहरणप्रभावम्। रक्षोधिपं च रमणीयजटाकलापं घोरान्धका०॥ यमोदा०। यन्ते दे०। (वायवे) आवाहयामि लोकेशौ वायव्यां दीपसंज्ञकौ। जलप्राणाधिपौ देवौ पाशिमारुतसंज्ञकौ। परलोक०॥ आवाहयामि वरुणं जलजन्तुपं तं श्रीवारुणीयुततनुं मकराधिरूढम्। वायुं च सर्वगतपावितविश्वरूपं घोरान्धका०॥ उदुत्तमं०। वायवा०। (ईशाने) आवाहयामि देवेशौ पूज्यौ धनदशङ्करौ। दीपरूपधरौ शान्तौ तेजोभिः परिमण्डितौ। परलोक०॥ आवाहयामि धनदं प्रमथेशभृत्यं मर्त्यासनं निधिपतिं गुह्यकादिवन्द्यम्। श्रीशङ्करं च विबुधेशनुतं वरेण्यं घोरान्धका०॥ सोमो धेनुं०। यो रुद्रो०। कर्णिकायां॥ आवाहयमि बहुपादभुजोदराढ्यं श्रीवत्समण्डिततनुं बहुव-

CC-0 Pulwama Collection. Digitized by eGangotri

ज्वालायुताय दीपराजाय अनन्तशिरोमुखाय अनन्तबहुचरणाय तेजाय चण्डाय दीपश्राद्धनिमित्ते कान्तासहितमाधवक्रियासहितगोविन्दप्रीत्यर्थं पित्रे त्रिष्णवे दीपो नमः धूपो नमः। अपसव्येन। समस्तमातापितृभ्यो दीपः स्वधा। कुम्भोवनिष्ठो। सव्येन। दीपान् प्रज्वाल्य परिकल्पयेत्। तत्रादौ पूर्वं। स्वप्रकाशो०। यत्रास्ति माता०। यस्मिल्लोके निरालोके न सूर्यो नापि चन्द्रमाः। तमहं तर्तुमिच्छामि दीपं दत्त्वा जनार्दन॥ प्रेतस्य शून्यरूपस्य यामे मार्गे प्रयासतः। तमोन्धकारसन्दोहं नाशयाशु जनार्दन॥ प्रेतस्य वायुरूपस्य यामे मार्गे यियासतः। क्षिप्रं नाशय मोहान्ध्यं भालनेत्र नमोस्तु ते॥ यामैः पाशैर्विकृष्टस्य प्रेतस्य पथि यास्यतः। ज्वालासंस्थे महालक्ष्मि तमोन्ध्यं नाशयाशु मे॥

CC-0 Pulwama Collection. Digitized by eGangotri

भगवन्देवदेवेश शङ्खचक्रगदाधर । राघवाख्यं महादीपं लक्ष्मणेन समन्वितम् । सीतया सहितमद्य प्रेतलोके हिताय वै । अर्पयामि महाबाहो तव हस्ते जनार्दन ॥ अद्य तावत् । पितुर्विष्णोस्तस्य परलोके प्रकाशवृद्ध्यर्थं नानायोनि भ्रमणरूपमहामोहान्धकारनिवारणार्थं कान्तासहितस्य माधवस्य क्रियासहितस्य गोविन्दस्य प्रीत्यर्थं पूर्वं सीतायुतराघवसलक्ष्मणदीपं सान्नं परिकल्पयामि नमः ॥ १ ॥ दक्षिणे स्वप्रकाशो० । यत्रास्ति माता० । यस्मिँल्लोके० । प्रेतस्य वायुरूपस्य० । याम्यैः पाशै० । भगवन्देवदेवेश दाक्षायणीयुतं शुभम् । रुद्राख्यं च महादीपं प्रेतलोके हिताय च । अर्पयामि महाबाहो तव हस्ते जनार्दन ॥ अद्य तावत् पितुर्विष्णोः० कान्तासहितस्य० दक्षिणे दाक्षायणीयुतरुद्रदीपं सान्नं

CC-0 Pulwama Collection. Digitized by eGangotri

परिकल्पयामि नमः ॥ पश्चिमे स्वप्रकाशो० । भगवन्देवदेवेश दीपं दिवाकराभिधम् । सच्छायं प्रेतलोकऽस्य प्रेतस्य हि हिताय वै । अर्पयामि० ॥ अद्य तावत् पितुर्विष्णोः० कान्तासहितस्य० पश्चिमे स्वच्छायायुतदिवाकरदीपं सान्नं परिक० ॥ उत्तरे स्वप्रकाशो० । भगवन्देवदेवेश दीपं च रोहिणीयुतम् । चन्द्रमोनाम प्रेतस्य परलोके हिताय वै । अर्पयामि० ॥ अद्य तावत् पितुर्विष्णोः० कान्तासहितस्य० उत्तरे रोहिणीयुतचन्द्रमोदीपं सान्नं परिक० ॥ अग्नये स्वप्रकाशो० । भगवन्सर्वतत्त्वज्ञ इन्द्राग्न्याख्यसुदीपकम् । अर्पयामि० ॥ अद्य तावत् पितुर्विष्णोः० । कान्तासहितस्य० अग्नये इन्द्राग्निदीपं सान्नं परिक० ॥ नैर्ऋते स्वप्रकाशो० । भगवन्सर्वतत्त्वज्ञ यमनैर्ऋतिनामकम् । अर्पयामि ॥
CC-0 Pulwama Collection. Digitized by eGangotri

अद्य तावत् पितुर्विष्णोः० कान्तासहितस्य० नैर्ऋते यमनैर्ऋतिदीपं सान्नं परिक० ॥ वायव्ये स्वप्रकाशो० । भगवन्देवदेवेश पाशमारुतदीपकम् । अर्पयामि० ॥ अद्य तावत् पितुर्विष्णो० कान्तासहितस्य० वायव्ये पाशिमरुद्दीपं सान्नं परिक० ॥ ईशाने स्वप्रकाशो० । भगवन्देवदेवेश धनदशङ्कराभिदम् । अर्पयामि० ॥ अद्य तावत् पितुर्विष्णो० कान्तासहितस्य० ईशाने धनदशङ्करदीपं सान्नं परिक० ॥ मध्ये रत्नदीपे नमोस्तु रामाय सलक्ष्मणाय देव्यै च तस्यै जनकात्मजायै । नमोस्तु रुद्रेन्द्रयमानलेभ्यो नमोस्तु चन्द्रार्कमरुद्गणेभ्यः ॥ ज्वलायुतं परमभूषणभूषिताङ्गं नानाभिधानयतिसेवितदीपराजम् । सङ्कल्पयामिपरलोकनिवासिप्रेतघोरान्धकारशमनाय प्रकाशरूपम् ॥ स्वप्रकाशो० । नमः पितृभ्यः० ।

CC-0 Pulwama Collection. Digitized by eGangotri

यज्ज्योतिः परमं लोके तमोमोह निवारणम् ।
तज्ज्योतिर्देवरूपेण दीपोयं परिकल्पितः ॥ बिन्दु-
नादकलातीतं भजामि स्वर्णवर्त्तिकम् । रौप्यपात्र-
रतं तेजो महामोहान्ध्यनाशनम् ॥ अद्य तावत्
पितुर्विष्णोस्तस्य परलोके प्रकाशवृद्ध्यर्थं घोरान्ध-
कारनिवारणार्थं (मध्ये कर्णिकायां) ज्योतीरूपं दीप-
राजं रत्नदीपं परिकल्पयामि नमः ॥ ततो विष्णोः
पुष्पं क्षिपत् । यत्रावकाशं लभते न दीपो न चन्द्र-
मा नाग्निविभावसू वा । छेद्यं न यत्सर्वमणिप्रका-
शैस्तदन्तरान्ध्यं कुरु कृष्ण दूरम् ॥ ततोऽश्विनौ
इति जीवादाम् । ततो देवस्य न्यासः । ओं गायत्र्यै
नमः ३ सर्वा विष्णुगायत्रीः । स्वप्रकाशाय विद्महे
ज्योतीरूपाय धीमहि । तन्नः प्रकाशः प्रचोदयात् ३
अद्य तावत् महागणपतेः० ऋतुपतेर्नारायणस्य

CC-0 Pulwama Collection. Digitized by eGangotri

पुष्पदन्ताय सार्वभौमाय सुप्रतीकाय । क्षारसमुद्राय क्षीरस॰ दधिस॰ इक्षुस॰ घृतस॰ सुरास॰ स्वादूदकस॰ । तलाय सुतलाय वितलाय रसातलाय तलातलाय अतलाय पातालाय रुद्राय तोयाय जलाय विष्णवे अद्भ्यः पानीयाय सलिलाय । वायवे ब्रह्मणे पृथिव्यै अग्नये उमायै शिवाय सूर्याय वामनाय जनकाय गोविन्दाय मरुद्धनाय भृगुवे सोमाय श्रियै तीराय कूर्माय मकराय मत्स्याय मण्डूकाय शिशुमाराय दुन्दुभाय कुलीराय गन्धमादनाय कूपपर्वताय घण्टालकाय इन्द्राय कण्डूलकाय वृषभाय धूम्राय चन्द्रमसे अशोकाय विशोकाय द्रोणाय वराहाय चन्दनाय बलाहकाय इन्द्राय वज्रहस्ताय १० अग्न्यादित्याभ्यां॰ ११ । अश्विन्यै भरण्यै कृत्तिकायै (पृ॰ १६८ पं॰ १२) जलशायिने

CC-0 Pulwama Collection. Digitized by eGangotri

हरये विशोकाय शैलेन्द्रेभ्यः केशवाय वरुणाय वरुणराजाय जलाधिपतये पाशहस्ताय वारुणीसहिताय । कूर्माय मकराय मत्स्याय दुन्दुभाय मण्डूकाय शिशुमाराय कुलीराय नौकाय अर्घो नमः पुष्पं नमः ।। दक्षिणां दत्त्वा प्रतिपादयेत् । सावित्राणि अद्य तावत् पितुर्वैतरणीनदीसुखसन्तरणार्थं, नमामि परया भक्त्या नौकादेवीं महेश्वरीम् । भवसन्तारणार्थाय सद्विप्राय ददाम्यहम् ।। वरुणरूपाय विष्णवे इमां नौकां सवस्त्रांसान्नां सहिरण्यां ददानि ३ "स्वादोरभक्षि वयस" इत्यादि चन्द्रसूक्तं पठित्वा प्रतिगृह्णामि ३ । अक्षय्यं । अद्य तावत् । आत्मनो० पितुरूनषाण्मासिके नवमे एकोद्दिष्टश्राद्धे वरुणनौकाप्रीत्या तिलाम्भसा० । पृच्छां । गायत्र्यै नमः ३ अम्पांपतये वि० ३ नौकायै वि० ३ अद्य

CC-0 Ruwama Collection. Digitized by eGangotri

तावत् वरुणयुतनौकापूजनमच्छिद्रं ॥ यवोदकं । आपन्नोऽस्मि । नौके तारय मे प्रेतं वैतरण्यां सुखेन वै । यथा तस्य व्यथा न स्यात्तथा कुरु जनप्रिये । परलोकहिता त्वं हि तारय घोरसङ्कटात् । नदीनां तारकृद्देवि क्षमां कुरु महेश्वरि ॥ आह्वानं नमो ब्रह्मणे । उदकलशं । आदौ छत्रदानं ततो नौकादानं ततो गोप्रदानं ततो गायत्र्यै नमः ब्राह्मणपूजनं कार्यम् ॥ इति नौकादानविधिः ॥

अथ दीपश्राद्धविधिः

आदौ ब्रह्मकलशं तद्दक्षिणतोऽष्टौ सदीपकलशान्मध्ये प्रतिमाकलशं संस्थाप्य ॥ "अभि नो देवी-वषट् ते विष्णो" तावत् । प्रधानं । तद्विष्णोः० वासुदेवाय नमः ८ । दीपकलशेषु । (पूर्वे) नवो गुहा

CC-0 Pulwama Collection. Digitized by eGangotri

चकृमभूरि दुष्कृतं नाविष्टं वसवो देवहेडनम् । मा किन्नो देवा अनृतस्य वर्पसा आसर्वतातिमादितिं वृणीमाहे ॥ (दक्षिणे) एवा वसिष्ठ इन्द्रमूतये नृन्कृष्टीनां वृषभं सोतिगृह्णाति । सहस्त्रिण उप नो पाहि वाजान्यूयं पातु स्वस्तिभिः सदा नः ॥ (पश्चिमे) न त्वामग्ने एमहे वसिष्ठ इशानंसूनो सहसो वसूनाम् । इषं स्तोत्रेभ्यो मघवञ्च आनन्यूयं पातु स्वस्तिभिः सदा नः ॥ (उत्तरे) अपां मीवांसो सविता विषण्यध्वरीय इदऽपसेधात्विन्द्रियाः । ग्रावा यत्र मधुषु दुह्यते बृहदाऽऽसर्वतातिमादितिं वृणीमहे ॥ (मध्य कर्णिकायां) तेजोसि शुक्रमसि० । (आग्नेय) इन्द्रा पर्वता । अग्नि सप्ति । (नैर्ऋते) यमो दधार । यन्ते देवी । (वायव्ये) उदुत्तमं । वायवायाहि । (ईशाने) सोमो धेनुं । इशानं त्वा ।

CC-0 Pulwama Collection. Digitized by eGangotri

(पूर्व) सीतायै नमः, राघवाय नमः, लक्ष्मणाय ॥ (दक्षिणे) रुद्राय दाक्षायिण्यै । (पश्चिमे) सूर्याय छायायै । (उत्तरे) चन्द्रमसे रोहिण्यै । (आग्नेये) इन्द्राय अग्नये । (नैर्ऋते) यमाय नैर्ऋतये । (वायव्ये) वरुणाय मरुते । (ईशाने) धनदाय ईशानाय । (मध्ये) ज्वालायुताय दीपराजाय अनन्तबाहुचरणशिरोमुखाय । क्षेत्रस्य पतिना । तेजाय चण्डाय । ऐन्द्राग्नं ॥ अ नाभौ । पुरुषसूक्तेनच ॥ तीर्थे स्नेयं । अद्य तावत् महागणपतये वासुदेवाय ८ पूर्वं सीतायुताय राघवाय सलक्ष्मणाय । दक्षिणे दाक्षायिणीयुताय रुद्राय । पश्चिमे छायायुताय दिवाकराय । उत्तरे रोहिणीयुताय चन्द्रमसे । आग्नेये इन्द्राग्निभ्यां । नैर्ऋते यमनैर्ऋतिभ्यां । वायव्ये पाशिमरुद्भ्यां । ईशाने धनदशङ्कराभ्यां । मध्ये कर्णिकायां
CC-0 Pulwama Collection. Digitized by eGangotri

त्रिशूलाय घटिकाय एकपादाय सहस्राक्षाय इन्द्राय शतमन्यवे छत्राय अर्घो नमः पुष्पं नमः ॥ धूपदीपवासांसि दक्षिणान्तं । ततः प्रतिपादयेत् । साचित्राणि० पितुः वा मातुः तस्य परलोके घुर्घुराख्ये घर्मसंज्ञके देशे अतिवृष्ट्यादिदुःखनिवारणार्थं इन्द्राय शतमन्यवे छत्रं षोडशकलं सहिरण्यं सवासं सान्नं रजतमणिमुक्तकर्पटसहितं ददानि ३ ॥ "इन्द्राय वाचं वदतेन्द्राय वाचं संवदतेन्द्रं वाजं जपयतेन्द्रं वाजं जय। इत्यादि—अन्नाय त्वा वाजाय त्वा वाजजित्यै त्वा।" इत्यन्तमिन्द्राबृहस्पति सूक्तं पठित्वा। प्रतिगृह्णामि ३ । अक्षय्यं । ततो वदचतुष्टयीं सम्पाद्य । गायत्र्यै नमः ३ । अद्य तावत् । इन्द्रस्य सानुचरस्य पृथिव्याः अग्नेः आत्मनो० छत्रदाननिमित्तं चतुर्वेदेश्वरपूजनं अच्छिद्रं सम्पूर्णमस्तु ॥ आपन्नो-

CC-0 Pulwama Collection. Digitized by eGangotri

स्मि। नमो ब्रह्मणे। छत्रस्य पूर्वादिदिक्षु चतुर्वेदेश्वरान् स्वस्वमन्त्रैः समर्प्य। ब्राह्मणपृच्छां विसर्जयेत्। गायत्र्यै नमः ३ वज्रपाणये विद्महे सहस्राक्षाय धीमहि। तन्न इन्द्रः प्रचोदयात् ३। एकपादाय विद्महे आतपत्राय धीमहि। तन्नच्छत्रः प्रचोदयात् ३ इन्द्रस्य शतमन्योः छत्रस्य आत्मनो० पितुः इन्द्रयुतछत्रपूजनमच्छिद्रं। यवोदकं। आपन्नोस्मि। वर्षातपसमायुक्ते पुरे घुर्घुरसंज्ञके। तं देशं तर्तुमिच्छामि दत्वा छत्रं महीतले। ब्रह्मा विष्णुस्तथा रुद्रो लोकपालाः सतारकाः॥ सूर्याः पितृगणैः सार्धं तुष्यन्तु छत्रदानतः। आयुरारोग्यमैश्वर्यं श्रियं धैर्यं च वैभवम्। छत्रदानेन देवेश सुखं मेस्तु निरर्गलम्॥ छत्रदानात्समं दानं न भूतं न भविष्यति। छत्रदानात्महालक्ष्मीर्निश्चलास्तु मम गृहे॥

CC-0 Pulwama Collection. Digitized by eGangotri

आह्वानं । नमो ब्रह्मणे । उदकलशं ॥

इति छत्रदानविधिः ॥

॥ अथ नौकादानविधिः ॥

आदौ मृद्भस्मगोमयैः० (पृ० १६० पं० १२) नौकायै एकविंशतिस्नानं । षोडशस्नानं । तर्पणखण्डं । ॐनमो देवेभ्य इत्यन्तं छत्रवत्कृत्वा । कुशब्राह्मणे नौकायां च जीवादानं। ॐगायत्र्यै नमः ३ । अपांपतये विद्महे पाशपाणये धीमहि। तन्नो वरुणः प्रचोदयात् ३ । नौकायै विद्महे नदीपारगामिन्यै धीमहि । तन्नो नौका प्रचोदयात् ३ । अद्य तावत् जलशायिनः हरेः विशोकस्य शैलेन्द्राणां केशवस्य वरुणस्य वरुणराजस्य जलाधिपतेः पाशहस्तस्य वारुणीसाहितस्य । कूर्मस्य मकरस्य मत्स्यस्य म-

CC-0 Pulwama Collection. Digitized by eGangotri

ण्डूकस्य शिशुमारस्य क्रकरस्य कुलीरस्य नौकायाः आत्मनो० पितुः वैतारणीनदीसुखसन्तरणार्थं वरुणायुतनौकापूजनमर्चामहं करिष्ये । एवमेव षष्ट्यासनं । जलशायिने हरये विशोकाय शैलेन्द्रेभ्यः केशवाय वरुणाय वरुणराजाय जलाधिपतये पाशहस्ताय वारुणीसहिताय । कूर्माय मकराय मत्स्याय मण्डूकाय शिशुमाराय क्रकराय कुलीराय नौकायै युष्मान्त्वः पूजयामि । जलशायिनं हरिं विशोकं शैलेन्द्रान् केशवं वरुणं वरुणराजं जलाधिपतिं पाशहस्तं वारुणीसहित । कूर्मं मकरं मत्स्यं मण्डूकं शिशुमारं क्रकरं कुलीरं नौकां आवाहयिष्यामि ॥ आवाहयाम्यहं देवं वरुणं भक्तवत्सलम् । पाशहस्तं प्रसन्नास्यं द्विभुजं मकरासनम् ॥ सुतीर्थनागराजैश्च यादोभिश्च सुसंस्तुतम् । रत्नकाञ्चनमालाढ्यं संस्मरे

CC-0 Pulwama Collection. Digitized by eGangotri

मकरासनम् । नीलवर्णो० ॥ आवाहयाम्यहं नौकां भवाब्धितारणक्षमाम् । हेमदण्डयुतां भक्त्या पितॄणां मुक्तिहेतवे । पीतवर्णो० ॥ ये दिव्या दिव्ये० भगवन्पुण्ड० । शन्नो देवी । पाद्यं नमः । आपः क्षीरं । जलशायिन् हरे विशोक शैलेन्द्राः केशव वरुण वरुणराज जलाधिपते पाशहस्त वारुणीसहित । कूर्म मकर मत्स्य मण्डूक शिशुमार कूकर कुलीर नौके इदं वोर्घ्यं नमः ॥ समालभनं गन्धो नमः ॥ पुष्पपूजा । गङ्गायै वितस्तायै यमुनायै गोदावर्यै सरस्वत्यै नर्मदायै सिन्धवे कौवीर्यै चन्द्रभागायै विपाशायै शतरुद्र्यै मधुमत्यै अनन्तनागराजाय कुलिकना० तक्षकना० पद्मना० महापद्मना० कार्कोटना० शङ्खपालना० वासुकिना० ऐरावताय पुण्डरीकाय वामनाय कुमुदाय अञ्जनाय
CC-0 Purwama Collection. Digitized by eGangotri

यात् ३ ॥ एकपादाय विद्महे आतपत्राय धीमहि तन्नश्छत्रः प्रचोदयात् ३ ॥ अद्यतावत् इन्द्रस्य शतमन्योः छत्रस्य आत्मनो० पितुः तस्य परलोके घुर्घुरपुराख्ये देशेऽतिवृष्ट्यादिदोषनिवारणार्थं इन्द्रयुतछत्रपूजनमर्चामहं करिष्ये । इन्द्रस्य शतमन्योः इदमासनं नमः । छत्रस्येदमासनं नमः । इन्द्राय शतमन्यवे छत्राय त्वां पूजयामि इन्द्रं शतमन्युं छत्रमावाहयिष्यामि ॐआवाहय ॥ आवाहयाम्यहं देवं वज्रहस्तं शचीपतिम् । ऐरावणसमारूढं गणरुद्राप्सरोवृतम् । पीतवर्णो० ॥ आवाहयाम्यहं देवं ब्रह्मपुत्रं बृहस्पतिम् । देवानां सद्गुरुं चैव शक्रस्य च पुरोहितम् । रक्तवर्णो० ॥ इन्द्रं कुत्सो० । आवाहयाम्यहं देवं छत्रमिन्द्रेण वै युतम् । महातापप्रशमनं परलोके सुखप्रदम् । पीतवर्णो० ॥ भग-

CC-0 Pulwama Collection. Digitized by eGangotri

न्पुण्डरी० । पाद्यार्घ्यगन्धपुष्पादि । छत्रस्य पुष्पपूजा ऋग्वेदाय नमः यजुर्वेदाय नमः सामवे० अथर्ववे० कृतयुगाय० त्रेतायु० द्वापरयु० कलियु० । मित्राय वरुणाय पूष्णे धात्रे अर्यम्णे यमाय इन्द्राय विवस्वते दीप्तांशवे सूर्याय मार्तण्डाय विष्णवे मेषाय वृषाय मिथुनाय कर्कटाय सिंहाय कन्यायै तुलायै वृश्चिकाय धन्विने मकराय कुम्भाय मीनाय मेरवे मलयाय अस्ताचलाय उदयाचलाय अजैकपदिने अहिर्बुध्न्याय कृत्तिवाससे पिनाकभृते वृषाकपये सिन्धवे कपर्दिने वहुरूपाय हराय रुद्राय त्र्यम्बकाय शेषाय वृषभाय स्ववर्णाय रजताय ताम्राय हरितालाय मनश्शिलायै अभ्रकाय गन्धकाय भूर्लोकाय भुवोलोकाय स्वर्लोकाय महोलोकाय जनोलोकाय तपोलोकाय सत्यलोकाय । तलाय अत-

CC-0 Pulwama Collection. Digitized by eGangotri

लाय सुतलाय वितलाय तलातलाय रसातलाय पातालाय मरीचये आत्रेयाय आङ्गिरसाय पुलस्त्याय पुलहाय कश्यपाय गोतमाय क्रतवे वसिष्ठाय नारदाय विष्णवे मनवे च्यवनाय सवर्ताय बृहस्पतये उशनसे शङ्खाय लिखिताय शातातपाय पराशराय ब्रह्मणे दक्षाय यमाय आपस्तम्बाय देवलाय बुद्धाय बौधाय व्यासाय जमदग्न्याय छागलेयाय विश्वामित्राय ऋषिशृङ्गाय कौशिकाय गर्ग्याय कौत्साय सनातनपुरुषाय अगस्त्याय शुनलाङ्गूलाय शुनाय शुनपुच्छाय शौनकाय हारीताय कात्यायनाय जाबालाय पैठीनसाय सुमन्तवे याज्ञवल्क्याय प्रचेतसे प्रजापतये । अश्विन्यै भरण्यै कृत्तिकायै रोहिण्यै मृगशिरसे आर्द्रायै पुनर्वसवे तिष्यायै अश्लेषायै मघायै पूर्वफाल्गुन्यै उ-

CC-0 Pulwama Collection. Digitized by eGangotri

त्तरफाल्गुन्यै हस्ताय चित्रायै स्वात्यै विशाखायै अनूराधायै ज्येष्ठायै मूलायै पूर्वषाढायै उत्तरषाढायै अभिजिते श्रवणाय धनिष्ठायै शतभिषजे पूर्वभाद्रपदायै उत्तराभाद्रपदायै रेवत्यै । इन्द्राय सुराधिपतये० । १० अग्न्यादित्याभ्या० । ११ चाक्षुषमन्वन्तराय रुद्रमन्वन्तराय सावर्णि० वैवस्वत० दक्षम० रैवत० सूर्य० तामस० स्वायंभुव० ब्रह्म० स्वारोचिष० हारीत० मनुम० धर्ममन्व० । सप्तर्षिमण्डलाय ध्रुवमण्ड० भीमम० सप्तपातालेभ्यः क्रतवे दक्षाय सत्याय वसवे कालाय कामाय ध्वनये रोचकाय पुरूरवाय आर्द्रवाससे आपाय ध्रुवाय सोमाय सावित्र्यै अनलाय नलाय प्रत्यूषाय प्रभासाय प्राग्दिश्यै अग्निदिश्यै दक्षिणादिश्यै नैर्ऋतिदिश्यै प्रतीचीदिश्यै वायव्यादिश्यै उदीचीदिश्यै ईशानदिश्यै उ-

CC-0 Pulwama Collection. Digitized by eGangotri

र्ध्वदिश्यै अधोदिश्यै । प्राणाय अपानाय समाना-
य उदानाय व्यानाय नागाय कूर्माय कृकराय दे-
वदत्ताय धनञ्जयाय ईशानाय पर्जन्याय जयन्ता-
य इन्द्राय सूर्याय सत्याय भृशाय आकाशाय अ-
ग्नये पूष्णे वितथाय गृहक्षताय यमाय गन्धर्वाय
भृङ्गिराजाय मृगाय पितृगणाय दौवारिकाय सुग्री-
वाय पुष्पदन्ताय वरुणाय असुराय शोषाय रोगा-
य वायवे वासुकये मुख्याय बलाटाय सोमाय सू-
र्याय अदितये दितये अर्यम्णे सवित्रे सावित्रे वि-
वस्वते विबुधाधिपतये जयाय रुद्राय राजयक्ष्मणे
मित्राय पृथ्वीधराय आपाय आपवत्साय ब्रह्मणे
मधुच्छन्दसे आदित्याय रवये गभस्तिने भानवे दि-
वाकराय धर्माय अधर्माय उपमन्यवे भास्कराय
त्वाष्ट्रे स्वर्पतये अर्काय सहस्ररश्मये तप्तकाञ्चनाय
CC-0 Pulwama Collection. Digitized by eGangotri

रुद्रं वह्निं सूर्यं सोमं वरुणं यमं इन्द्रं नैर्ऋतं कुवेरं ईशानं केशवं पृथिवीं आपः तेजांसि वायुं आकाशं अग्निं आदित्यं वरुणं सोमं कुमारं अङ्गारकं हरिं सौम्यं शक्रं जीवं सरस्वतीं दैत्यगुरुं प्रजापतिं कालं असितं गणपतिं राहुं रुद्रं केतुं परमेष्ठिनं ध्रुवं अनन्तं अगस्त्यं वसून् रुद्रान् आदित्यान् मरुतः साध्यान् अप्सुरसः समुद्रान् पर्वतान् नक्षत्राणि नक्षत्रदेवताः देवमातॄः देवपत्नीः देवकन्याः देवान् वेदान् वेदाङ्गानि यज्ञान् यज्ञाङ्गानि धर्मार्थकाममोक्षान् शास्त्रप्रणीतॄन् सत्वं रजः तमः दिक्पतीन् विदिक्पतीन् तारकान् तीर्थानि नदीः सप्तपातालान् सप्तलोकान् विश्वेदेवान् श्रियं दिवाचरान् निशाचरान् खेचरान् रात्रिंचरान् जलचरान् स्थावरान् जङ्गमान् ऋग्वेदं यजुर्वेदं सामवेदं अथर्ववेदं कृत-

CC-0 Pulwama Collection. Digitized by eGangotri

युगं त्रेतायुगं द्वापरयुगं कलियुगं अष्टादशपुराणानि दशविश्वेदेवान् द्वादशभृगून् चतुर्दशभुवनानि आत्मदेवताः परमात्मदेवताः बाह्यात्मदेवताः ॥ कण्ठोपवीती । अग्निऋषिः० । सनकः सनन्दनः सनातनः सनत्कुमारः कपिलः आसुरिः वोढः पञ्चशिखः मरीचिः अत्रिः अङ्गिराः पुलहः पुलस्त्यः भृगुः प्रचेताः क्रतुः वसिष्ठः नारदः ऋषयः शतार्चिनः मध्यमः गृत्समदः विश्वामित्रः वामदेवः भरद्वाजः कश्यपः जमदग्न्यः प्रागाथः पावमान्यः क्षुद्रसूक्तः महासूक्तः सप्तर्षिगणाः गौतमः च्यवनः विष्णुः देवलः लोमर्षिः दीर्घतपाः पराशरः पाराशर्यः वाल्मीकिः वत्सः शौनकः लौगाक्षिः कपिलः हारीतः आपस्तम्भः सुमन्तुः बौधायनः याज्ञवल्क्यः मनुः दक्षः शङ्खः ऋषिशृङ्गः कौशिकः गार्ग्यः अगस्त्यः सर्व मुन-
CC-0 Pulwama Collection. Digitized by eGangotri

यः अहिंसकाः प्रहिंसकाः सर्वभूताधिपतयः तृप्यन्तां । अपसव्येन । उशन्तस्त्वा हवा० (पृ० १५७ पं० १४) कव्यवाडनलः स्वधा ३ ॥ समन्तु-जैमिनि-वैशम्पायन-पैलसूत्र-भाष-भारत-महाभारतं तर्पयामि । जानकि-बाहवि-गार्ग्य-गालव-गोबिल-शाकल्य-शौनक-सुलभां मैत्रेयं कवोडं कौशूदं पैङ्ग्यं महापैङ्ग्यं महायज्ञं स्वयज्ञं साध्यायनं आश्वलायनं औदवाहिनं महैदवाहिनं शैशरीयं महाशैशरीयं कौशीतक्यं ऐतरीयं महैतरीयं गार्ग्य वाष्कलंतर्पयामि । ये चान्ये आचार्यास्ते सर्वे तृप्यन्तु ॥ देवताभ्यः ३ अद्य तावत् पिता वा माता मातृपत्न्यास्तु । सव्येन । वसन्ताय नमः ६ । देवासुराः । नमो देवेभ्यः ॥ कुशब्राह्मणछत्रयोः जीवादानं । गायत्र्यै नमः ३ वज्रपाणये विद्महे सहस्राक्षाय धीमहि । तन्न इन्द्रः प्रचोद-

CC-0 Pulwama Collection. Digitized by eGangotri

सः । कन्याभिलाषी विप्रर्षिः परिबभ्राम मेदिनीम् । कन्यामलभमानोसौ पितृवाक्याग्निदीपितः । चिन्तामवाप महतीमतीवोद्विग्नमानसः । किं करोमि क्व गच्छामि कथं मे दारसंग्रहः । क्षिप्रं भवेत्पितॄणां यो ममाप्युदयकारकः । इति चिन्तयतस्तस्य मतिर्जाता महात्मनः । तपसाराधयाम्येव ब्रह्माणं कमलोद्भवम् । ततो वर्षशतं दिव्यं तपस्तेपे स वेधसे । दिदृक्षुः सुचिरं कालं महर्षिर्नियमस्थितः । ततस्तं दर्शयामास ब्रह्मलोकात्पितामहः । उवाच च प्रसन्नोस्मि प्रोच्यतामभिवाञ्छितम् । ततोसौ प्रणिपत्याह ब्रह्माणं जगतः पतिम् । ब्रह्मा चाऽह [illegible]चि विप्रं श्रुत्वा तस्याभिवाञ्छितम् । प्रजापतिस्त्वं भविता स्रष्टव्या भवतः प्रजाः । सृष्ट्वा प्रजाः सुतान्विप्र समुत्पाद्य क्रियास्तथा । कृत्वा कृताधिकारस्त्वं

CC-0. Pulwama Collection. Digitized by eGangotri

ततः सिद्धिमवाप्स्यसि । स त्वं यथोक्तं पितृभिः कुरु दारपरिग्रहम् । कामं च समभिध्यायन् क्रियतां पितृपूजनम् । त एव तुष्टाः पितरः प्रदास्यन्ति तवेप्सितम् । पत्नीं सुतांश्च सन्तुष्टाः किं न दद्युः पितामहाः । मार्कण्डेय उवाच । इत्यर्षिवचनं श्रुत्वा ब्रह्मणो व्यक्तजन्मनः । नद्या विविक्ते पुलिने चकार पितृतर्पणम् । तुष्टाव च पितॄन्विप्रः स्तवैरेभिरथादृतः । एकाग्रहृदयो भूत्वा भक्तिनम्रात्मको रुचिः । रुचिरुवाच । नमस्येऽहं पितॄन्भक्त्या ये वसन्त्यधिदेवताः । देवैरपि हि तर्प्यन्ते श्राद्धेषु च स्वधान्तरे । शुद्धैर्मनोरमैर्भक्त्या भुक्तिमुक्तिमभीप्सुभिः ॥ नमस्येऽहं पितॄन्स्वर्गे सिद्धाः सन्तर्पयन्ति यान् । श्राद्धेषु कव्यैः सकलैरुपहारैरनुत्तमैः ॥ नमस्येऽहं पितॄन्भक्त्या येऽर्च्यन्ते गुह्यके-

CC-0 Pulwama Collection. Digitized by eGangotri

र्दिवि । तन्मयत्वेन वाञ्छद्भिर्वृद्धिमात्यन्तिकीं पराम् । श्राद्धेषु श्रद्धयाभीष्टलोकत्रयप्रदायिनः । नमस्येऽहं पितॄन्मर्त्यैरर्च्यन्ते भुवि ये सदा । धान्यैः शुद्धैर्व-ताहारैस्तपोनिर्धूतकल्मषैः । वाञ्छिताभीष्टलाभाय प्रा-जापत्यप्रदायिनः । नमस्येऽहं पितॄन्विप्रैरर्च्यन्ते भुवि-ये सदा । पुण्यैः श्राद्धैस्तथाहारैस्तपोनिर्धूतकल्मषैः । नमस्येऽहं पितॄन्विप्रैर्नैष्ठिकव्रतधारिभिः । ये संयता-त्मभिर्नित्यं सन्तर्प्यन्ते शमादिभिः ॥ नमस्येऽहं पितॄञ्छ्राद्धे राजन्यास्तर्पयन्ति यान् । कव्यैरशेष-विधिवल्लोकत्रयफलप्रदान् । नमस्येऽहं पितॄन्वैश्यै-रर्च्यन्ते भुवि ये सदा । स्वकर्माभिरतैर्नित्यं पुष्प-धूपान्नवारिभिः । नमस्येऽहं पितॄञ्छ्राद्धे पाताले ये महासुराः । सन्तर्प्यन्ते स्वधाहारैस्त्यक्तदम्भमदैः सदा । नमस्येऽहं पितॄञ्छ्राद्धे ह्यर्च्यन्ते ये रसातले ।

CC-0 Pulwama Collection. Digitized by eGangotri

मोगैरशेषैर्विविधैर्नागैः कामानभीप्सुभिः । नमस्येऽहं पितृञ्छ्राद्धे सर्पैः सन्तर्प्यते सदा । तत्रैव विधिवन्मन्त्रैर्भोगसम्पत्समन्वितैः । स्वाहाकारेण देवानां स्वधाकारैः पितृन्यजेत् ॥ पितृन्नमस्ये निवसन्ति साक्षाद्ये देवलोके च महीतले वा । तथान्तरिक्षे च सुरादिपूज्यास्ते संप्रयच्छन्तु मयोपनीतम् ॥ पितृन्नमस्ये परमाणुभूतान्ये वै विमाने निवसन्ति संघाः । यजन्ति यानस्तमलैर्मनोभिर्योगेश्वराः क्लेशविमुक्तिहेतून् ॥ पितृन्नमस्ये दिवि ये च मूर्ताः स्वधाभुजः काम्यफलाभिसन्धौ । प्रदानसक्ताः सकलेप्सितानां विमुक्तिदा ये त्वभिसन्धितेषु ॥ तृप्यन्तु तेऽस्मत्पितरः प्रसन्ना इच्छागता नः प्रदिशन्तु कामान् । सुरत्वमिन्द्रत्वमतोधिकं वा वस्त्रात्मजं तेत्रबलं गृहाणि ॥ सूर्यस्य ये रश्मिषु चन्द्रबिम्बे

CC-0 Pulwama Collection. Digitized by eGangotri

शुक्ले विमाने च सदा चरन्ति । तृप्यन्तु तेऽस्मत्पितरोऽन्नतोयैर्गन्धादिना पुष्टिमितो व्रजन्ति ॥ येषां हुतेऽग्नौ हविषाभितृप्तिर्यैर्भुज्यते विप्रशरीरसंस्थैः । ये पिण्डदानेन मुदं प्रयान्ति तृप्यन्तु तेऽस्मत्पितरोऽन्नतोयैः ॥ ये खड्गमांसेन सुरैरभीष्टैः कृष्णैस्तिलैर्दैत्यमहोरगैश्च । कालेन शाकेन महर्षिवर्यैः संप्रीणितास्ते मुदमत्र यान्तु ॥ कव्यान्यशेषाणि च यान्यभीष्टान्यतीव तेषाममरार्चितानाम् । तेषां च सान्निध्यमिहास्तु पुष्पगन्धाम्बुभोज्येषु मयाऽहृतेषु ॥ दिने दिने ये परिगृह्णतेऽर्चां मासर्तुपूज्या भुवि येऽष्टकासु । ये वत्सरान्तेऽभ्युदये च पूज्याः प्रयान्तु तेऽस्मत्पितरोत्र तुष्टिम् ॥ पूज्या द्विजानां कुमुदेन्दुभासो ये क्षत्रियाणां च नवार्कवर्णाः । तथा विशां ये कनकावदाता नीलानिभाः शूद्रजनस्य

CC-0 Pulwama Collection. Digitized by eGangotri

अग्न आयूंषि १ अग्निर्ऋषिः २ अग्ने पवस्व ३ भगवन्पुण्डरीकाक्ष ॥ अग्निं परिसमूह्य पर्युक्ष्य परिषिच्य ६ पुरस्तात् ४ अग्नये स्वाहा । प्रजापतये स्वाहा । सूर्याय स्वाहा । प्रजापतये स्वाहा । विमुच्य नयामि । धर्मं देहि । ओं गायत्र्यै नमः ३ अद्यतावत् महागणपतेः अंग्नः अष्टकादेवतायाः हेरुकादीनां आत्मनो वाङ्० पितामहस्य प्रपितामहस्य वृद्धप्रपितामहस्य पितुः समानसपिण्डीकरणे श्राद्धे तेषां वैकुण्ठपदवीप्राप्त्यर्थमात्मनः पुण्यवृद्ध्यर्थं कलशपूजनं क्षेत्रेशपूजनमच्छिद्रं । एताभ्यो यवोदकं नमः ॥ आज्ञा मे दीयतां नाथ ॥ क्षमध्वं ममक्षेत्रेशाः । उभाभ्यां जानुभ्यां ॥ नमो ब्रह्मणे । पात्राणि चालयेच्छ्राद्धे ॥ सव्येनाचम्य ॥ उदकलशमुपनिधाय ॥ मन्त्रार्थाः सफलाः सन्तु ॥

CC-0 Pulwama Collection. Digitized by eGangotri

अनन्तशाखकल्पाय ॥ अद्यतावत् पितुः समान० तृणासनं तृणपादुकां काष्ठपादिकां अङ्गारिकां दण्डं ददानि ॥ इति सपिण्डीकरणश्राद्धविधिः ॥

॥ अथ पितृस्तवम् ॥

ओं विश्वप्रपञ्चरचनाचतुरं दुरन्तकार्तान्तभङ्गभिदुरं बलमादिसारम् । सारङ्गकोकिलतमाललसच्छरीरं दामोदरं दुरितदुःखहरं नमामि ॥ रुचिः प्रजापतिः पूर्वं निर्ममो निरहङ्कृतिः । यश्चास्तमितशायी च चचार पृथिवीमिमाम् । निरग्निमनिकेतं तमेकाकिनमनाश्रमम् । विमुक्तसङ्गमं दृष्ट्वा प्राचुः स्वपिरो मुने ॥ पितरऊचुः । गृही समस्तदेवानां पितॄणां च तथार्हणाम् । ऋषीणां चातिथीनां च कुर्वल्लोकानुपाश्नुते । स्वाहोच्चारणतो देवान् स्वधोच्चारणतः पितॄन् ।

CC-0 Pulwama Collection. Digitized by eGangotri

विभजस्वान्नदानेन नत्वा भूतातिथीनपि । स त्वं दैवादृणाद्बद्धो बन्धसंस्मरणादपि । अवाप्नोषि मनुष्यर्षिभूतेभ्योपि दिने दिने । अनुत्पाद्य सुतान्देवानसन्तर्प्य पितॄंस्तथा । भूतादींश्च तथा मौढ्यात्सुगतिं गन्तुमर्हसि । क्लेशमेवैककं पुत्र हत्या माऽत्र भवेत्तव । मृतस्य नरकं तद्वत्क्लेश एवान्यजन्मनि । रुचिरुवाच । अविद्या पठ्यते वेदे पापायाऽधोगतिस्तथा । भवत्यतो मया पूर्वं न कृतो दारसंग्रहः । आत्मनः संयमो योऽयं क्रियतेऽत्तनियन्त्रणात् । समुस्थिते तत्र भवत्यसावपि परिग्रहात् । प्रक्षाल्यतेऽनुदिवसं यदात्मा निष्परिग्रहैः । ममत्वपङ्कदिग्धोपि दम्भोभिश्च वरं हि तत् । अनेकभवसम्भूतकर्मपङ्काङ्कितो बुधैः । आत्मा सद्वासनातोयैः प्रक्षाल्यो नियतेन्द्रियैः । पितर ऊचुः । वत्स कस्मात्त्वया पुण्यो न कृतो दा-

CC-0 Pulwama Collection. Digitized by eGangotri

रसंग्रहः । स्वर्गापवर्गहेतुः स बन्धस्तयोरिमं विना ।
युक्तं प्रचालनं कस्मादात्मनो नियतेन्द्रियैः । किन्तु
न न्यायमार्गोयं यत्र त्वं पुत्र वर्तसे । पञ्चर्णदा-
नैरशुभान्मुच्यते नाभिसंहितैः । फलैस्तथोपभुक्तै-
श्च पूर्वकर्मशुभाशुभैः । एवं न बन्धो भवति कुर्व-
तः कारणात्मकैः । नच बन्धाय तत्कर्म भवत्यना-
भिसंहितम् । पूर्वकर्म कृतं भोगैः चीयतेऽहर्निशं तथा ।
सुखदुःखात्मकं वत्स पुण्यापुण्यात्मकं नृणाम् ।
एवं प्रचाल्यते प्राज्ञैरात्मा बन्धाच्च रक्ष्यते । नत्वेवं
ह्यविवेकेन पापपङ्केन दह्यते । रुचिरुवाच । अवि-
द्या पठ्यते वेदे कर्ममार्गः पितामहाः । तत्कथं क-
र्मणो मार्गे भवन्तो योजयन्ति माम् । पितरऊचुः ।
अविद्या सत्यमेवैतत्कर्मणो तद्वशं वचः । किन्तु विद्या-
परिप्राप्तौ हेतुः कर्म न संशयः । विहितकरणात्पुं-

CC-0 Purwama Collection : Digitized by eGangotri

भिरसद्भिः क्रियते तु यः। संयमो मुक्तये नासौ प्रत्यायानगतिप्रदः। प्रक्षालयामीति भवान् वत्सात्मानं तु मन्यते। विहिताकरणोद्भूतैः पापैस्त्वं भुवि लिप्यसे। अविद्याप्युपकाराय विषवज्जायते नृणाम्। अनुष्ठिताभ्युपायेन बन्धायान्यायतो हि सा। तस्माद्वत्स कुरुष्व त्वं विधिवद्दारसंग्रहम्। मा जन्म विफलं तेस्तु न संप्राप्यान्यलौकिकम्। रुचिरुवाच। वृद्धोहं साम्प्रतं कोन्यः पितरः सम्प्रदास्यति। भार्यां तथा दरिद्राय दुष्करो दारसङ्ग्रहः। पितर ऊचुः। अस्माकं पतनं वत्स भवतश्चाप्यधोगतिः। नूनं भावि भवित्री च नाभिनन्दसि नो वचः। मार्कण्डेय उवाच। इत्युक्त्वा पितरस्तस्य पश्यतो मुनिसत्तम। बभूवुः महसाऽदृश्या दीपा वातहता इव। स तेन पितृवाक्येन भृशमुद्विग्नमान-

CC-0 Pulwama Collection. Digitized by eGangotri

ह ये च त्वाऽनु अप उपस्पृश्य १ एतत्ते प्रपितामह ये च त्वानु २ एतत्ते वृद्धप्रपितामह ये च त्वानु अप० ३ । एवं द्वितीयस्य ३ तृतीयस्य ३ पिण्डत्रयं दत्त्वा । प्रेतपाकाद्यर्वर्धमुद्धृत्य तिलास्तृतं यं अपरासु कर्षूषु प्रत्येकस्यैकैकं पिण्डं दद्यात् एतत्ते तत अप उपस्पृश्य ३ 'वा' एतत्ते मातः अप उपस्पृश्य ३ ॥ प्रथमां स्वस्वान्नेन पूरयेत् २ दधिमधुभ्यामिति द्वितीयां २ घृतमांसेन भृतेन श्रापाकेनेति तृतीयाम् २ । पुंसि सुरां सूपनयेत् । ६ स्त्रीविषये मज्जामुपनयेत् ६ दुग्धेन क्षीरेण । दुग्धेनाभितः परिषिच्य ६ सक्तवः सर्पिषाऽभ्यक्ताः क्षीरोदकपरिप्लुताः । नातिद्रवा नातिघना मन्थ इत्यभिधीयते ॥ मन्थेनाभितः परिषिच्य ६ येचात्र सन्निहिताः स्युर्दधिमधुघृतादयस्तैरपि परिषिच्य ६ पितॄन्ध्यायन् । एतद्भवद्भ्यः ३

CC-0 Pulwama Collection. Digitized by eGangotri

वा भवतीभ्यः ३ तृप्यन्तु भवन्तः वा भवत्यः ३ अत्र पितरो मादयध्वं ३ । प्रेतं ध्यायन् । एतद्ब्रुवते 'वा' भवत्यै ३ तृप्यतु भवान् 'वा' भवती ३ अत्र पितः "वा" मातः मादयस्व ३ ॥ तद्विष्णोरिति प्रेतपिण्डेषु प्रत्येकस्य पुष्पद्वयं निधाय प्रत्येकं प्रेतपिण्डं । 'त्रैधं करिष्ये' इत्युक्त्वा 'उँ कुरुष्व' इति विप्रवाक्यं श्रुत्वा वसुभ्यो भागः १ रुद्रेभ्यो भागः २ आदित्यभ्यो भागः ३ इति सौवर्णरौप्यताम्रसंयुतैर्दर्भैर्विभज्य स्वं स्वं भागं पितामहादिपिण्डेषु निदध्यात् ॥ ततो मधु चाज्यं जलं चार्घ्यं पुष्पं धूपविलेपनम् । बलिं दद्याच्च विधिवत्पिण्डोऽष्टाङ्गो भवेद्यथा ॥ संसृजतु त्वा—वसुभ्यः स्वधा । एतद्वां पितृपितामहौ ये च वामनु 'वा' मातृपितामह्यौ याश्च वामनु सप्तम एष वां लेपः । अप-उपस्पृश्य ॥ १ संसृजतु त्वा—रुद्रेभ्यः एतद्वां पितृप-

CC-0 Pulwama Collection. Digitized by eGangotri

पितामहौ येच वामनु षष्ट एष वां लेपः । अपउप स्पृश्य ॥ २ संसृजतु त्वा—आदित्येभ्यः स्वधा । एतद्वां पितृवृद्धप्रपितामहौ ये च वामनु पञ्चम एष वां लेपः । अपउपस्पृश्य ॥ ३ एवं द्वितीयकर्षौ तृतीयस्यां च पिण्डान् दत्त्वा ॥ पुनः पूर्ववत् । प्रथमामन्नेन पूरयेत् १ । दधिमधुभ्यामिति द्वितीयां २ घृतमांसेन शृतेन श्रापाकेनेतितृतीयां ३ पुंसि सुरामुपनयेत् ३ स्त्रीषु मज्ञामुपनयेत् ३ दुग्धेनाभितः परिषेकः ३ सक्तवः सर्पिषाभ्यक्ताः० मन्थेनाभितः परिषिच्य ३ ये चात्र सन्निहिताःस्युस्तैरपि परिषिच्य ३ एतद्भवद्भ्यः वा भवतीभ्यः ३ । तृप्यंतु भवन्तः वा भवत्यः ३ अत्र पितरो मादयध्वम् ३ अन्त्ये स्वरे मेत्तणम् ॥ सव्येन उदङ्ङासीनः प्राणायामः ॥ नमो वः पितरो इत्युपस्थानम् ॥ ततः स्वरार्धान्विमृज्य ३ नयामि ॥

CC-0 Pulwama Collection. Digitized by eGangotri

दकतिलैर्मिश्रं कुर्यात्पात्रचतुष्टयम् । निदध्यात्पितृपात्रेषु प्रेतपात्रं प्रसेचयेत् ॥ संसृजतु त्वा—वसुभ्यः स्वधा १ संसृजतु त्वा—रुद्रेभ्यः स्वधा २ संसृजतु त्वा—आदित्येभ्यः स्वधा ३ ॥ पितृपितामहयोः समानस० एतद्दत्तमन्नमक्षय्यमस्तु स्वधा इदमन्नमक्षय्यमस्तु स्वधा १ एवं पितृप्रपितामहयोः समान २ पितृवृद्धप्रपितामहयोः समान ३ ॥ स्त्रीविषये । मातृपितामह्योः समान १ मातृप्रपितामह्योः २ मातृवृद्धप्रपितामह्योः ३ बहुवचने । मातृपितामहीनां । प्रेत्ये पितरं समान-एतद्दत्तमन्नमक्षय्यमुपतिष्ठतामिदमन्नमक्षय्यमुपतिष्ठतु । दातारो नोऽभिवर्धन्तां वेदाः सन्ततिरेव च । श्रद्धा च नो मा व्यगमद्बहु देयं च नो अस्तु । अन्नं च नो बहु भवेदतिथींश्च लभेमहि । याचितारश्च नः सन्तु मा च याचिष्म कंचन

CC-0 Pulwama Collection. Digitized by eGangotri

एता एवाशिषः सत्याः सन्त्विति विप्राः प्रतिब्रूयुः ॥ नाशिषः प्रेतब्राह्मणेभ्यः ॥ सव्येन शन्नो देवी । विश्वेभ्यो देवेभ्यः दक्षिणायै । विश्वेदेवाः प्रीयन्तां प्रीताः सन्तु ॥ शन्नो भवन्तु वाजिनो हव्येषु देवताता मितद्रवाः स्वर्काः । जम्भयन्तोऽहिवृकं रक्षांसि सनेम्यस्मद्यूयमनमीवाः सस्रावपात्रमुत्तानं कृत्वा ताभिरद्भिः पुत्रकामो मुखमनक्ति ॥ वाजे वाजे कुशविसर्जनम् वाजे वाजे वत वाजिनो नो धनेषु विप्रा अमृता ऋतज्ञाः । अस्य मधु पिबत मादयध्वं तृप्ता यात पथिभिर्देवयानैः ॥ अपसव्येन । आ मा वाजस्येति पिण्डपरिषेकः आ मा वाजस्यप्रसवो जगम्यादा मा द्यावापृथिवी विश्वरूपे । आ माऽगन्तां पितरं मातरं चामा सोमो अमृतत्त्वेन गम्यात् ॥ सव्येन गायत्र्यै नमः २ अपसव्येन देवताभ्यः ३

CC-0 Purwama Collection. Digitized by eGangotri

अद्यतावत पितामहस्य प्रपितामहस्य वृद्धप्रपितामहस्य पितुः समानसपिण्डीकरणं वैश्वदेवाष्टकापूर्वकं सानुष्टक्यं श्राद्धं ब्राह्मणपूजनमच्छिद्रं सम्पूर्णमस्तु एवमस्तु ॥ विमुच्य । नयामि ॥ सव्येन पुनरग्निं परिसमूह्य पर्युक्ष्य ६ । अपसव्येन । पितामहाय० तिलोदकं स्वधा उदकतर्पणं स्वधा ॥ नित्यकुम्भेन तु । अद्यतावत् पितः समान० सोदकुम्भान्नदानसहितमेतत्ते तिलोदकमेतत्ते उदकतर्पणम् ॥ सव्येन । ततो गोग्रासादि । चेत्रेशबलिः । अपसव्येन । पिण्डेषु पुष्पाणि ॥ आयुः प्रजां ॥ अथ सपिण्डीयान्वष्टका ॥ गेहाग्नेर्दक्षिणतः पूर्वोक्तरूपाःषट् कर्षूर्विधाय । तासां दक्षिणतो मृल्लोष्टैः षट् खरांश्च कुयात् । सव्येन गेहाग्निं परिसमूह्य पर्युक्ष्य ६ अपसव्येन इदं पितृभ्यः भृतमभिघार्य । द्वितीयचरौ

CC-0 Pulwama Collection. Digitized by eGangotri

इदं पित्रे श्रृतमभिघार्य चरुद्वय प्रक्षाल्य तण्डुलान्पवित्रान्तर्हितानावपति प्रक्षाल्य मूलतो मेक्षणमवदधाति ॥ अग्नावधिश्रित्य तत्रचाभिघार्य दक्षिणत उद्वास्य पुनश्चाभिघार्य । सव्यन । गेहाग्नेरग्निमुद्धृत्य अपसव्येन खराग्निं प्रणयेत् (यं यं प्रणयेत्तस्य तस्य "सव्येन । परिसमूह्य पर्युक्ष्य" इति साधनाङ्गं कुर्यात् ॥) सव्यन । गेहाग्नेरग्निमुद्धृत्य (द्वितीयं) अपसव्येन प्रणयेत् सव्येन परिसमूह्य पर्युक्ष्य ६ गेहाग्नेरग्निमुद्धृत्य (तृतीयं) अपसव्येन प्रणयेत् सव्येन परिसमूह्य पर्युक्ष्य ६ गेहाग्नेरग्निमुद्धृत्य (चतुर्थं) अपसव्येन प्रणयेत् सव्येन परिसमूह्य पर्युक्ष्य ६ गेहाग्नेरग्निमुद्धृत्य (पञ्चमं) अपसव्येन प्रणयेत् सव्येन परिसमूह्य पर्युक्ष्य ६ । गेहाग्नेरग्निमुद्धृत्य (षष्ठेतु) गेहाग्निं परिसमूह्य पर्युक्ष्य ६ अपसव्येन प्र-

CC-0 Pulwama Collection. Digitized by eGangotri

णयेत् सव्येन परिसमूह्य पर्युक्ष्य ६ ॥ खराग्निषु प्रत्यक्रम्य । अपसव्येन परिसमूह्य पर्युक्ष्य परिषिच्य ६ पश्चिमदक्षिणाग्रैः स्तरैश्चातुष्कोष्ठैः स्तृणीयात् । द्वितीयस्य परिसमूह्य पर्युक्ष्य परिषिच्य ६ परिस्तीर्य ४ । तृतीयस्य ६ चतुर्थस्य ६ पञ्चमस्य ६ षष्ठस्य परिसमूह्य पर्युक्ष्य परिषिच्य ६ सर्वाः ५४ परिस्तीर्य ४ ॥ अवेक्ष्य कर्षाः कर्षेषु दक्षिणाग्रान्दर्भानास्तीर्य तिलजलैरभ्युक्ष्य । प्रथमखराग्निषु त्रिषु पितृचरोः । अग्नौ करवाणि ॐकुरु । "सोमाय पितृमते स्वाहा १ अग्नये कव्यवाहनाय स्वाहा" २ इति आहुतिद्वयं द्वयं जुहुयात् । परेषु त्रिषु प्रेतचरोः अग्नौ करवाणि ॐकुरु 'ॐ ॐ' इति द्वे द्वे आहुती दद्यात । तिलास्तोयं । पितृपाकान्मेक्षणेन चर्वर्धमुद्धृत्य पितृकर्षूषु मूलमध्याग्रदेशेषु प्रत्येकस्य पिण्डानां त्रयं त्रयं दद्यात । एतच्चे पिताम-

CC-0 Pulwama Collection. Digitized by eGangotri

म एष वो ३ । मूलपुरुषा–अत्र पितरो मादयध्वम् । वीरान्नः पितरो दत्त ३ । पिण्डलेपं निवारयेत् । पितृपितामहाभ्यां पितृप्रपितामहाभ्यां पितृवृद्धप्रपितामहाभ्यां समानसपिण्डीकरणे श्राद्धे समालभन्नं गन्धः स्वधा । अर्घः स्वधा पुष्पं स्वधा दीपः स्वधा धूपः स्वधा । भक्ष्यभोज्यफलमूलबलिनैवेद्यमाहारादि अन्नं स्वधा । तिलमधुमिश्रमुदकपात्रमाचमनीयं जलं स्वधा । एतद्वां हिमपानादि स्वधा । स्त्रीविषये मातृपितामहीभ्यां । बहुवचने । मातृपितामहीभ्यः ॥ सव्येनाचम्य ॥ वसन्ताय नमः ६ अपसव्येन । यास्तिष्ठन्ति । ऊर्जवहन्ती । आरुचिमऽभिमन्त्र्य । अद्यतावत् पितः समान पाथेयं नित्यान्नम् ॥ सव्येन । मा मेत्तेष्ठा बहु मे पूतमस्तु ब्रह्मणो मे जुषतामन्नमन्नम् । सहस्रधारममृतोदकं मे पूतमस्त्येतत्परमे

CC-0 Pulwama Collection. Digitized by eGangotri

व्योमन् । देवतायै बलिमुपहरेत् । सावित्राणि पितृगणदेवताभ्यः ब्रह्मणे ॐनमो नैवेद्यं ॥ अपसव्येन । सर्वमन्नमुपादाय सतिलं दक्षिणामुखः । वारिणाप्लाव्य तच्चान्नं पृच्छेत्प्रश्नत्रयं द्विजः । पितृब्राह्मणेषु । विषदमन्नमानीय । कश्चित्सम्पन्नं भोः सुसम्पन्नं १ । तृप्यन्तु भवन्तः तृप्ताः स्मः २ । शेषमन्नमिष्टैः सह ३ । अग्निदग्धाश्च ये जीवा येप्यदग्धाः कुले मम । भूमौ दत्तेन तृप्यन्तु तृप्ता यान्तु परां गतिम् ॥ येषां न पचते माता येषां न पचते पिता । ओच्छिष्टं येच कांक्षंति तेषां तृप्तिः स्वधा नमः ॥ प्रेतब्राह्मणे तिलदर्भक्षीरेण । स्वादितं १ सुस्वादितं तृप्यतु भवान् वा भवती २ तृप्तोस्मि वा तृप्तास्मि प्रेतस्तृप्यतु ३ ॥ सव्येन । असोमपाश्च ये जीवा यज्ञभागविवर्जिताः । तेषामन्नं प्रदास्यामि वि-

CC-0 Pulwama Collection. Digitized by eGangotri

किरं वैश्वदेवके ॥ तृप्तानाचम्य । अपसव्येन । पितामहाय आचमनीयं स्वधा ॥ पितः समानसपि० एतत्ते आचमनीयम् । सव्येन । विश्वेभ्यो देवेभ्यः आचमनीयं नमः ॥ अपसव्येन । यन्मे रामइत्यर्धप्रदक्षिणं कृत्वा प्रत्येत्य ॥ यन्मे रामः शकुनिःश्वापदाश्च यन्मे शुचिर्मन्त्रकृतस्य प्राशत् । वैश्वानरः सविता तत्पुनातु तस्मिन्पूते देवता मादयन्तां तेन पूतेन पितरो मादन्ताम् ॥ यास्तिष्ठन्ति । पितामहाय दक्षिणायै । अभिरमन्तु भवन्तः अभिरताःस्मः देवाश्च पितरश्चैतत्पूतमत्रोपजीवतामस्मिँल्लोके मां धत्त जीवेम शरदः शतं पश्येम शरदः शतम् । अथास्मभ्यमूर्जं धत्त ज्योतिर्धत्ताऽजरं न आयुः ॥ यदन्तरिक्षं पृथिवीमुत द्यां यत्पितरं मातरं वा जिहिंसिम । अग्निर्नस्तस्मादेनसो गार्हपत्यः प्रमुञ्चतु चकृम यानि दुष्कृता ॥ तृप्य-

CC-0 Pulwama Collection. Digitized by eGangotri

न्तु भवन्तः पितामहा येच भवतोऽनु येचास्मास्वा-
शंसन्ते तृप्यत १ तृप्यन्तु भवन्तः प्रपितामहा येच भ २
तृप्यन्तु भवन्तः वृद्धप्रपितामहा येच ३ । स्त्रीविषये
तृप्यन्तु भवत्यः पितामह्यो याश्च भवतीरनु याश्चा-
स्मास्वाशंसन्ते तृप्यत १ तृप्यन्तु भवत्यः प्रपिताम-
ह्यो याश्च २ तृप्यन्तु भवत्यः वृद्धप्रपितामह्यो याश्च ३ ॥
तृप्यंतु ३ एवमस्तु ॥ प्रेत्ये । यास्तिष्ठन्ति । पि-
तः समान—एतत्ते दक्षिणायै तिलहिरण्य० दधानि ।
अभिरमतु भवान् अभिरतोस्मि देवाश्च—यानि दुष्कृ-
ता । प्रथमं जलकुम्भं । कलशं शुभदं दिव्यं ।
अद्यतावत् पितः समान-तस्य परलोके क्षुत्पिपा-
सादिनिवारणार्थमिमं जलकुम्भं सहिरण्यं सवासस-
मान्नं ददानि ३ प्रतिगृह्णामि ३ नित्यकुम्भं च दत्त्वा ।
अक्षय्यं [illegible] पात्रचतुष्टयं प्रकल्प्य । गन्धो-

CC-0 Pulwama Collection. Digitized by eGangotri

वासांसि । अतो नोन्यत्पितरो मा यूढ्वं । वीरान्नः पितरो दत्त पिण्डलेपं निवारयेत् ॥ ततः प्रेतचरो गन्नमुद्धृत्य ॥ तिलास्तोयं । देवताभ्यः ३ अद्य-तावत्, पृथिवी दर्विरक्षिता तृप्तिः स्वधानुपदस्तां तां पृथिवीं दर्विमक्षितां तृप्तिं स्वधामनुपदस्तां ता-मग्निरिव पृथिवीमुपजीव पितरमुकामुकगोत्र समा-नसपिण्डीकरणे श्राद्धे एष ते पिण्डः । अप उप स्पृश्य ॥ मूलपुरुषा—अत्र पितर्मादयस्व । एतत्ते वासः । वीरान्नः पितर्धेहि । पिण्डलेपं निवारयेत् ॥ पितामहादिभ्यः समालभनं गन्धः स्वधा । अर्घः स्वधा पुष्पं स्वधा दीपः स्वधा धूपः स्वधा भ-क्ष्यभोज्यफलमूलबलिनैवेद्यमाहारादि अन्नं स्वधा । तिलमधुमिश्रमुदकपात्रमाचमनीयं जलं स्वधा हि-मपानादि स्वधा ॥ पितः समानसपि—एष ते ग-

CC-0 Pulwama Collection. Digitized by eGangotri

न्धः, एष तेऽर्घः एतत्ते पुष्पम् । एष ते दीपः एष ते धूपः एष ते भक्ष्यभोज्यफलमूलबलिः । एतत्ते तिलमधुमिश्रमुदकपात्रमाचमनीयम् । एतत्ते हिमपानादि ॥ सव्येन । वसन्ताय नमः ६ । अपसव्येन । यास्तिष्ठन्ति । ऊर्जं वहन्तीरमृतं घृतं मधु पयः कीलालं परिस्रुतं स्वधास्थ पितॄन्मे तर्पयत ॥ पुनः यास्तिष्ठन्ति । ऊर्जं वहन्ती–स्वधास्थ पितरं मे तर्पयत ॥ ततः प्रेतपिण्डे प्रेतस्वरूपं ध्यात्वा तद्विष्णोरिति पुष्पद्वयं दत्त्वा ॥ "दत्त्वा पिण्डमथाग्राङ्कं ध्यात्वा प्रेतं सुभास्वरम् । सौवर्णरौप्यताम्रैश्च तंतुभिर्विभजेत्त्रिधा ॥" पिण्डं पितामहादीनां पिण्डेभ्यः प्रैतमर्पयेत् । अर्घैः पुष्पैस्तथा दीपैर्धूपैर्वस्त्रानुलेपनैः ॥ "त्रैधं करिष्ये" इत्युक्त्वा "ॐ कुरुष्व" इति ब्राह्मणवाक्यं श्रुत्वा । तं पिण्डं सौवर्णरौप्यताम्रयु-

CC-0 Pulwama Collection. Digitized by eGangotri

तैदर्भैयथाक्रमं विभज्याधस्तनभागं वसुपिण्डे, मध्यम भागं रुद्रपिण्डे, ऊर्ध्वभागमादित्यपिण्डे निधाय । संसृ जेत् ॥ अर्घ्योदकसंसर्गवत्पिण्डसंसर्गः ॥ मधु चाज्यं जलं चार्घः पुष्पं धूपं विलेपनम् । बलिं दद्याच्च विधिवत्पिण्डोष्टाङ्गो भवेद्यथा ॥ तिलास्तोयं । संसृजतु त्वा—वसुभ्यः स्वधा ॥ देवताभ्यः ३ अद्य तावत् । पृथिवी दर्विरक्षिता—अग्निरिव पृथिवीमुपजीवतं पितृपितामहौ एष वां पिण्डो ये चात्र वामन्वेषा वां स्वधा वसुभ्यः स्वधा सप्तम एष वां लेपः । अप उपस्पृश्य ॥ १ ॥ एवं । संसृजतु त्वा—रुद्रेभ्यः स्वधा देवताभ्यः ३ अद्यतावत्—अन्तरिक्षं दर्विरक्षिता—वायुरिव अन्तरिक्षमुपजीवतं पितृप्रपितामहौ एष वां पिण्डो येचाऽत्रवामन्वेषा वां स्वधा रुद्रेभ्यः स्वधा षष्ठ एष वां लेपः । अप उपस्पृश्य ॥ २ ॥ संसृजतु

CC-0 Pulwama Collection. Digitized by eGangotri

ता—आदित्येभ्यः स्वधा ॥ देवताभ्यः ३ अद्यतावत् द्यौर्दर्विरक्षिता—सूर्य इव दिवमुपजीवतं पितृवृद्धप्रपितामहौ एष वां पिण्डो ये चात्र वामन्वेषा वां स्वधा आदित्येभ्यः स्वधा पञ्चम एष वां लेपः अप उपस्पृश्य ॥ ३ ॥ स्त्रीविषये । पृथिवीदर्विरक्षिता मातृपितामह्यौ । अन्तरिक्षं दर्वि—मातृप्रपितामह्यौ । द्यौर्दर्वि—मातृवृद्धप्रपितामह्यौ । बहुवचने तु । पृथिवी दर्वि—अग्निरिव पृथिवीमुपजीवत मातृपितामह्यः एष वः पिण्डो ये चात्र वोन्वेषा वः स्वधा वसुभ्यः स्वधा सप्तम एष वां लेपः । अन्तरिक्षं दर्वि—वायुरिवान्तरिक्षमुपजीवत मातृप्रपितामह्यः एष वः पिण्डो ये चात्र वोन्वेषा वः स्वधा रुद्रेभ्यः स्वधा षष्ठ एष वो २ द्यौर्दर्वि—सूर्य इव दिवमुपजीवत मातृवृद्धप्रपितामह्यः एष वः पिण्डो ये चात्र वोन्वेषा वः स्वधा पञ्च-

CC-0 Pulwama Collection. Digitized by eGangotri

ते पात्रं द्यौरपिधानं ब्राह्मणस्य मुखेऽमृतं जुहोमि ऊर्गस्योर्जोदा ऊर्जं मे देहि ऊर्जं मयि धेहि अन्नं मे देह्यन्नं मयि धेहि अक्षितिरसि मा मे क्षिष्ठाऽमुत्रामुष्मिंल्लोक इह च ॥ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूढमस्य पांसुरे ॥ त्रीणि पदा विचक्रमे विष्णुर्गोपा अदाभ्यः । अतो धर्माणि धारयन् । विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पृशे । इन्द्रस्य युज्यः सखा ॥ तद्विष्णोः परमं पदं० । विष्णो हव्यं रक्षस्व ॥ विश्वेभ्योदेवेभ्योयथोपस्थितं दत्तं दास्यमानेन सह सव्यञ्जनममृतमन्नं नमः । नमो देवेभ्यः । अप [illegible]न । पितामहायाऽन्नं स्वधानमः ३ प्रपितामहायाऽन्नं स्वधानमः ३ वृद्धप्रपितामहायाऽन्नं स्वधानमः ३ । अन्नं मधु २ । इदं विष्णुर्वि । विष्णो इदं रक्षस्व ॥ पितामहाय यथोपस्थितं दत्तं—अमृ-

CC-0 Pulwama Collection. Digitized by eGangotri

तमन्नं स्वधा । स्वधा पितृभ्यः । प्रेतपात्रे । पितः समानस–एतत्तेऽन्नमेतत्तेमधु–इदं विष्णु–विष्णो इदं रक्षस्व ॥ पितः समानस० यथोपस्थितममृतमन्नमेतत्तेऽन्नम् ॥ सव्येन । पयः पृथिव्याः । दधि क्राव्णो । घृतवतीर्भुवनाना । मधुवाता ऋतायते । शर्कराभिरवकामव । पञ्चव्युष्टीरनु । पुरुषमेधः पुरुषस्य । सहस्रशीर्षा० । हिरण्यवर्णा हरिणीं ॥ तद्विष्णोः ॥ श्राद्धब्राह्मणं च ॥ अपसव्येन । ये केचिद्यत्र तत्रस्थाः प्रेतभागवशानुगाः । इति प्रेतभागं दत्त्वा । अद्यादिनेऽद्ययथासंकल्पा । सव्येन । शन्नोदेवी । पुरूरवायार्द्रवसवे विश्वेभ्योदेवेभ्योऽपोशानं नमः ॥ अपसव्येन । यास्तिष्ठन्ति–सुधया मदध्वम् । पितामहायादिभ्योऽपोशानं स्वधा । यास्तिष्ठन्ति–सुधया मदस्व । पितः समान–एतत्तेऽपोशानं । तिलमन्नं
CC-0 Pulwama Collection. Digitized by eGangotri

च पानीयं सकुशं तेषु चाग्रतः। विकिरेत्पितृभूतेभ्यो। जपन्नपहता इति । पितृपाके । अपहता असुरा रक्षांसि पिशाचा वेदिषदः प्राश्नन्तु भवन्तोऽमृतं जुषध्वममृतं भुञ्जीत ॥ प्रेतपाके । प्राश्नातु भवान् अमृतं जुषस्वामृतं भुंद्व ॥ सव्येन । यन्मे प्रकामा इति पितृब्राह्मणान् समीक्षमाणो जपति ॥ यन्मे प्रकामादुत वाप्यकामाद्ऽसमिद्धे ब्राह्मणेऽब्राह्मणे वा । यत्स्कन्दाति निर्ऋतिः पाथमुग्रामग्निष्टत्सर्वं शुन्धतु उशन्तस्तेन पितरो मदन्तां तेन पूतेन पितरो मादयन्ताम् । अहोरात्रैः ससन्धिकैरर्धमासैश्च मासैर्ऋतुभिः परिवत्सरैः संवत्सरस्य क्लृप्तिभिरन्तरन्यान्पितॄन्दधे । यद्वः प्रेत्ये । यत्ते क्रव्यादजहादेकमङ्गं पितृलोकं जनयञ्जातवेदाः । तद्व एतेन पुनराप्यायतामरिष्टासः पितरो मादयध्वम् ।

CC-0 Pulwama Collection. Digitized by eGangotri

स्वधां वहध्वममृतस्य योनिं यात्र सुधा पितरस्तां भजध्वम् (प्रेत्ये) पितस्तां भजस्व ॥ नारायणस्यार्षम् । मधुवाता ३ अन्तश्चरसि । ब्रह्मार्पणं । अपसव्येन । द्वयोर्भूप्रदेशयोः । दक्षिणाग्रान्दर्भानास्तीर्य । यास्तिष्ठन्ति । पितामहादिभ्यो भूपृष्ठेऽवनेजनं स्वधा । उशन्तस्त्वा हवामह उशन्तः समिधीमहि । उशन्नुशत आवह पितॄन्हविषे अत्तवे ॥ प्रेत्ये । यास्तिष्ठन्ति । पितः समानसपिण्डी एतत्तेऽवनेजनम् । उशन्तस्त्वा पितरं हविषे अत्तवे ॥ पितृचरोरन्नमुद्धृत्य । तिलास्तोयं । देवताभ्यः ३ अद्यतावत्, पृथिवी दर्विरक्षिता तृप्तिः स्वधाऽनुपदस्तां तां पृथिवीं दर्विमक्षितां तृप्तिं सुधामनुपदस्तां तामग्निरिव पृथिवीमुपजीव पितामह एष ते पिण्डः ये चात्र त्वान्वेषा ते स्वधा वसुभ्यः स्वधा षष्ट एष ते लेपः । अप

CC-0 Pulwama Collection. Digitized by eGangotri

उपस्पृश्य ॥ १ ॥ अन्तरिक्षं दर्विरक्षिता तृप्तिः स्वधाऽनुपदस्तां तामन्तरिक्षं दर्विमक्षितां तृप्तिं स्वधामनुपदस्तां वायुरिव अन्तरिक्षमुपजीव प्रपितामह अमुकामुकगोत्र एष ते पिण्डः येचात्र त्वान्वेषा ते स्वधा रुद्रेभ्यः स्वधा पञ्चम एष ते लेपः । अप उपस्पृश्य ॥ २ ॥ द्यौर्दर्विरक्षिता तृप्तिः स्वधाऽनुपदस्तां तां दिवं दर्विमाक्षितां तृप्तिं स्वधामनुपदस्तां सूर्य इव दिवमुपजीव वृद्धप्रपितामह एष ते पिण्डः येचात्र त्वन्वेषा ते स्वधा आदित्येभ्यः स्वधा चतुर्थ एष ते लेपः । अप उपस्पृश्य ॥ ३ ॥ मूलपुरुषा भूमिस्वामिनः पितरः! एष वः पिण्डः स्वधा, येच वोऽन्वऽत्र पितरो मादयध्वम् । येत्र पितरः प्रेता यूयं तेषां वासिष्ठा भूयास्थ य इह पितरो जीवा वयं तेषां वसिष्ठा भूयास्म ॥ एतानि वः पितरो

CC-0 Pulwama Collection. Digitized by eGangotri

मानाः सुमनसः पितरो यमराज्ये तेषां लोके स्वधा नमो यज्ञो देवेषु कल्पताम् । ये समाना सुमनसो जीवा जीवेषु मामकाः। तेषां श्रीर्मयि कल्पतामस्मिंल्लोके शतं समाः । समाना व आकूतानि समाना हृदयानि वः समानमस्तु वो मनो यथा वः समहासति । सं वो मनांसि संव्रताः समुच्चितान्याकरत् । अमी ये विव्रताः स्थ नस्तान्वः सन्नमयामसि वसुभ्यः स्वधेति प्रथमे । एवं संसृजतु त्वा—रुद्रेभ्यः स्वधेति द्वितीये । सं सृजतु—आदित्येभ्यः स्वधेति तृतीय । चतुर्ष्वपि। आपः क्षीरं । भगवन्तोर्घ्यं २ भगवन्नर्घ्यं २ पितृपितामहौ समानसपिण्डीकरणे श्राद्धे इदं वामर्घ्यं स्वधा "एवं" पितृप्रपितामहौ । पितृवृद्धप्रपितामहौ समान० । प्रेतपात्रात् पितः समानस० इदं ते अर्घ्यम् ।। पितामहाय स-

CC-0 Pulwama Collection. Digitized by eGangotri

मालभनं गन्धः स्वधा । पितः समानस-एष ते गन्धः ॥ सव्येनाचम्यापसव्येन । पितामहाय अर्घः स्वधा पुष्पं स्वधा । पितः समानस-एष तेऽर्घः एतत्ते पुष्पम् । पितामहाय दीपः स्वधा, धूपः स्वधा । पितः समानस-एष ते दीपः एष ते धूपः ॥ पितामहाय वासांसि स्वधा । पितः समान-एतत्ते वासः ॥ दक्षिणाग्रान्दर्भानास्तीर्य सव्येन शुन्धन्तां लोकाः । अपसव्येन । पितृषदनाः पितृषदनमसि पितृभ्यः स्थानमसि । पितृभ्यः गन्धादि-वासोन्तम् । पितामहस्य-अर्घ्यदानाद्यर्चनविधिः सर्वः परिपूर्णोस्तु ॥ आदित्या रुद्रा वसवो मे सदस्यास्तेषां सख्ये सुधया मदध्वं सुधां वहध्वममृतस्य योनिं यऽत्र स्वधा पितरस्तां भजध्वम् ॥ इति पितृब्राह्मणेषु ॥ पितः समानस-एष तेऽर्घ्यदानाद्य-

CC-0 Pulwama Collection. Digitized by eGangotri

र्चनविधिः सर्वः परिपूर्णोस्तु ॥ वसवो मे सदस्या-
स्तेषां सख्ये सुधया मदस्व । सुधां वहस्व अमृ-
तस्य योनिं याऽत्र सुधा पितस्तां भजस्व ॥ इति
प्रेतब्राह्मणे । सव्येन । इदमन्नं देवेभ्यः शृतमभि-
घार्य । अपसव्येन । इदमन्नं पितृभ्यः शृतमभि-
घार्य । इदं पित्रे शृतमभिघार्य । विष्णोर्मनसा पूते
स्थ इति द्वयोर्दर्भं पवित्रमुन्मृज्यावस्थाप्य प्रक्षाल्य
मूलतो मेक्षणमवदधाति ॥ श्रियै सोमवत्यै गन्धादि
श्रियं देवी० । अग्नावधिश्रित्य तत्रचाभिघार्य द-
क्षिणत उद्वास्य पुनश्चाभिघार्य । दक्षिणपश्चिमाग्रैः
स्तरैः यज्ञस्य सन्ततिरसीति स्तृणीयात् । अग्नौ
करवाणि ॐकुरु इत्युक्त्वा । पितृचरोः । ॐसो-
माय पितृमते स्वधानमः ॐअग्नये कविवाहनाय
स्वधानमः २ इत्यग्नौ आहुतिद्वयं हुत्वा । तूष्णीं

CC-0 Pulwama Collection. Digitized by eGangotri

पितृब्राह्मणपात्रेषु निक्षिपेत् ॥ ये मामकाः पितरः पार्थिवासो ये अन्तरिक्षे ये दिवि ये समुद्रे ये वाचमाहुवा अमृता बभूवुस्तेऽस्मिन्यज्ञे सर्वकामां-ल्लभन्ताम् । एतद्वः पितरो भागधेयं पात्रेषु द-त्तममृतं स्वधावत् । अक्षीयमाणमुपजीवत्वैनं मया प्रत्तं सुधया मदध्वम् । अयं यज्ञः परमोयः पितॄ-णां पात्रेषु देयं हविरद्यमग्नेः । मनश्च वाक्च पित-रो वः प्रदानैरश्विभ्यां प्रत्तं सुधया मदध्वम् । एषा व ऊर्गेषा वः स्वधा तामत्त च पिवत च मा च वः क्षिष्ठ येह पितर ऊर्ग्देवतासु तस्यै वयं ज्योग्जी-वन्तो भूयास्म आ मा स्वपक्वममृतं निविष्टं मया प्रत्तं सुधया मदध्वं क्षीरं घृतं वासिच्य ॥ "प्रेतचरोः"। प्रणवं मनसा ध्यात्वा " ॐॐ " इत्याहुतिद्वयमग्नौ हुत्वा । चूर्णं प्रेतब्राह्मणपात्रे निक्षिपेत् ॥ ये-

CC-0 Pulwama Collection. Digitized by eGangotri

मामकाः पितरः पार्थिवासो ये अन्तरिक्षे ये दिवि ये समुद्रे ये वाचमाप्त्वाऽमृताबभूवुः । तेऽस्मिन्यज्ञे सर्वकामांल्लभन्तां । एतत्ते पितर्भागधेयं पात्रेषु दत्तममृतं सुधावत् । अक्षीयमाणमुपजीवेनं मया प्रत्तं सुधया मदस्व । अयं यज्ञः परमो यः पितुः पात्रे देयं हविरग्र्यमग्नेः । मनश्च वाक्च पितस्ते प्रदानैरश्विभ्यां प्रत्तं सुधया मदस्व । एषा ते ऊर्गेषा ते सुधा तामद्धि च पिब च मा च ते क्षेष्ठ । येह पितऊर्ग्देवतासु तस्यै वयं ज्योग्जीवन्तो भूयास्म । आमास्व पक्वममृतं निविष्टं मया प्रत्तं सुधया मदस्व क्षीरं घृतं वासिच्य ॥ सव्येन । वैश्वेदेवहविषे पिन्वमानं विश्वेषु भूतेषु पृथग्निविष्टं मया प्रत्तं सुधया मदध्वं क्षीर घृत वासिच्य ॥ विश्वेभ्यो देवेभ्योऽन्नं नमः अन्नं नमः अन्न मधु २ पृथिवी

CC-0 Pulwama Collection. Digitized by eGangotri

दानाद्यर्चनविधिः सर्वः परिपूर्णोस्तु ॥ ओमासश्च-र्षणीधृतो विश्वेदेवास आगत । दाश्वांसो दाशुषः सुतम् ॥ उपयामगृहीतोसि विश्वेभ्यस्त्वा देवेभ्य एष ते योनिर्विश्वेभ्यस्त्वा देवेभ्यः ॥ विश्वेदेवास आगत शृणुताम इमं हवम् । इदं बर्हिर्निषीदत ॥ आपः प्रदाय अपसव्यं कृत्वा ॥ पितामहस्य प्रपितामहस्य वृद्धप्रपितामहस्य इदमासनं स्वधा ॥ पितः समानसपिण्डीकरणे श्राद्धे एतत्ते आसनम् । पितामहाय प्रपितामहाय वृद्धप्रपितामहाय "वा" पितामह्यै प्रपितामह्यै वृद्धप्रपितामह्यै ब्राह्मणं त्वा भोजयामि ओंभोजय । पितरेतत्ते ब्राह्मणं त्वां भोजयामि पितामहं प्रेतसहितं, प्रपितामहं प्रेतसहितं, वृद्धप्रपितामहं प्रेतसहितमावाहयिष्यामि ओंआवाहय ॥ तिलान्विकीर्य पैत्र्यं । श्राद्धानुवाकौ

CC-0 Pulwama Collection. Digitized by eGangotri

तूखानामार्षम् अपयन्त्वसुराः पितृरूपा ये रूपाणि प्रति-
मुच्याचरन्ति परापुरो निपुरो ये हरन्ति अग्निष्टांल्लो-
कान्प्रणुदत्वस्मान् । अपेतो यन्त्वसुरा ये पितृषदः
उदीरतामवर उत्परास उन्मध्यमाः पितरः सोम्या-
सः असुं य ईयुरवृका ऋतज्ञास्तेनोऽवन्तु पित-
रो हव्येषु एत पितरो मनोजवैरागच्छन्त पितरो म-
नोजवैः ये निखाता ये परोप्ता गर्भाद्येऽवपेदिरे सर्वा-
स्तानग्न आवह पितॄन्हविषे अत्तवे । आगच्छन्तु
पितरो मनोजवसः पितरः पितरः शुन्धध्वम् । आ
मे यन्तु पितरो भागधेयं विराजाहूताः सलिला-
त्समुद्रात् । अस्मिन्यज्ञे सर्वकामांल्लभन्तामत्तीयमा-
णानुपजीवत्वेनान् । अन्तर्दधे पर्वतैरन्तर्मह्या पृथि-
व्या दिवा दिग्भिरनन्ताभिरन्तरन्यान्पितॄन्दधे ॥
अन्तर्दधे ऋतुभिरहोरात्रैः ससन्धिकैः अर्धमासैश्च

CC-0 Pulwama Collection. Digitized by eGangotri

मासैर्ऋतुभिः परिवत्सरैः संवत्सरस्य क्लृप्तिभिश्चान्तरन्यान्पितॄन्दधे ॥ अथ "प्रत्ये" अपथन्त्वसुराः पितृरूपा ये रूपाणि प्रतिमुच्याचरन्ति परापुरो निपरो ये हरन्ति अग्निष्टांल्लोकान्प्रणुदत्वस्मात् । अपेतो यन्त्वसुरा ये पितृषदः उदीरतामवर उत्परास उन्मध्यमाः पितरः सोम्यास असुं य ईयुरवृका ऋतज्ञास्तेनोऽवन्तु पितरो हवेषु ॥ एहि पितर्मनोजवैरागच्छ पितर्मनोजवैः ये निखाता ये परोप्ता गर्भाद्येऽवपेदिरे सर्वास्तानग्न आवह पितॄन्हविषे अत्तवे ॥ आगच्छ पितर्मनोजवः पितः पितः शुन्धस्व आ मे यन्तु पितरो भागधेयं विराजाहूताः सलिलात्समुद्रात् अस्मिन्यज्ञे सर्वकामांल्लभतां अक्षीयमाणानुपजीविनान् ॥ अन्तर्दधे पर्वतैरन्तर्मह्या पृथिव्या दिवा दिग्भिरनन्ताभिरन्तरन्यान्पितॄन्दधे । अन्तर्दधे ऋतुभिरहो-

CC-0 Purwama Collection. Digitized by eGangotri

रात्रैः ससन्धिकैरर्धमासैश्च मासैर्ऋतुभिः परिवत्सरैः संवत्सरस्य क्लृप्तिभिरन्तरन्यान्पितॄन्दधे ॥ "पितृपात्रे" यास्तिष्ठन्ति या धावन्ति या अद्रुग्धाः परिसस्रुषीः अद्भिर्विश्वस्य धत्रीभिरन्तरन्यान्पितॄन्दधे । अमृता वागमृता आपोऽग्निर्वाचोऽमृतं तात्त्रिवृदेकधाम ताभिर्मत्प्रत्ताभिः स्वधया मदध्वम् । इहास्मभ्यं वसीयोऽस्तु देवा यन्मे माता प्रलुलोभ यश्चचारानुव्रतं तन्मे रेतः पिता वृंक्तां माभूरन्योऽवपद्यताम् "इति प्रथमे १"। यास्तिष्ठन्ति—यन्मे पितामही—पितामहो वृंक्तां "इति द्वितीये २"। यास्तिष्ठन्ति—यन्मे प्रपितामही प्रपितामहो वृंक्तां "इति तृतीय पात्रे ३" ॥ 'प्रेतपात्रे' यास्तिष्ठन्ति—स्वधया मदस्व—यन्मे माता—पिता वृंक्तां ॥ लाजाश्च । भगवन्तः "वा" भगवत्यः पाद्यं २ 'इति पितृषु' । भगवन् "वा" भगव-

CC-0 Pulwama Collection. Digitized by eGangotri

ति पाद्यं २। पितामहाय "वा" पितामह्यै प्रपिता० वृद्धप्रपि०। पाद्यं स्वधा। पितः "वा" मातः समानसपिण्डीकरणे श्राद्धे एतत्ते पाद्यम्। शेषं निवार्य। सव्येनाऽऽचम्य ऽपसव्येन। यास्तिष्ठन्तीति षट्। यास्तिष्ठन्ति—यन्मे मातेति प्रथमे १ यास्तिष्ठन्ति—यन्मे माता। यन्मे पितामहीति द्वितीये २, यन्मे माता। यन्मे पितामही। यन्मे प्रपितामहीति तृतीये ३। यास्तिष्ठन्ति—स्वधया मदस्व—यन्मे मातेति प्रेतपात्रे॥ आवाहनं तथा चार्घं पिण्डदाने तथात्रये। चतुर्षु प्रक्षिपेत्प्रेतं पितृयज्ञे विधानतः॥ गन्धोदकतिलैर्मिश्रं कुर्यात्पात्रचतुष्टयम्। अर्घ्यार्थं पितृपात्रेषु प्रेतपात्रं प्रसेचयेत्॥ धातुत्रयेण सह प्रेतपात्राज्जलं निष्कर्षयित्वा। सं सृजतु त्वा पृथिवीर्वायुरग्निः प्रजापतिः संसृजध्वं पूर्वेभिः पितृभिः सह। ये स-

CC-0 Pulwama Collection. Digitized by eGangotri

ये ॥ अपूपचरौ ॥ अग्नये शुचये अग्नये पवमानाय अग्नये तन्तुमते अग्नये पथिकृते ॥ अपूपचरौ अग्नये अष्टकादेवतायै जुष्टं निर्वपामि एवं प्रोक्षामि ॥ आज्यभागान्तम् । कूष्माण्डं तद्ब्राह्मणं च हुत्वा प्रधानं । तेजोसि । अग्नये स्वाहा वायवे सूर्याय ब्रह्मणे प्रजापतये कूष्मर्षिभ्यः स्वाहा ६ । स्रुवेणाज्यहोमः । अग्नये जनिविदे स्वाहा । आयुषः प्राणमित्येका० । तेजोसि । आकूतं चा । तेजोसि । बृहस्पतिपुरोहिता । सुवर्ण ऋता षडिति ॥ अग्निर्भूतानामित्येकविंशमधिपत्यमीत जुहोति । हिरण्यगर्भ इत्यष्टाभिः ॐभूः स्वाहा । अग्न आयूंषि । अग्निर्ऋषि । अग्ने पवस्व ॥ अक्षतचरु ॥ अग्निं पुष्टिपतिं प्रजापतिं च यजेत । आग्निना रयिं १ प्रजापते २ ॥ तृतीयचरु ॥ उदग्ने शुचय । अग्ने पवस्व । त्वं नस्तन्नु । अग्ने नय ।

CC-0 Pulwama Collection. Digitized by eGangotri

अष्टकाप्रधानं ऋतूनां पती । ऋतस्य धामा । देवा ग्रावाणो ॥ अष्टकानुवाकौ तूखानामार्षम् ॥ इयमेव सा या १ छन्दस्वतीरुषसौ २ ऋतस्य पन्थामनु ३ चतुष्टोमम ४ पञ्चभिर्धाता ५ । ऋतुतिथिः । नैत्रे घम् । घृतेन । तेजोसि । अग्ने त्वं पारयानव्येति च इळाभागं हुत्वा ॥ वैश्वानरेति पावमान्यब्राह्मणेन चोपस्थानम् । यद्देवा देवहेळनमित्यञ्जलिः । सौत्रामन्या तावत् ॥ वैश्वानरेण पूयमानेन चेति तर्पणम् । अनेन मन्त्रहोमेण अग्निः प्रीयतां अग्निः प्रीतोस्तु ६ ॥ हुतमेक्षणादि ॥ इत्येकधः उद्वाहाष्टकाविधिः ॥ ॥

ॐ श्रीमान्नमः
ॐ श्री श्री

CC-0 Pulwama Collection. Digitized by eGangotri

अथ सापिण्डीकरणश्राद्धविधिः ॥

शालिचूर्णेन ब्रह्मकलशमुल्लिख्य नेत्रेशद्वयं च संस्थाप्य । अभि नो देवी-वषट् ते विष्णु तावत् । अष्टकाप्रदानम् ऋतूनां पत्नी । ऋतस्य धामा । देवा ग्रावाणो ॥ ॐ तद्विष्णोः विष्णुपञ्चायतनदेवताभ्यो नमः । अर्चन्तस्त्वा० ॥ यजमानमानीय । आसनशोधनं । अ नाभौ ॥ तीर्थे स्नेयं । यत्रास्ति माता । अद्यतावत् महागणपतये अष्टकादेवतायै विष्णुपञ्चायतनदेवताभ्यः । दीपोनमः धूपोनमः । अपसव्येन । समस्तमातापितृभ्यः दीपः स्वधा ॥ पुनः अद्यतावत् पितामहाय प्रपितामहाय वृद्धप्रपितामहाय दीपः स्वधा ॥ कुम्भो वनिष्ठुर्जनिता शचीभि । अद्यतावत् पितः वा मातः समानसापिण्डी-

CC-0 Pulwama Collection. Digitized by eGangotri

करणे श्राद्धे एष ते दीपः ॥ सव्येन विष्णुपूजादिसहितां कलशपूजां श्लोकतर्पणादि च विधाय वैश्वदेवव्याहृत्यष्टकां च सम्पाद्य, उदङ्मुखांश्चतुरो ब्राह्मणान् पित्रर्थे त्रीन् प्रेतार्थमेकम् प्राङ्मुखौ द्वौ विश्वेदेवार्थे चोपविश्य श्राद्धमारभेत् ॥ सव्येनाचम्य ॥ श्राद्धकाले गयां ध्यात्वा ॥ शान्ताकारं भुजगशयनं ॥ ॐ गायत्र्यै नमः ॐभूर्भुवःस्वः ३ अपसव्येन देवताभ्यः पितृभ्यश्च ३ अद्यतावत् पितामहस्य प्रपितामहस्य वृद्धप्रपितामहस्य पितुः अमुकस्यामुकगोत्रस्य समानसपिण्डीकरणं "वा" सांवत्सरिकसमानसपिण्डीकरणं वैश्वदेवाष्टकपूर्वकं सान्वष्टक्यं श्राद्धं ब्राह्मणपूजनमर्चामहं करिष्ये ओंकुरुष्व ॥ तिलान्विकीर्य । अग्निं परिसमुह्य ६ निहन्मि सर्वं यदमेध्यवद्भवेद्धताश्च सर्वे सुरदानवाः मया । रक्षांसि यक्षाः सपिशाचगुह्यका-

CC-0 Pulwama Collection. Digitized by eGangotri

हता मया यातुधानाश्च सर्वे ॥ सव्येन । पुरूरव-
स्यार्द्रवसोः विश्वेषां देवानामिदमासनं नमः पुरू-
रवाय आर्द्रवसवे विश्वेभ्यो देवेभ्यः ब्राह्मणंत्वां भो-
जयामि ओंभोजय । पुरूरवं आर्द्रवसुं विश्वान् दे-
वान् आवाहयिष्यामि ओंआवाहय । यवान्विकीर्य ।
आगच्छन्तु महाभागा विश्वेदेवा वरप्रदाः । ये येऽत्र
विहिताः श्राद्धे सावधाना भवन्तु ते ॥ शन्नोदेवी ।
लाजाश्च । भगवन्तः पाद्यं २ पुरूरवाय आर्द्रव-
सवे विश्वेभ्यो देवेभ्यः पाद्यं नमः । शेषं निवार्य ।
पुनः शन्नोदेवी । आपः क्षीरं । भगवन्तः अर्घ्य-
म् २ पुरूरव आर्द्रवसो विश्वेदेवा इदं वोर्घ्यं न-
मः ॥ पुरूरवाय आर्द्रवसवे समालभनं गन्धो नमः
अर्घो नमः पुष्पं नमः दीपो नमः धूपो नमः वासो
नमः । पुरूरवस्य आर्द्रवसोः विश्वेषान्देवानामर्घ्य-

CC-0 Pulwama Collection. Digitized by eGangotri

पर्युक्ष्य ६ इत्येतत्साधनाङ्गं कुर्यात् कृत्वा च ॥ पुनः गेहाग्नेरग्निमुद्धृत्य । अपसव्येन । प्रणयेत् । सव्येन परिसमूह्य पर्युक्ष्य ६ । पुनः तृतीयं गेहाग्नेरग्निमुद्धृत्य स्थापयित्वा प्रथमं गेहाग्निमेव परिसमूह्य पर्युक्ष्य ६ अपसव्येन प्रणयेत् । सव्येन परिसमूह्य पर्युक्ष्य ६ अपसव्येन त्रयाणामपि खराग्नीनां प्रत्येकं परिसमूह्य पर्युक्ष्य परिषिच्य ६ दक्षिणपाश्चिमाग्रैःस्तरैःस्तृणामि यज्ञस्य० एतद्धोमाङ्गं कथ्यत । द्वितीयस्य ६ तृतीयस्य च कृत्वा । ततोऽवेक्ष्य कर्षाः ३ । कर्षूषु दक्षिणाग्रान्दर्भानास्तीर्य । तिलजलैरभ्युक्ष्य । प्रणवं मनसा ध्यात्वा खराग्निष्वाहुतिद्वयं द्वयं पितृयज्ञे जुहुयात् ओंओं २ । ततोऽर्धचरुमुद्धृत्य । तिलास्तोयं । कर्षूषु त्रिषु पिण्डत्रयं दद्यात् । एतत्ते तत वा मातः ३ । अ-

CC-0 Pulwama Collection. Digitized by eGangotri

१ उपस्पृश्य ३ प्रथमामन्नस्यान्नेन पूरयेत् । दाधि-
मधुभ्यामिति द्वितीयाम् । घृतमांसेन भृतेन श्रापाके-
नेति तृतीयाम् ॥ पुंसां मज्जां स्त्रीषु सुरां विवर्जयेत्
मज्जामुपनिनीय ३ वोपनयेत् ॥ गौडी पैष्टी तथा
माध्वी विज्ञेया त्रिविधा सुरा । यथैवैका तथा सर्वा
न पातव्या द्विजातिभिः ॥ सुरामुपनिनीय ३ वोपनयेत्
दुग्धेन चीरेण दुग्धेनाभितः परिषिच्य ३ सक्तवः
सर्पिषाऽभ्यक्ताः चीरोदकपरिप्लुताः । नातिद्रवा ना-
तिघना मन्थाइत्यभिधीयते । मन्थेनाभितः परिषि-
च्य ३ ये चात्र सन्निहिताः स्युर्दधिमधुघृतादयः तै-
रपि परिषिच्य ॥ एतत् भवते (वा) भवत्यै ३ ॥ तृप्यतु
भवान् (वा) भवती ३ ॥ अत्र पितः (वा) मातर्मा-
दयस्व ३ अन्त्ये स्वरे मेचणं त्याज्यम् ॥ सव्येन
उदङ्ङासीनः प्राणायामः । नमो वः पितरो म-

CC-0 Purwanna Collection. Digitized by eGangotri

न्यवे इत्युपस्थानम् ॥ अपसव्येन खराग्नीन्विमुच्य परिस्तरणान्यनुप्रहृत्य प्रत्येकस्य पुष्पम् । अग्न आयूंषि, १ अग्निर्ऋषिः, २ अग्ने पवस्व ३ ॥ तेजोसि तेजो मयि देहीति ॥ सव्येन गेहाग्निं परिसमूह्य पर्युक्ष्य परिषिच्य ६ परिस्तीर्य ४ अग्नये स्वाहा, प्रजापतयेस्वाहेत्यादिधारणाः "पत्तयागसंस्थापने" पात्तिका दत्त्वा । विमुच्य । नयामि । पुनः परिसमूह्य पर्युक्ष्य ६ ॥ अचित्याग्निश्चिकिति ॥ पत्तयागत्यागे तु अग्नये स्वाहा प्र०, सू०, प्र०, इति चतुष्टयमेव दत्त्वा । विमुञ्चामि नयामि । धर्मं देहि ॥ कलशपृच्छां विसर्ज्यं ॥ यवोदकं नमः । आपन्नोस्मि । क्षमध्वं । नमो ब्रह्मणे । बलिः विभीषणो । आरूचिं स्थापयित्वा । पात्राणि चालयेत् ॥ सव्येनाचम्य । उदकलशं । अपसव्येन । अद्यतावत् पितुः तस्य परलोके पाद-

CC-0 Pulwama Collection. Digitized by eGangotri

दाहादिदोषनिवारणार्थं तृणासनं तृणपादुकं काष्ट-पादिकां अग्निभाण्डं दण्डं च ददानि ॥ सव्येन । अनन्तशाखकल्पाय ॥ इत्येकोद्दिष्टश्राद्धविधिः ॥

प्रथममासिके द्वितीये इत्यादि पृथक् पृथक् मासि-केषु गोप्रदानं विनैवमेव सर्वं कार्यम् । ऊनषाण्मासिके नवमे तु छत्रदाननौकादानौ चाधिकौ । कलशेऽपिछत्र-दानार्थं च चतुर्वेदेश्वररेखा चोल्लेख्या । प्रदानेष्वपि । इन्द्रं कुत्सो वृत्रहणं । अग्निमीळे । इषे त्वोर्जे त्वा । अग्न आयाहि । शन्नो देवी । इति विशेषः ॥ ॥

अथैकधा उद्वाहाष्टकयोर्विधिः ॥ पात्रं तिला० पुर-स्तात्० व्याहृति० हन्त मनुष्येभ्यः सनकादिभ्य आचमनीयं नमः । पुनरग्निं परिसमूह्य ६ आदौ प-श्च० । अपूपचरौ अग्नये वायवे सूर्याय ब्रह्मणे प्रजापतये कूष्माण्डेभ्यः ॥ [illegible]चरौ । अग्नये पृथिपतये प्रजापत-

CC-0 Pulwama Collection. Digitized by eGangotri

षतामन्नमन्नम् । सहस्रधारममृतोदकं मे पूतमस्त्वे-
तत्परमे व्योमन् ॥ देवतायै बलिमुपहरेत् । अमृ-
तमस्तु सावित्राणि महागणपतये ब्रह्मणे ८ अ-
ग्निष्वात्तादिभ्यः पितृगणदेवताभ्यः ओं नमो नैवे-
द्यं । अपसव्येन । नान्नं विकिरेत् । तिलदर्भक्षीर-
मेकीकृत्य विकिरेत् । स्वदितं सुस्वदितं । तृप्यतु-
भवान् "वा" भवती । तृप्तोस्मि "वा" तृप्तास्मि ।
पिता वा माता तृप्यतु ॥ सव्येनाचम्य ॥ अपसव्येन
पितः एको एतत्ते आचमनीयम् ॥ यन्मे राम
इत्यर्धप्रदक्षिणेन प्रत्येत्य । यन्मे रामः शकुनिः श्वा-
पदश्च यन्मे शुचिर्मन्त्रकृतस्य प्राशत् । वैश्वानरः स-
विता तत्पुनातु तस्मिन्पूते देवता मादयन्तां तेन
पूतेन पिता मदताम् ॥ यास्तिष्ठन्ति ॥ पितः ए-
को एतत्ते दक्षिणायै तिलहिरण्यरजतनिष्कर्णं द-

CC-0 Pulwama Collection. Digitized by eGangotri

दानि ॥ अभिरमतु भवान् अभिरतोस्मि पितरेत-त्पूतं मेऽत्रोपजीवास्मिंल्लोके मां धेहि जीवेम शरदःशतं पश्येम शरदःशतमऽथास्मभ्यमूर्जन्धेहि ज्योतिर्धेह्यऽजरन्न आयुः । यदन्तरिक्षं पृथिवीमुत द्यां यत्पितरं मातरं वा जिहिंसिम । अग्निर्नस्तस्मादेनसो गार्हपत्यः प्रमुञ्चतु चकृम यानि दुष्कृताः ॥ तृप्यतु भवान् वा भवती पिता वा माता तृप्यतु चद्वोप्रदाने विष्णुप्रतिमादानं कृतं न स्यात् तदाऽत्राऽदौ क्षेत्रेशबलिः । अन्यथा स्वस्थाने । सव्येन । विष्णुप्रतिमाच्छिद्रम् ॥ अपसव्येन । दानप्रतिष्ठामादौ पश्चाज्जलकुम्भदानमिति व्यवस्था ॥ कलशं शुभदं दिव्यं जलेन परिपूरितम् । तस्मात्कलशदानेन मम सन्तु मनोरथाः ॥ घोरायां यमपन्थायां क्षुत्तृष्णोपहतात्मनाम् । तेषामुदरणार्थाय सान्नकुम्भं दधाम्यहम् ॥

CC-0 Pulwama Collection. Digitized by eGangotri

सावित्राणि । अद्यतावत् पितुः एकोद्दिष्टे तस्य परलोके क्षुत्पिपासादिपीडानिवारणार्थमिमं जलकुम्भं सान्नंसवाससं ददानि ॥ सव्येन । विष्णुप्रतिमाप्रतिपादनम् ॥ अपसव्येन । नित्यकुम्भदानम् ॥ ततोऽक्षयम् । पितरं वा मातरं एतत्ते एकोद्दि० दत्तमन्नमक्षयमुपतिष्ठतामिदमन्नमक्षयमुपतिष्ठतु ॥ नाशिषो वृणायात् ॥ सव्येन । ओंगायत्र्यै नमः ३ अपसव्येन ॥ देवताभ्यः ३ अद्यतावत् पितुः आद्यमौर्ध्वदैहिकं प्रथमं एकोद्दिष्टंश्राद्धं वैश्वदेवाष्टकापूर्वकं सान्वष्टक्यं ब्राह्मणपूजनमच्छिद्रं सम्पूर्णमस्तु एवमस्तु ॥ विमुच्य । नयामि । सव्येनाऽग्निं परिसमूह्य पर्युक्ष्य ६ । केचिदत्रैवान्वष्टकां कुर्वन्ति ॥ अपसव्येन । आदौ नित्यकुम्भं समापयेत् । अद्यतावत् पितः एकोद्दिष्टे श्राद्धे तस्य परलोके क्षुत्पिपासादिपीडानिवारणार्थं सोदकुम्भा-

CC-0 Pulwama Collection. Digitized by eGangotri

न्नदानसहिते नित्यकुम्भे एतत्ते तिलोदकमेतत्ते उदकतर्पणम् ॥ पुनः अद्यतावत् पितः एतत्ते तिलोदकमेतत्ते उदकतर्पणम् ॥ सव्येन । ततोगवां ग्रासादि । या काश्चिद्यो० । सौरभया० । योऽस्मिन्निवसति० । अपसव्येन । तद्विष्णोरिति प्रतिपिण्डं पुष्पद्वयम् ॥ अथान्वष्टका । सव्येन । विमुञ्चामि ३ पुनः अग्निं परिसमूह्य पर्युक्ष्य ॥ "गेहाग्नेर्दक्षिणतस्तिस्रः कर्षूः दक्षिणायताः पूर्वापराः प्रादेशमात्रीश्चतुरङ्गुलपृथ्वीस्तावदन्तरास्तावदवखातास्तासां दक्षिणतः खरांश्च संस्थाप्य ॥" अपसव्येन । इदं पित्रे भृतमभिघार्य । प्रक्षाल्य मूलतो मेक्षणमवदधाति । अग्नावधिश्रित्य तत्रचाभिघार्य दक्षिणत उद्वास्य पुनश्चाभिघार्य ॥ सव्येन । गेहाग्नेरग्निमुद्धृत्य । अपसव्येन । खराग्निं प्रणयेत् । यं यं प्रणयेत्तत । सव्येन परिसमूह्य

CC-0 Pulwama Collection. Digitized by eGangotri

क्राव्णो अकारिषं } घृतवतीर्भु, मधुवाता ऋतायते, शर्कराभिर, पञ्चन्युष्टीरनु, पुरुषमेधः पुरुषस्य नारायणस्यार्षम् । सहस्रशीर्षा ॥ तद्विष्णोः पर । अपसव्येन । ये केचिद्यत्र तत्रस्थाः प्रेतभागवशानुगाः । इहैव भूमौ ते सर्वे मद्दत्तमुपभुज्यतामिति ॥ तिलदर्भेषु प्रेतभागं दत्त्वा ॥ अद्यादिनेऽद्य यथा० । यास्तिष्ठन्ति । पितः एकोद्दिष्टे श्राद्धे एतत्ते अपोशानम् ॥ अपहता असुरा रक्षांसि पिशाचा वेदिषदः प्राश्नातु भवान् । "स्त्रीविषये" (भवती) अमृतं जुषस्व अमृतं भुंक्ष्व । सव्येन । यन्मे प्रकामादिति समीक्षमाणोजपति ॥ यन्मे प्रकामादुत वाप्यकामादऽ समिद्धे ब्राह्मणे ब्राह्मणे वा । यत् स्कन्दति निर्ऋतिपाथ उग्रामग्निष्टत्सर्वं शुन्धतु उशंस्तेन पिता मदतां तेन पूतेन देवता मादयन्ताम् । ब्रह्मोत्मनैः स-

CC-0 Pulwama Collection. Digitized by eGangotri

सन्धिकैरर्धमासैश्च मासैर्ऋतुभिः परिवत्सरैः संवत्स-
रस्य क्लृप्तिभिरन्तरन्यान्पितॄन्दधे । यत्ते क्रव्यादज-
हादेकमङ्गं पितृलोकंजनयञ्जातवेदाः । तत्ते एतेन
पुनराप्यायतामऽरिष्टासः पितर्मादयस्व सुधां वहस्व
अमृतस्य योनिं याऽत्र सुधा पितस्तां भजस्व ॥
नारायणस्यार्षम् । मधुवाताऋतायते । अन्तश्चरसि
भूतेषु । ब्रह्मार्पणं । अमृतोपस्तरणमसि स्वाहा ॥
इत्याचम्य । प्राणाय स्वाहा अपानाय समानाय
उदानाय व्यानाय स्वाहा ॥ ॐभूरग्नये पृथिव्यै
महते जातवेदसे स्वाहा । ॐभूवो वायवेऽन्तरिक्षाय
म० । ॐस्वः सूर्यायाकाशाय म० । ॐभूर्भुवःस्व
श्चन्द्रमसे हरिद्भ्यो महते० । विप्रेषु तृप्तिमागतेषु ।
अपसव्येन ॥ दक्षिणाग्रन्दर्भानास्तीर्य । दक्षिणामुखः
यास्तिष्ठन्ति । पितः एकोद्दि० एतत्तेऽवनेजनम् ॥

CC-0 Pulwama Collection. Digitized by eGangotri

उशन्तस्त्वा हवामहे उशन्तः समिधीमहि । उश-
न्नुशत आवह पितरं हविषे अत्तवे ॥ वामजानुं
भूमौनिधाय । तिलास्तोयं ॥ ॐदेवताभ्यः पितृभ्यश्च
३ अद्यतावत् पृथिवी दार्विराद्दिता तृप्तिः सुधाऽनुपद-
स्तां तां पृथिवीं दर्विमद्दितां तृप्तिं सुधामनुपदस्ता-
म् अग्निरिव पृथिवीमुपजीव पितः अमुकामुकगोत्र
आद्यमौर्ध्वदैहिके प्रथमे, एकोद्दिष्टे श्राद्धे एष ते पि-
ण्डः । अपउपस्पृश्य । एवं । देवताभ्यः । अद्यतावत्
पृथिवी । पितः प्रथममासिके द्वितीये एकोद्दिष्टे एष ते
पिण्डः अपउपस्पृश्य । १६ वा १७ पिण्डान्दत्वा मूलपु-
रुषा भूमिस्वामिनः पितर एष वः पिण्डःस्वधाये च
वोन्वऽत्र पितर्मादयस्व येऽत्र पितः प्रेतास्त्वान्तेऽनु
य इह पितर्जीवा अस्मांस्तेऽनु येऽत्र पितः प्रेतास्त्वं
तेषां वसिष्ठो भूयाः य इह पितर्जीवा वसं तेषां वर्षिष्टा
CC-0 Pulwama Collection. Digitized by eGangotri

भूयास्म ॥ एतत्ते पितः वासः । अतो नोन्यन्पितर्मा यूथाः । वीरान्नः पितर्देहि । पिण्डलेपं निवारयेत् । पितः आद्यमौ० एष ते गन्धः । एष तेऽर्घः । एतत्ते पुष्पं । एष ते धूपः । एष ते दीपः । एष ते भक्ष्यभोज्यफलमूलबालिः । एतत्ते तिलमधुमिश्रमुदकपात्रमाचमनीयम् । पितः एतत्ते हिमपानं एतत्ते क्षीरपानं एतत्ते मधुपानं एतत्ते तिलोदकम् । एतत्ते उदकतर्पणं हिमं २ रजतं २ ॥ सव्येनाचम्य । वसन्ताय नमः ६ ॥ अपसव्येन ॥ यास्तिष्ठन्ति ॥ ऊर्जं वहन्तीरमृतं घृतं मधु पयः कीलालं परिस्रुतं सुधा स्थ पितरं मे तर्पयत ॥ सर्वमन्नादिकं संपूज्य । अद्यतावत् पितः एकोद्दिष्टे पाथेयं पथि श्रमनिवारणार्थमेतत्ते नित्यान्नम् ॥ सव्येन । मा मेत्तेष्टा बहु मे पूतमस्तु ब्रह्मणो मे जु-

CC-0 Pulwama Collection. Digitized by eGangotri

र्थं । पञ्चपाक्षिकं पञ्चमं । तृतीयमासिकं षष्ठं । चतुर्थमासिकं सप्तमं । पञ्चमासिकं अष्टमं । ऊनषाण्मासिकं नवमं । षाण्मासिकं दशमं । सप्तममासिकं एकादशं । अष्टममासिकं द्वादशं । नवममासिकं त्रयोदशं । दशममासिकं चतुर्दशं । एकादशमासिकं पञ्चदशं ऊनसांवत्सरिकं षोडशं (मले तु) द्वादशमासिकं षोडशं ऊनसांवत्सरिकं सप्तदशं एकोद्दिष्टं श्राद्धं विश्वदेवाष्टकपूर्वकं सान्वष्टक्यं ब्राह्मणपूजनमर्चामहं करिष्ये ॐकुरुष्व ॥ तिलान्विकीर्य ॥ अग्निं परिसमूह्य ६ निहन्मि सर्वं यदमेध्यवद्भवेद्भूताश्च सर्वे सुरदानवा मया । रक्षांसि यक्षाः सपिशाचगुह्यकाः हता मया यातुधानाश्च सर्वे ॥ पितुः आद्यमौर्ध्वदैहिके एकोद्दिष्टे श्राद्धे एतत्ते आसनम् ॥ पितः आद्यमौर्ध्वदैहिके एतत्ते

CC-0 Pulwama Collection. Digitized by eGangotri

ब्राह्मणान्त्वां भोजयामि । नावाहनं। तिलान्विकीर्य॥
अपयन्त्वसुराः पितृरूपा ये रूपाणि प्रतिमुच्याच-
रन्ति । परापुरोनि परो ये हरन्ति । अग्निष्टांल्लो-
कान्प्रणुदत्वस्मात् अपेतो यन्त्वसुरा ये पितृषदः।
उदीरतामवराउत्परास उन्मध्यमाः पितरः सोम्यास
असुंय ईयुरवृका ऋतज्ञास्ते नोऽवन्तु पितरो हवे-
षु ॥ एहि पितर्मनोजवैरागच्छ पितर्मनोजवैः । ये
निखाता ये परोप्ता गर्भाद्येऽवपेदिरे । सर्वास्तानग्न
आवह पितॄन्हाविषे अत्तवे ॥ आगच्छ पितर्मनोज-
वाः पितः पितः शुन्धस्व । आ मे यन्तु पित-
रो भागधेयं विराजा हूताः सलिलात्समुद्रात्। अ-
स्मिन्यज्ञे सर्वकामांल्लभतां अक्षीयमाणानुपजीवत्वे-
नान् ॥ अन्तर्दधे पर्वतैरन्तर्मह्या पृथिव्या दिवा
दिग्भिरनन्ताभिरन्तरन्याभिपत्नदधे । अन्तर्दधे ऋ-

CC-0 Pulwama Collection. Digitized by eGangotri

तुभिरहोरात्रैः ससन्धिकैरर्धमासैश्चमासैर्ऋतुभिःपरिव-त्सरैः संवत्सरस्य कॢप्तिभिरन्तरन्यान्पितॄन्दधे ॥ यास्तिष्ठन्ति या धावन्ति या अद्रुग्धा परिसस्रुषीः, अद्भिर्विश्वस्य धत्रीभिरन्तरन्यान्पितॄन्दधे । अमृता वागमृता आपोऽग्निर्वाचोमृतं तत्त्रिवृदेकधाम ताभि-र्मत्प्रत्ताभिः सुधया मदस्व । इहास्मभ्य वसीयो-स्तु देवा यन्मे माता प्रलुलोभ यश्चचारानुव्रतं तन्मे रेतः पिता वृंक्तां माभूरन्योवपद्यताम् ॥ लाजाश्च ॥ भगवन् वा भगवति पाद्यम् २ । पितः वा मातः आद्यमौर्ध्व एतत्ते पाद्यम् ॥ शेषं निवार्य। सव्येनाचम्य । अपसव्येन ॥ पुनः यास्तिष्ठन्ति । आपः क्षीरं । भगवन् (वा) भगवति अर्घ्यं २ पितः आद्यमौर्ध्वदैहिके एतत्ते अर्घ्यम् ॥ पवित्रं निवार्य। पितः आद्यमौर्ध्वदैहिके एकोद्दिष्टे श्राद्धे एष ते ग-

CC-0 Pulwama Collection. Digitized by eGangotri

न्धः । सव्येनाचम्य । अपसव्येन । पितः एषतेऽर्घः एतत्ते पुष्पं एषते दीपः एषते धूपः । एतत्ते वासः ॥ पितुरमुकस्यामुकगोत्रस्य आद्यमौर्ध्व एषते अर्घ्यदानाद्यर्चनविधिः सर्वः परिपूर्णोस्तु ॥ वसवो मे सदस्यास्तेषां सख्ये सुधया मदस्व सुधां वहस्व अमृतस्य योनिं याऽत्र सुधा पितस्तां भजस्व ॥ इदं पित्रे शृतमभिघार्य । प्रक्षाल्य तण्डुलान्पवित्रान्तर्हितानावपति । प्रक्षाल्य मूलतो मेक्षणमवदधाति ॥ अग्नावधिश्रित्य तत्र चाभिघार्य दक्षिणतः उद्वास्य पुनश्चाभिघार्य । यज्ञस्य सन्ततिरसीति दक्षिणपश्चिमाग्रैःस्तरैः परिस्तीर्य ॥ श्रियै सोमवत्यै गन्धादि । श्रियन्देवी ॥ प्रणवं मनसा ध्यात्वा तूष्णीमाहुतिद्वयमग्नौ जुहुयात् ओंओं पात्रेषु निक्षिपेत् ॥ येनामकाः पितरः पार्थिवासो ये

CC-0 Pulwama Collection. Digitized by eGangotri

अन्तरिक्षे ये दिवि ये समुद्रे ये वाचमाप्त्वाऽमृता बभूवुः । तेस्मिन्यज्ञे सर्वकामांल्लभन्ताम् । एतत्ते पितर्भागधेयं पात्रेषु दत्तममृतं सुधावत् । अक्षीयमाणमुपजीवनन्मया प्रत्तं सुधया मदस्व । अयं यज्ञः परमो यः पितुः पात्रेषु देयं हविरग्र्यमग्नेर्मनश्च वाक्च पितस्ते प्रदानैरश्विभ्यां प्रत्तं सुधया मदस्व । एषा ते ऊर्गेषा ते सुधा तामद्धि पिबच माच तेक्षेष्ट । एहि पित ऊर्ग्देवतासु तस्यै वयं ज्योग्जीवन्तो भूयास्म । आमास्व पक्वममृतं निविष्टं मया प्रत्तं सुधया मदस्व क्षीरं घृतं वासिच्य ॥ पितः एकोद्दिष्टे एतत्तेऽन्नम् एतत्ते मधु । इदं विष्णुर्वि । विष्णो इदं रक्षस्व । पितः एकोद्दिष्टे यथोपस्थितं दत्तं दास्यमानेन सह सव्यञ्जनममृतमेतत्ते अन्नम् ॥ [illegible] । पयः पृथिव्याः, दधि-

CC-0 Ruwanna Collection. Digitized by eGangotri

शुक्र भ्राजन्त ईरते । तव ज्योतिष्यर्चय स्वाहा १ अग्ने पवस्व स्वपा अस्मे वर्चः सुवीर्यम् । दधद्रयिं मयि पोषम् स्वाहा । २ । त्वं नस्तन्तुरुत सेतुरग्ने त्वं पन्था भवसि देवयानैः । त्वयाग्ने पृष्टं वयमारुहेमाऽथा देवैः सदमादं मदेम स्वाहा । ३ अग्ने नय सुपथा रये० । ४ । ऋतुतिथ्यादि । विमुच्य ॥ नयामि ॥ पुनः परिसमूह्य ६ । पुरस्तात् ४ अग्नये स्वाहा, प्रजाप० सूर्याय० प्रजापतये० । विमुञ्चामि ३ नयामि ॥ इत्युद्वाहः ॥ ३ ॥ अथ व्याहृतिवैश्वदेव ॥ परिसमूह्य पर्युक्ष्य परिषिच्य ॥ ६ ॥ पुरस्तात् ॥ ४ ॥ अग्नये शुकारूढाय । गन्धादि ॥ गायत्रीब्राह्मणं च हुत्वा । अध्वर्योयं० ॥ वैश्वदेवस्य सिद्धस्य० । हन्तमनुष्येभ्योऽन्नं नमः आचमनीयं नमः ॥ अथाष्टका ॥ अग्निं परिसमूह्य । ६ ।

CC-0 Pulwama Collection. Digitized by eGangotri

आदौ पञ्च १६ । अपूपचरौ । अग्नये अष्टका-
देवतायै जुष्टं निर्वपामि । एवं प्रोक्षामि ॥ आ-
ज्यभागान्तम् ॥ प्रदानं । तेजोसि । ऋतूनां पत्नी
प्रथमेयमागादह्नां नेत्री जनित्री प्रजानाम् । एका
सती बहुधोषो व्युच्छा जीर्णा त्वं जरय सर्वमन्यत्
स्वाहा ॥ १ ॥ ऋतस्य धामा प्रथमा व्युषस्यऽपा-
मेका महिमानं विभर्ति । सूर्यस्यैका चरति निष्कृ-
तानि घर्मस्यैका सवितैका नियच्छति स्वाहा ॥ २ ॥
देवा ग्रावाणो घोषमकृत हविष्कृण्वन्तः परिवत्स-
रीयम् । एकाष्टके सुप्रजसः सुवीरा ज्योग्जीवेम
बहिष्कृतो वयन्ते स्वाहा ॥ ३ ॥ अष्टकानुवाकौ
तूखानामार्षम् ॥ इयमेव सा या प्रथमा व्यौच्छत् सा
वा स्वन्तश्चरति प्रविष्टा । वधूर्मिमाय नवगज्जनि-
त्री त्रय एनां महिमानः सचन्ते स्वाहा ॥ १ ॥

CC-0 Pulwama Collection. Digitized by eGangotri

छन्दस्वतीरुषसौ पेपिशाने समानं योनिमनु सञ्च-
रन्ती । सूर्यपत्नी विचरतः प्रजानती केतुमती अजरे भू-
रिरेतसः स्वाहा ॥ २ ॥ ऋतस्य पन्थामनु तिस्र
आघुस्त्रयो घर्मासो अनु रेतसागुः । प्रजामेका रक्ष-
त्यूर्जमेका व्रतमेका रक्षति देवयूनां स्वाहा ॥ ३ ॥
चतुष्टोममदधाद्या तुरीया यज्ञस्य पक्षा ऋषयो भ-
वन्ती । गायत्री त्रिष्टुब्जगती विराडर्के युञ्जाना
सुराभन्निदं स्वाहा ॥ ४ ॥ पञ्चभिर्धाता विदधा
इदं यत्तासां स्वसॄरजनत्पञ्च पञ्च । तासामयन्ति
प्रयवेन पञ्च नानारूपाणि क्रतवो वसानाः स्वाहा
॥ ५ ॥ ऋतुतिथ्यादि । पूर्णान्तम् ॥ गोप्रदानम् ॥
कुशब्राह्मणम् । पूर्वाभिमुखां गां पश्चिमाभिमुखं यजमानं
च संस्थाप्य ॥ नमस्कारः । प्रसीद मम हे विद्वान्भ-
गवंस्त्वां नता वयम् । आपोहिष्ठा । न वहन्ती-

CC-0 Pulwama Collection. Digitized by eGangotri

भि । ॐगायत्र्यै नमः ॐभूर्भुवःस्व ३ । तत्पुरुषाय विद्महे ३ वा वासुदेवाय वि ३ सुभगायै वि ३ । पादेषु ऋग्वेदादिचत्वारः । सैव दक्षिणा । ॐभूःपुरुषमिति प्रतिमाविसर्जनम् ॥ अद्यतावत् । पितुः परलोके वैतरणीनदीसुखसन्तारणार्थं रुद्राय मणिमुक्तप्रवालान्नादिसहितां सहिरण्यां सवाससंसर्वोपस्करणोपेतां गां ददानि । तत्पुच्छं तु करे कृत्वा ॥ तर्पणान्ते वेदचतुष्टयीं सम्पाद्य । गायत्र्यै नमः अद्यतावत् पृथिव्याः अग्नेः । अच्छिद्रमस्तु ॥ प्रतिपादनं पादेषु ॥ अग्निमीळे० । इषे त्वो० । अग्न आयाहि० । शन्नोदेवी० । पृच्छां विसर्ज्य ॥ उदकलशं । अनन्तशाख० ॥ इति गोप्रदानं । अग्नेर्यविष्ठब्राह्मणपूजनम् ॥ ॐगायत्र्यै नमः । दक्षिणां कृत्वा । अपसव्येन । सव्येन । आश्रावित

CC-0. Purwama Collection. Digitized by eGangotri

मिति पूर्णाहुतिः ॥ विमुञ्चामि । नयामि ॥ पुनः परिसमूह्य पर्युक्ष्य ६ ॥

अथ श्राद्धमारभेत ॥ पृच्छायामासने षष्ठी द्वितीयाऽन्नयकर्मणि । अन्यत्र प्रथमा ज्ञेया ह्येकोद्दिष्ट उदाहृतम् ॥ वासोवीरान्नगन्धार्घादिभिरर्चां समर्पयेत् । पितराऽमन्त्रणेनैव प्रेतनामापि तन्वयात् ॥ श्राद्धारम्भे तथाचान्ते आसनावाहने तथा । एकेनैव कुशाग्रेण विष्टरं कारयेत्सुधीरिति ॥ यद्येकत्र भवेच्छ्राद्धमेकोद्दिष्टं च पार्वणम् । पार्वणं त्वभिनिर्वर्त्य चैकोद्दिष्टं ततश्चरेत् ॥ सव्येनाचम्य । पवित्रपाणिः ॥ शान्ताकारं भुजगशयनं० । ॐगायत्र्यै नमः ॐभूर्भुवःस्वस्त० ३ अपसव्येन ॥ देवताभ्यः ३ अद्यतावत् पितुः वा मातुः आद्यमौर्ध्वदैहिकं प्रथमं । प्रथममासिकं द्वितीयं । त्रिपाक्षिकं तृतीयं । द्वितीयमासिकं चतु-

CC-0 Pulwama Collection. Digitized by eGangotri

का स्त्री

अन्तरिक्षाय वायवे यजुर्वेदाय ब्रह्मणे छन्दोभ्यः । दिवे सूर्याय सामवेदाय ब्रह्मणे छन्दोभ्यः । दिग्भ्यः चन्द्रमसे अथर्ववेदाय ब्रह्मणे छन्दोभ्यः चतुर्वेदेश्वरेभ्यः । अभयङ्करीदेव्यै इहराष्ट्राधिपतये अमुकभैरवाय हेरुकादिभ्यः दीपोनमः धूपोनमः ॥ अपसव्येन समस्तमाता पितृभ्यः दीपः स्वधा । कुम्भो वनिष्ठुर्जनिता शचीभिर्यस्मिन्नग्रे योन्याङ्गर्भो अन्तः । प्लाशिर्व्यक्तः शतधार उत्सो दुहेन कुम्भी स्वधा पितृभ्यः ॥ अद्य तावत् पितः आद्यमौर्ध्वदैहिके प्रथमे । प्रथममासिके द्वितीये । त्रिपाक्षिके तृतीये । द्वितीयमासिके चतुर्थे । पञ्चपाक्षिके पञ्चमे । तृतीयमासिके षष्ठे । चतुर्थमासिके सप्तमे । पञ्चममासिके अष्टमे । ऊनषाण्मासिके नवमे । षाण्मासिके दशमे । सप्तममासिके एकादशे । अष्टम-

CC-0 Pulwama Collection. Digitized by eGangotri

मासिके द्वादशे । नवममासिके त्रयोदशे । दशममासिके चतुर्दशे । एकादशमासिके पञ्चदशे । ऊनसांवत्सरिके षोडशे (मलमध्येतु) द्वादशमासिके षोडशे । ऊनसांवत्सरिके सप्तदशे एकोद्दिष्टे श्राद्धे एष ते दीपः एष ते धूपः ॥ सव्येन । प्रतिमायां जीवादानं । अनाभौ । ॐभूःपुरुषमावाहयामि नमः । ३ । स्नाने श्लोकतर्पणम् ॥ दक्षिणां सम्पाद्य ॥ अपसव्येन अक्षयं सव्यन । तद्विष्णोरित्यादि पुष्पादि ॥ ततोग्निसाधनं कृत्वा । पात्रं तिला० । आदौ पञ्च । अग्निपूजा । अग्नये समनमत् ॥ अपूपचरौ अग्नये वायवे सूर्याय ब्रह्मणे प्रजापतये कूष्मर्षिभ्यः जुष्टं निर्वपामि । एवं प्रोक्षामि आज्यभागान्तं हुत्वा ॥ कूष्माण्डं तद्ब्राह्मणं च हुत्वा ॥ तेजोसि प्रधानं । अग्नये स्वाहा ६

CC-0 Pulwama Collection. Digitized by eGangotri

ऋतुतिथिः ॥ इळामग्ने तेजोसि । अग्ने त्वं पारयानवो इति चेळाभागं हुत्वा ॥ वैश्वानरेणेतिपावमान्यब्राह्मणे-नचेत्युपस्थानम् । यद्देवा देवहेळनमित्यञ्जलिः ॥ पाव-मानीसूक्तेन, वैश्वानरेण चेति तर्पणम् ॥ हुतमेक्षणं । तन्त्रसमाप्तिः । नयामि ॥ १ ॥ पुनरग्निं परिसमूह्य ६ आदौ पश्व । अक्षतचरौ ॥ अग्नये पुष्टिपतये प्रजापतये जुष्टंनिर्वपामि । अक्षतचरौ मेक्षणं न भवति । आ-ज्यभागान्तं हुत्वा । प्रधानं । तेजोसि । अग्निना र-यिमश्नवत् पोषमिव दिवे दिवे । यशसं वीरमुत्त-मम् । १ । प्रजापते नहि त्वदन्य एता विश्वा जा-तानि परिता बभूव । यत्कामास्ते जुहोमस्तन्नो अ-स्तु वयं स्याम पतयो रयीणां स्वाहा ॥ २ ॥ स्रुवेणाज्यहोमः । अग्नये जनिविदे स्वाहा सोमा-य जनि० । गन्धर्वाय ज० । आयुषः प्राणमित्ये-

CC-0 Pulwama Collection. Digitized by eGangotri

कादश० । तेजोसि आकूतमिति त्रयोदश० ॥ ते० बृहस्पतिपुरोहिता इति ॥ ऋता षाडिति त्रयोदशाहुतीः । अग्निर्भूतानामित्येकविंशमाधिपत्याति जुहोति अग्निर्भूतानामाधिपतिः स माऽवतु तस्मै स्वाहा[१] । यमः पृथिव्याम[२] । वायुरन्तरिक्षस्याधि[३] । सूर्यो-दिवोधि[४] । चन्द्रमा नक्षत्राणाम[५] । विष्णुर्दिशाम[६] । पूषा पथीनाम[७] । त्वष्टा रूपाणाम[८] । सविता प्रसवानाम[९] । इन्द्रो ज्येष्टानाम[१०] । मित्रः सत्यानाम[११] । वरुणो धर्मानाम[१२] । रुद्रः पशूनाम[१३] । बृहस्पतिर्ब्रह्मणाम[१४] । ब्राह्मणो वाचाम[१५] । सोम ओषधीनाम[१६] । समुद्रः स्रवन्तीनाम[१७] । अन्नं साम्राज्यानामधिपति तन्मा[१८] । गायत्री छन्दसामधिपती सा माऽवतु तस्यै स्वाहा[१९] । मरुतो गणानामधिपतयस्ते माऽवंतु तेभ्यः[२०] । पितरः पितामहाः

CC-0 Pulwama Collection. Digitized by eGangotri

परावरेभ्यस्ते माऽवन्त्वऽस्मिन्ब्रह्मण्यस्मिन् क्षत्रेऽस्या-
माशिष्यस्यां पुरोधायामस्यां देवहूत्यां स्वाहा[२१] ॥
आकूत्यैत्वा स्वाहा । कामायत्वा स्वाहा । समृद्ध्यै-
त्वा स्वाहा । हिरण्यगर्भ इत्यष्टाभिः ॥ हिरण्य-
गर्भ । यः प्राणतो । य ओजोदा । येनद्यौः । य
इमेद्यावा । यस्येमेविश्वे । आपो ह यन् । आनः प्रजां
ॐभूः स्वाहा । ॐ भुवः । ॐ स्वः । ॐ भूर्भु-
वःस्वः स्वाहा ॥ अग्न आयूंषि । अग्निर्ऋषि ।
अग्ने पवस्व ॥ अन्ततचरुः ॥ अग्निं पुष्टिपतिं प्रजा-
पतिं च यजेत ॥ ऋतुतिथ्यादि । नयामि ॥ २ ॥ पुन-
रग्निं परिसमूह्य पर्युक्ष्य परिषिच्य । आदौ पञ्च ॥
अपूपचरौ अग्नये शुचये अग्नये पवमानाय अग्नये
तन्तुमते अग्नये पाथिकृते जुष्टं निर्वपामि एवं प्रो-
क्षामि । अन्नाभागान्तं । पद्मांतं । इदसे शुचयस्तव

CC-0 Pulwama Collection. Digitized by eGangotri

नमः ॥ शङ्खचक्रगदाखड्गपाशाङ्कुशशरान्धनुः । पायादष्टभुजा देवी दुर्गा दुर्गतिहारिणी ॥ क्षमध्वं मम क्षेत्रेशा दधध्वं सुखसम्पदः । खभूपातालदिक्संस्थास्तुष्टा यान्तु स्वकं पदम् ॥ आह्वानं नैव जानामि नैव जानामि पूजनम् । पूजाभागं न जानामि क्षम्यतां परमेश्वर ॥ उभाभ्यां जानुभ्यां पाणिभ्यां शिरसा चोरसा मनसा वचसा च नमस्कारं करोमि नमः ॥ नमो ब्रह्मणे इति तर्पणम् ॥ नमो ब्रह्मणे नमो अस्त्वग्नये नमः पृथिव्यै नम ओषधीभ्यः । नमो वाचे नमो वाचस्पतये नमो विष्णवे बृहते कृणोमि ॥ इत्येतासामेव देवतानां सार्ष्टिं सायुज्यं सामीप्यं सलोकतामाप्नोति । य एवं विद्वान् स्वाध्यायमधीते ॥ अपसव्येन ॥ पात्राणि चालयेच्छ्राद्धे स्वयं शिष्योऽथवा सुतः न स्त्रियो
CC-0 Pulwama Collection. Digitized by eGangotri

नच बालाश्च नान्यजात्यः कदाचन ॥ सव्येनाचम्य ॥ उदकलशमुपनिधाय स्वस्त्ययनं वाचयति । उत्तिष्ट ब्रह्मणस्पते देवायन्तस्त्वेमहि उपप्रायन्तु मारुतः सदानव इन्द्र प्राशून्भवा सचा । अर्यमाऽयातु वृषभस्तुविष्मान्यन्ता वसूनि विधत्ते तनूपाः सहस्राक्षो गोत्रभिद्वज्रबाहुरस्मासु देवो द्रविणं दधातु । ये ते अर्यमन्बहवो देवयानाः पन्थानो राजन्दिव आचरन्ति । तेभिर्नो अद्य पथिभिः सुगेभीरक्षा च नो अधि च ब्रूहि देवाः "राष्ट्रभृतांदेवानामार्षम्" ॥ बोधश्च मा प्रतिबोधश्च पुरस्ताद्गोपायतामऽस्वप्नश्च माऽनवद्राणश्च दक्षिणतो गोपायतां, गोपायमानश्च मा रक्षमाणश्च पश्चाद्गोपायतां जागृविश्च। माऽरुन्धती चोत्तराद्गोपायताम्, अनमित्रं नो अधरागऽनमित्रमुदक्कृधि । इन्द्राऽनमित्रं न पश्चादऽनमित्रं

CC-0 Pulwama Collection. Digitized by eGangotri

पुरस्कृधि, अनमित्रैरहोभिः सचेमहि विश्वेदेवा अनमित्रा न उषसः सन्तु निम्रुचः । याः षडुर्वीः पञ्च प्रदिशस्ता नः पान्तु मित्रधानो मित्रे दधाता अभयं नो अस्तु । ये रात्रीमऽनुतिष्ठत ये च भूतेषु जागृथ पशून्ये सर्वान्रक्षथ तेन आत्मासु जागृत । बोधप्रतीबोधा स्वप्नानवद्राण गोपायमान रक्षमाण जागृवेऽरुन्धतीति ये देवास्तनूपाः स्थ ते म इह तन्वं पात बोधप्रतीबोधेत्यसौ वा आदित्यो बोधोऽग्निः । प्रतीबोधो स्वप्नानवद्राणेति चन्द्रमा वा अस्वप्नोऽयं यः पवते सोऽनवद्राणो गोपायमानरक्षमाणेत्यहर्वै गोपायमानो रात्री रक्षमानो जागृव्यऽरुन्धतीति यज्ञो वै जागृविर्दक्षिणाऽरुन्धत्येते वै देवा राष्ट्रभृतास्तानेवेष्ट आत्मनो गोपीथाय ॥ मन्त्राथाः सफलाः सन्तु पूर्णाः सन्तु मनोरथाः । शत्रूणां

CC-0 Pulwama Collection. Digitized by eGangotri

बुद्धिनाशोस्तु मित्राणामुदयस्तव ॥ मार्कण्डेयमुनेः स्वर्गवैद्ययोः स्वर्पतेर्यथा । आयुरारोग्यमैश्वर्यमेतत्त्रितयमस्तु ते ॥ जीव त्वं शरदः शतम् ॥

इत्युदकलशस्वस्त्ययनम् ॥ ॥

अथैकोद्दिष्टश्राद्धम् ॥

ॐ शालिचूर्णेन ब्रह्मकलशमुल्लिख्य, तद्दक्षे विष्णुप्रतिमां वेदचतुष्टयीं क्षेत्रेशद्वयं च संस्थाप्य ॥ अभि नो देवी—वषट्ते विष्णो तावत् । प्रधानम् ॥ अग्रयेनमः ६ ॥ १ ॥ अग्निना रयिमश्नवत् । प्रजापते नहि त्वदन्या ॥ २ ॥ उदग्ने शुचयस्तव । अग्ने पवस्व स्वपा । त्वं नस्तन्तुरुत सेतुरग्ने । अग्ने नय सुपथा राये ॥ ३ ॥ ऋतूनां पत्नी प्रथमेयमागा । ऋतस्य धामा प्रथमा । देवा ग्रावाणो । ४ । तद्विष्णोः ।

CC-0 Putwaria Collection. Digitized by eGangotri

विष्णुपञ्चायतनदेवताभ्योनमः। प्रतिमायां। प्र तद्विष्णुः। शेषशायिने। वेदचतुष्टये। यो रुद्रो०(वा)वषट्ते। अग्निमीढे। इषे त्वोर्जे त्वा। अग्न आयाहि। शन्नो देवी॥ क्षेत्रस्य पतिना वयं। अर्चन्तस्त्वा॥ यजमानमानीय॥ आसनशोधनादि। अनाभौ। तीर्थेस्तेयं। वसोः पवित्रमसि। परमात्मने। स्वप्रकाशो। वनस्पति। नमो धर्म। यत्रास्ति माता। दीपधूपौ अद्यतावत् महागणपतये। अग्नये वायवे सूर्याय ब्रह्मणे प्रजापतये कूष्माण्डिभ्यः। अग्नये पुष्टिपतये प्रजापतये। अग्नये शुचये अग्नये पवमानाय अग्नये तन्तुमते अग्नये पथिकृते। अग्नये अष्टकादेवतायै। विष्णुपञ्चायतनदेवताभ्यः। शेषशायिने नारायणाय। रुद्राय (वा) विष्णवे सानुचराय। पृथिव्यै अग्नये ऋग्वेदाय ब्रह्मणे छन्दोभ्यः।

CC-0 Pulwama Collection. Digitized by eGangotri

काशमातृभ्योऽन्नंनमः आकाशमातृभ्यः समालभनं गन्धोनमः अर्घोनमः पुष्पंनमः ॥ सौरभेयाः स्वर्गहिताः पवित्राः पुण्यराशयः । प्रतिगृह्णन्तु मे ग्रासं गावस्त्रैलोक्यमातरः, गोभ्योऽन्नंनमः ॥ ऐन्द्रवारुणवायव्या याम्या नैर्ऋतिकाश्च ये । वायसाः प्रतिगृह्णन्तु इमं पिण्डं मयोद्धृतम् । काकेभ्योऽन्नंनमः श्वानौ द्वौ श्यावशबलौ वैवस्वतकुलोद्भवौ । ताभ्यां पिण्डं प्रदास्यामि स्यातामेतावहिंसकौ । श्वेभ्योऽन्नं नमः । अपसव्येन । रौरवाधीनसत्त्वानां प्रेतद्वारनिवासिनाम् । अर्थिना याचमानानामक्षय्यमुपतिष्ठतु ॥ सव्येन । शुनां च पतितानां च श्वपचां पापरोगिणाम् । वायसानां क्रिमीनां च शनकैर्निक्षिपेद्भुवि ॥ देवा मनुष्याः पशवो वयांसि सिद्धाः सयचोरगदैत्यसङ्घाः । प्रेताः पिशाचास्तरवः समस्ता ये

CC-0 Pulwama Collection. Digitized by eGangotri

चान्नमिच्छन्ति मया प्रदत्तम् ॥ पिपीलिकाकीटपतङ्गकाद्या बुभुक्षिताः कर्मणि बद्धबद्धाः । प्रयान्तु ते तृप्तिमिदं मयान्नं तेभ्यो विसृष्टं सुखिनो भवन्तु ॥ येषां न माता न पिता न बन्धुर्नैवान्नसिद्धिर्नतथान्नमस्ति । तत्तृप्तयेऽन्नं भुवि दत्तमेतत्ते यान्तु तृप्तिं मुदिता भवन्तु ॥ भूतानि सर्वाणि तथान्नमेतदहं च विष्णुर्न ततोऽन्यदस्ति । तस्मादहं भूतनिकायभूतमन्नं प्रयच्छामि भवाय तेषाम् ॥ चतुर्दशो भूतगणो य एष तत्र स्थिता ये खलु भूतसङ्घाः । तृप्त्यर्थमन्नं हि मया विसृष्टं तेषामिदं ते मुदिता भवन्तु ॥ इत्युच्चार्य नरो दद्यादन्नं श्रद्धासमन्विताः । भुवि भूतोपकाराय गृही सर्वाश्रयो यतः ॥ अपसव्येन । यमाय धर्मराजाय मृत्यवे चान्तकाय च । वैवस्वताय कालाय सर्वप्राणहराय

CC-0 Pulwama Collection. Digitized by eGangotri

च ॥ औदुम्बराय नीलाय दध्नाय परमेष्टिने । वृकोदराय भीमाय चित्रगुप्ताय वै नमः । पाशहस्तकृतान्ताय प्रेताधिपतये नमः ॥ सव्येन । ये विश्वभाविनो भूता ये च तेष्वनुयायिनः । आहरन्तु बलिं तुष्टाः प्रयच्छन्तु शुभं मम ॥ योऽस्मिन्निवसति क्षेत्रे क्षेत्रपालः सकिङ्करः । तस्मै निवेदयाम्यद्य बलिं पानीयसंयुतम् ॥ क्षां क्षेत्राधिपतयेऽन्नं नमः रां राष्ट्राधिपतयेऽन्नं नमः । सर्वाभयवरप्रद मयि पुष्टिं पुष्टिपतिर्दधातु ॥ अपसव्येन । आयुः प्रजां धनं विद्यां स्वर्गमोक्षौ सुखानि च । प्रयच्छन्तु तथा राज्यं नृणां प्रेताः पितामहाः ॥ एष पिण्डो मया दत्तस्तव हस्ते जनार्दन । गयायां पितृरूपेण स्वयमेवोपगृह्यताम् ॥ आत्मनश्चार्थलाभाय क्षेमाय विजयाय च । शत्रूणां बुद्धिनाशाय पितृ-

CC-0 Pulwama Collection. Digitized by eGangotri

नुद्धरणाय च ॥ पञ्चक्रोशं गयाक्षेत्रं क्रोशमेकं ग-
याशिला । यत्र तत्र स्मरेन्नित्यं पितृणां दत्तमक्ष-
यम् ॥ स०व्येन । गायत्र्यै नमः ॐभूर्भुवःस्वस्त०
३ महागणपतेः० अग्नेः वायोः० अष्टकादेवतायाः
वासुदेवस्य० आत्मनो० पितुः वा मातुः सांवत्स-
रिकेश्राद्धे कलशपू० क्षेत्रेश्वरपू० अच्छिद्रं सम्पूर्ण-
मस्तु एवमस्तु ॥ एताभ्यो० यवोदकं नमः ॥ आज्ञां
मे दीयतां नाथ नैवेद्यस्यास्य भक्षणे । शरीरया-
त्रासिद्ध्यर्थं भगवन्क्षन्तुमर्हसि ॥ आपन्नोस्मि शर-
ण्योसि सर्वावस्थासु सर्वदा । भगवंस्त्वां प्रपन्नो-
ऽस्मि रक्ष मां शरणागतम् ॥ ईशानविष्णुकमलास-
नकार्तिकेयवह्नित्रयार्करजनीशगणेश्वराणाम् । क्रौञ्चा-
मरेन्द्रकलशोद्भवकश्यपानां पादं नमामि सततं
पितृमुक्तिहेतोः ॥ कलिकल्मषविमुक्तः पूजितः सिद्ध-

CC-0 Pulwama Collection. Digitized by eGangotri

सङ्घैरमरचमरमालावीज्यमानोऽप्सरोभिः । पितृशत-
मपि बन्धून्पुत्रपौत्रान्प्रपौत्रानपि नरकनिमग्नांस्तारये-
द्विष्णुरेव ॥ ध्येयः सदा सवितृमण्डलमध्यवर्ती
नारायणः सरसिजासनसन्निविष्टः । केयूरवान् कन-
ककुण्डलवान्किरीटी हारी हिरण्मयवपुर्धृतशङ्खच-
क्रः ॥ कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्याऽत्मना
वाऽनुसृतस्वभावात् । करोमि यद्यत्सकलं परस्मै
नारायणायेति समर्पयामि ॥ करचरणकृतं वाक्का-
यजं कर्मजं वा श्रवणनयनजं वा मानसं वाऽपरा-
धम् । विदितमविदितं वा सर्वमेतत्क्षमस्व जय जय
करुणाब्धे! श्रीमहादेव शम्भो ॥ नमताशेषविघ्नौ-
घवारणं वारणाननम् । कारणं सर्वसिद्धीनां दुरि-
तार्णवतारणम् ॥ नमो धर्मनिधानाय नमःस्वकृत-
साक्षिणे । नमः प्रत्यक्षदेवाय भास्कराय नमो
CC-0 Pulwama Collection. Digitized by eGangotri

सावित्राणि महागणपतये० पितृगणदेवताभ्यो नमो नैवेद्यं निवेदयामिनमः ॥ अपसव्येन ॥ सर्वमन्न-मुपादाय सतिलं दक्षिणामुखः । वारिणाऽऽप्लाव्य तच्चान्नं पृच्छेत्प्रश्नत्रयं द्विजान् ॥ विषदमन्नमानीय "कच्चित्सम्पन्नं भोः" । सुसम्पन्नम् । "तृप्यन्तु भवन्तः" । तृप्ताः स्मः । "शेषमन्नमिष्टैः सह" ॥ अग्निदग्धाश्च ये जीवा येऽप्यऽदग्धाः कुले मम । भूमौ दत्तेन तृप्यन्तु तृप्ता यान्तु परां गतिम् ॥ येषां न पचते माता येषां न पचते पिता । उ-च्छिष्टं येच कांक्षन्ति तेषां तृप्तिः स्वधा नमः ॥ सव्येन ॥ असोमपाश्च ये जीवा यज्ञभागविवर्जिताः । तेषामन्नं प्रदास्यामि विकिरं वैश्वदेवके ॥ तृप्तानाचम्य । अपसव्येन । विप्रानाचमयेत् ॥ पित्रे० आचमनीयं स्वधा । सव्येन । विश्वेभ्योदेवेभ्यआचमनीयं नमः ॥

CC-0 Pulwama Collection. Digitized by eGangotri

अपसव्येन ॥ यन्मे रामेत्यऽर्धप्रदक्षिणं कृत्वा प्रत्येत्य, दक्षिणस्कन्देन पिण्डावलोकनं च ॥ यन्मे रामःशकुनिः श्वापदश्च यन्मे शुचिर्मन्त्रकृतस्य प्राशत् । वैश्वानरः सविता तत्पुनातु तस्मिन्पूते देवता मादयन्तां तेन पूतेन पितरो मदन्ताम् ॥ यास्तिष्ठन्ति० ॥ पित्रे दक्षिणायै तिलहिरण्यरजतनिष्कर्णां ददानि ॥ सावित्राणि० प्रतिगृह्णामि ॥ अभिरमन्तु भवन्तः, अभिरताःस्मः । देवाश्च पितरश्चैतत्पूतमत्रोपजीवन्ताम् अस्मिल्लोके मां धत्त जीवेम शरदः शतं पश्येम शरदः शतम् । अथास्मभ्यमूर्जन्धत्त ज्योतिर्दत्त ह्यऽजरं न आयुः । यदन्तरिक्षं पृथिवीमुत द्यां यत्पितरं मातरं वा जिहिंसिम । अग्निर्नस्तस्मादेनसो गार्हपत्यः प्रमुञ्चतु चकृम यानि दुष्कृता ॥ तृप्यन्तु भवन्तः पितरो ये च भगतोऽनु

CC-0 Pulwama Collection. Digitized by eGangotri

येचास्मास्वाशंसन्ति तृप्यत ॥ तृप्यन्तु भवन्तः पितामहा ये च० ॥ तृप्यन्तु भवन्तः प्रपितामहा ये च० ॥ (एवं, तृप्यन्तु भवत्यो मातरो याश्च भवतीरनु याश्चास्मास्वाशंसन्ति तृप्यत ॥ तृप्यन्तु भवत्यः पितामह्यो याश्च० । तृप्यन्तु भवत्यः प्रपितामह्या याश्च०) । तृप्यतु ३ एवमस्तु ॥ पितुः वा मातुः सांव० दत्तमन्नमक्षय्यमस्तु स्वधा, "इदमन्नमक्षय्यमस्तु स्वधा" इति विप्राः प्रतिब्रूयुः ॥ दातारो नोऽभिवर्धन्तां वेदाः सन्ततिरेवच ॥ श्रद्धा च नो मा व्यगमद्बहु देयं च नो अस्तु । अन्नं च नो बहु भवेदऽतिथींश्च लभेमहि । याचितारश्च नः सन्तु मा च याचिष्म कंचन ॥ "एता एवाऽशिषः सत्याः सन्तु" ॥ इति विप्राः प्रतिब्रूयुः ॥ सव्येन ॥ शन्नो देवी ॥ विश्वेभ्योदेवेभ्यः दक्षिणायै० ॥ विश्वे-

CC-0 Pulwama Collection. Digitized by eGangotri

देवाः प्रीयन्तां प्रीता सन्तु ॥ शन्नो भवन्तु वाजिनो हव्येषु देवताता मितद्रवस्वर्काः । जम्भयन्तो हि वृकं रक्षांसि सनेम्यस्मद्युयमनमीवाः संस्रावपात्रमुत्तानं कृत्वा ताभिरद्भिः पुत्रकामो मुखमनक्ति ॥ वाजे वाजे इति कुशविसर्जनम् ॥ वाजे वाजे वत वाजिनो नो धनेषु विप्रा अमृता ऋतज्ञाः । अस्य मधु पिबत मादयध्वं तृप्ता यात पथिभिर्देवयानैः ॥ अपसव्येन । आ मा वाजस्येति पिण्डपरिषेकः ॥ आ मा वाजस्य प्रसवोजगम्यादा मा द्यावापृथिवी विश्वरूपे । आ मा गन्तां पितरं मातरं चा मा सोमो अमृतत्वेन गम्यात् ॥ सव्येन ॥ गायत्र्यै नमः ॐभूर्भुवःस्वस्त ३ अपसव्येन । देवताभ्यः० ३ । अद्यतावत् पितुः वा मातुः सांवत्सरिकं त्रैपुरुषं वैश्वदेवाष्टकपूर्वकं ब्राह्मणपूजनमच्छिद्रं सम्पूर्णमस्तु

CC-0 Pulwama Collection. Digitized by eGangotri

एवमस्तु ॥ पित्रे वा मात्रे सांवत्स० तिलोदकं-
स्वधा उदकतर्पणंस्वधा ॥ अग्निं विमुञ्चामि ३ ॥
नयामि । सव्येन । परिसमूह्य ६ स्तृणामि ४ ।
अग्नये स्वाहा, प्रजापतये स्वाहा, सूर्याय स्वाहा,
प्रजापतये स्वाहा ॥ विमुञ्चामि ॥ ३ ॥ नयामि ॥
आचित्याग्निश्चिकितिर्हव्यवाट् समुद्रथः । अग्निः शु-
क्रेण शोचिषा बृहत्सूर्यो अरोचत । मनुगृद्धाण्य-
पद्विषो दहन्रक्षांसि दाशुषः ॥ अग्निर्विश्वस्य राजते
अग्निर्विश्वं विराजते अग्निः सर्वं विराजते ॥ भगव-
न्पुण्डरीकाक्ष भक्तानुग्रहकारक । अस्मद्दयानुरोधेन
सन्निधानं कुरु प्रभो । तेजोसि तेजो मयि धेही-
त्यात्मानं देहि भगवन् सन्निधत्स्व ॥ ततो गांग्रासादि॥
याकाचिद्योगिनी रौद्रा सौम्या घोरतरा परा ।
खेचरी भूचरी रामा तुष्टा भवन्तु मे सदा ॥ आ-

CC-0 Pulwama Collection. Digitized by eGangotri

अहोरात्रैः ससन्धिकैरर्धमासैश्च मासैर्ऋतुभिः परिवत्सरैः। संवत्सरस्य क्लृप्तिभिरन्तरन्यान्पितॄन्दधे। यद्वा क्रव्यादऽजहादेकमङ्गं पितृलोकं जनयञ्जातवेदाः। तद्व एतेन पुनराप्यायतामरिष्टासः पितरो माधयध्वम्। स्वधां वहध्वममृतस्य योनिं यात्र स्वधा पितरस्तां भजध्वम्॥ ॐ भूर्भुवः स्वस्तत्सवितुः० ३॥ नारायणस्यार्षम्॥ मधु वात ऋतायते मधु क्षरन्ति सिन्धवः। माध्वीर्नः सन्त्वौषधीः॥ मधु नक्तमुतोषसा मधुमत्पार्थिवं रजः। मधु द्यौरस्तु नः पिता॥ मधुमान्नो वनस्पतिर्मधुमानऽस्तु सूर्यः। माध्वीर्गावो भवन्तु नः॥ ॐ मधु ३॥ अन्तश्चरासि०। ब्रह्मार्पणं०॥ अमृतोपस्तरणमसि स्वाहा॥ श्राद्धब्राह्मणपाठः॥ दक्षिणाग्रान्दर्भानास्तीर्य॥ यास्तिष्ठन्ति॥ पित्रे पितामहाय० सांवत्सरिके श्राद्धे

CC-0 Pulwama Collection. Digitized by eGangotri

भूपृष्ठे दर्भास्तरणे तिलोदकेनाऽवनेजनं स्वधा ॥ उशन्तस्त्वा हवामह उशन्तः समिधीमहि । उशन्नुशन्त आवह पितॄन्हविषे आत्तवे ॥ तिलास्तोयं तथा क्षीरं दीपधूपौ बलिस्तथा । मधुसर्पिःसमायुक्तमष्टाङ्गं पिण्डसम्भवम् । वामजानुं भूमौ निधाय ॥ देवताभ्यः पितृभ्यश्च० ॥ ३ ॥ अद्य तावत्, पृथिवीदर्विरक्षिता तृप्तिः स्वधाऽनुपदस्तां तां पृथिवीं दर्विमक्षितां तृप्तिं स्वधामनुपदस्तामऽग्निरिव पृथिवीमुपजीव । पितरऽमुकाऽमुकगोत्र एष ते पिण्डः, ये चात्र त्वाऽन्वेषा ते स्वधा वसुभ्यः स्वधा षष्ठ एष ते लेपः । अप उपस्पृश्य ॥ अन्तरिक्षं दर्विरक्षिता तृप्तिः स्वधाऽनुपदस्तातामन्तरिक्षं दर्विमक्षितां तृप्तिं स्वधामऽनुपदस्तां वायुरिवान्तरिक्षमुपजीव, पितामहाऽमुकाऽमुकगोत्र एष ते पिण्डः, ये चात्र त्वाऽन्वेषा

CC-0 Pulwama Collection. Digitized by eGangotri

ते स्वधा रुद्रेभ्यः स्वधा पञ्चम एष ते लेपः, अप उपस्पृश्य ॥ द्यौर्दर्विरक्षिता तृप्तिः स्वधाऽनुपदस्ता तां दिवं दर्विमक्षितां तृप्तिंस्वधामऽनुपदस्तां सूर्य इव दिवमुपजीव प्रपितामहाऽमुकाऽमुकगोत्र एष ते पिण्डः, ये चात्र त्वाऽन्वेषा ते स्वधा आदित्येभ्यः स्वधा चतुर्थ एष ते लेपः, अप उपस्पृश्य ॥ मूलपुरुषा भूमिस्वामिनः पितरः ! एष वः पिण्डः स्वधा ये च वोऽन्वऽत्र पितरो मादयध्वम् । येऽत्र पितरः प्रेता युष्मांस्तेऽनु य इह पितरो जीवा अस्मांस्तेऽनु येऽत्र पितरः प्रेता यूयं तेषां वसिष्ठा भूयास्थ, य इह पितरो जीवा वयं तेषां वर्षिष्ठा भूयास्म ॥ एतानि वः पितरो वासांसि । अतो नोन्यत्पितरो मायूढ्वम् । वीरान्नः पितरो दत्त । पिण्डलेपं निवारयेत् ॥ पित्रे वा मात्रे सांवत्सरि-

CC-0 Pulwama Collection. Digitized by eGangotri

के श्राद्धे समालभनं गन्धः स्वधा ॥ गन्धलेपं निवारयेत् ॥ एवं पित्रे अर्घः स्वधा पुष्पं स्वधा । पित्रे दीपः स्वधा धूपः स्वधा । पित्रे भक्ष्यभोज्यफल-मूलबलिनैवेद्यमाहाराद्यऽन्नं स्वधा ॥ पित्रे तिलमधुमि-श्रमुदकपात्रमाचमनीयं जलंस्वधा । पित्रे हिमपानं स्वधा पित्रे क्षीरपानं स्वधा । पित्रे मधुपानं स्वधा । पित्रे तिलोदकं स्वधा । पित्रे उदकतर्पणं स्वधा हिमं हिमं रजतं रजतम् ॥ सव्येनाऽचम्य ॥ वस-न्तायनमः० ॥ अपसव्येन ॥ यास्तिष्ठन्ति० ॥ ऊर्जं वहन्तीरमृतं घृतं मधु पयः कीलालं परिस्रुतं स्वधा स्थ पितॄन्मे तर्पयत ॥ सव्येन ॥ मा मे क्षेष्ठेति सतृणमन्नमभ्युक्ष्य ॥ मा मे क्षेष्ठा बहु मे पूतमस्तु ब्रह्माणो मे जुषतामन्नमन्नम् । सहस्रधारममृतोदकं मे पूतमस्त्वेतत्परमे व्योमन् ॥ देवतायै बलिमुपहरेत् ॥

CC-0 Pulwama Collection. Digitized by eGangotri

पितृषदनः पितृषदनमसि पितृभ्यः स्थानमसि । पितृभ्यः समालभ० पितृभ्योऽर्घः स्वधा, पुष्पं स्वधा पि० दीपःस्वधा, पितृभ्य आच्छादनं वासांसिस्वधा । पितृणामर्घ्यदानाद्यर्चन० ॥ आदित्या रुद्रा वसवो मे सदस्यास्तेषां सख्ये स्वधया मदध्वं स्वधां वहध्वममृतस्य योनिं याऽत्र स्वधा पितरस्तां भजध्वम् ॥ सव्येन ॥ इदमन्नमिदं देवेभ्यः भृतं चरुमभिघार्य । अपसव्येन । इदमन्नमिदं पितृभ्यः भृतं चरुमभिघार्य । प्रक्षाल्य तण्डुलान्पवित्रान्तर्हितानावपति, प्रक्षाल्य मूलतो मेक्षणमवदधाति ॥ अग्नावधिश्रित्य, तत्र चाभिघार्य, दक्षिणत उद्वास्य पुनश्चाभिघार्य ॥ पित्रे दक्षिणपश्चिमाग्रैस्तरैः पुरस्तात् श्रियै सोमवत्यै अन्नपूर्णाभगवत्यै समालभनं गन्धोनमः अर्घोनमः पुष्पंनमः ॥ श्रियं देवीं० ॥

CC-0 Pulwama Collection. Digitized by eGangotri

अग्नौ करवाणि ॐ कुरु । सोमाय पितृमते स्वधा नमः १ अग्नये कव्यवाहनाय स्वधानमः २ तूष्णीं पात्रेषु निक्षिपेत् ॥ इत्यग्नौ हुत्वा ये मामकाः पितरः पार्थिवासो येऽन्तरिक्षे ये दिवि ये समुद्रे ये वाचमाप्त्वा अमृताबभूवुस्तेऽस्मिन्यज्ञे सर्वकामांल्लभन्ताम् ॥ एतद्वः पितरो भागधेयं पात्रेषु दत्तममृतं स्वधावत् । अक्षीयमाणमुपजीवत्वैनं मया प्रत्तं स्वधया मदध्वम् ॥ अयं यज्ञः परमो यः पितॄणां पात्रेषु देयं हविरग्र्यमग्नेः । मनश्च वाक्च पितरो वः प्रदानैरश्विभ्यां प्रत्तं स्वधया मदध्वम् ॥ एषा व ऊर्गेषा वः स्वधा तामत्त च पिबत च मा च वः क्षिष्ठ येह पितर ऊर्ग्देवतासु तस्यै वयं ज्योग्जीवन्तो भूयास्म । आ मा स्वपक्वममृतं निविष्टं मया प्रत्तं स्वधया मदध्वं क्षीरं घृतंवासिच्य ॥

CC-0 Pulwama Collection. Digitized by eGangotri

सव्येन ॥ वैश्वदेवहविषि पिन्वमानं विश्वेषु भूतेषु पृथग्निविष्टं क्षीरं घृतंवासिच्य ॥ विश्वेभ्यो देवेभ्यो ऽन्नंनमः २ अन्नं मधुमधु पृथिवी ते पात्रं द्यौरपिधानं ब्राह्मणस्य मुखेऽमृतं जुहोमि ऊर्गस्योर्जोदा ऊर्जं मे देहि ऊर्जंमयि धेहि अन्नं मे देह्यऽन्नंमयि धेहि अक्षितिरसि मा मे क्षेष्ठाऽमुत्राऽमुष्मिंल्लोक इह च ॥ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् समूढमस्य पांसुरे ॥ विष्णो हव्यं रक्षस्व ॥ विश्वेभ्यो देवेभ्यो यथोपस्थितं दत्तं दास्यमानेन सह सव्यञ्जनममृतमन्नं नमः, नमो देवेभ्यः ॥ अपसव्येन ॥ पित्रे सां० अन्नंस्वधा ३ पितामहायाऽन्न स्वधा ३ प्रपितामहायाऽन्नं स्वधा ३ अन्नं मधुमधु० । विष्णो कव्यं रक्षस्व ॥ पित्रे पि० सां० यथोपस्थितं० अन्नंस्वधा, स्वधा पितृभ्यः ॥ पयः

CC-0 Pulwama Collection. Digitized by eGangotri

पृथिव्यां०, दधि क्राव्णो०, घृतवतीर्भु०, मधु वा ता ऋतायते०, शर्कराभिरव०, पञ्चव्युष्टी० पुरुषमेधः पुरुषस्येति। पुरुषसूक्त लक्ष्मीसूक्तौ पठित्वा॥ सव्येन अद्य दिनेऽद्ययथा संकल्पा०। शन्नो देवी०। विश्वेभ्यो देवेभ्योऽपोशानं नमः। अपसव्येन। यास्तिष्ठन्ति०। पित्रे० सां० अपोशानं स्वधा॥ तिलमन्नं च पानीयं सकुशं तेषु चाग्रतः। विकिरेत्पितृभूतेभ्यो जपन्नपहता इति॥ अपहता असुरा रक्षांसि पिशाचाः। वेदिषदः प्राश्नन्तु भवन्तोऽमृतं जुषध्वममृतं भुञ्जीत॥ यन्मे प्रकामादिति भुञ्जानान्समीक्षमानो जपति॥ यन्मे प्रकामादुत वाप्यकामादसमिद्धे ब्राह्मणो ब्राह्मणे वा। यत्स्कन्दति निर्ऋतिः पाथमुग्रामऽग्निष्टत्सर्वं शुन्धतु। उशन्तस्तेन पितरो मदन्तां तेन पूतेन पितरो मादयंताम्।

CC-0 Pulwama Collection. Digitized by eGangotri

श्राद्धकाले गयां ध्यात्वा ध्यात्वा देवं गदाधरम् ।
स्वान्पितॄन्मनसा ध्यात्वा पश्चाच्छ्राद्धं समारभेत् ॥
गायत्र्यैनमः ओंभूर्भुवःस्वः ३ अपसव्येन । देवताभ्यः
पितृ० ३ अद्यतावत्० पितुः पितामहस्य प्रपितामहस्य पितुः वा मातुः पितामह्याः प्रपितामह्याः मातुः सांवत्सरिकं श्राद्धं त्रैपुरुषं वैश्वदेवाष्टकापूर्वकं ब्राह्मणपूजनमर्चामहं करिष्ये ओंकुरुष्व ॥ अग्निं परिसमूह्य ६ तिलान्विकीर्य । निहन्मि सर्वं यदऽमेध्यवद्भवेद्धताश्च सर्वेऽसुरदानवा मया । रक्षांसि यक्षा सपिशाचगुह्यका हता मया यातुधानाश्च सर्वे ॥
सव्येन ॥ विश्वेषान्देवानामिदमासनंनमः । विश्वेभ्यो देवेभ्यो ब्राह्मणं त्वा भोजयामि ओंभोजय । विश्वान्देवानावाहयिष्यामि ओमावाहय । यवान्विकीर्य ॥
आगच्छन्तु महाभागा विश्वेदेवा वरप्रदाः । ये येऽत्र

CC-0 Pulwama Collection. Digitized by eGangotri

विहिताः श्राद्धे सावधाना भवन्तु ते ॥ शन्नो देवी० । लाजाश्च० ॥ भगवन्तः पाद्यं २ विश्वेभ्यो देवेभ्यः पाद्यंनमः । शेषं निवार्य ॥ पुनः शन्नोदेवी० । आपः क्षीरं । भगवन्तोऽर्घ्यं २ विश्वेदेवा इदंवोऽर्घ्यं नमः। विश्वेभ्यो देवेभ्यः समालभनं गन्धो नमः, अर्घो नमः, पुष्पं नमः, दीपो नमः, धूपो नमः, वासो नमः, विश्वेषान्देवानामर्घ्यदानाद्यर्चनविधिः सर्वः परिपूर्णोस्तु ॥ ओमासश्चर्षणीधृतो विश्वेदेवास आगत । दाश्वासो दाशुषः सुतम् ॥ उपयाम गृहीतोऽसि विश्वेभ्यस्त्वा देवेभ्य एष ते योनिर्विश्वेभ्यस्त्वा देवेभ्यः ॥ विश्वेदेवास आगत शृण्वताम इमं हवम् । इदं बर्हिर्निषीदत ॥ अपः प्रदायाऽपसव्यं कृत्वा ॥ पितुः पितामहस्य प्रपितामहस्य पितुर्वा मातुः सांवत्सरिके श्राद्धे इदमासनं स्वधा । पित्रे पिताम-

CC-0 Pulwama Collection. Digitized by eGangotri

हाय प्रपितामहाय पित्रे वा मात्रे सांव० ब्राह्मणं त्वा भोजयामि ओंभोजय ॥ पितरं पितामहं प्रपितामहं पितॄनावाहयिष्यामि ओमावाहय ॥ तिलान्विकीर्य ॥ श्राद्धानुवाकौ तूखानामार्षम् अपयन्त्वसुराः पितृरूपा ये रूपाणि प्रतिमुच्याऽचरन्ति परापरोनिपुरो ये हरन्ति अग्निष्टांल्लोकान्प्रणुदत्वस्मान् । अपेतो यन्त्वसुरा ये पितृषदः उदीरतामवरा उत्परास उन्मध्यमाः पितरः सोम्यासः असुं य्य इयुरवृका ऋतज्ञास्ते नोऽवन्तु पितरो हव्येषु एत पितरो मनोजवैरागच्छन्त पितरो मनोजवैः । ये निखाता ये परोप्ता गर्भाद्येऽव्यपेदिरे सर्वास्तानग्न आवह पितॄन्हविषे अत्तवे । आगच्छन्तु पितरो मनोजवसः पितरः पितरः शुन्धध्वम् । आ मे यन्तु पितरो भागधेयं निराकृता ... त्

CC-0 Pulwama Collection. Digitized by eGangotri

अस्मिन्यज्ञे सर्वकामांल्लभन्तामक्षीयमाणानुपजीवत्वे-
तान् ॥ अन्तर्दधे पर्वतैरन्तर्मह्या पृथिव्या दिवा
दिग्भिरनन्ताभिरन्तरन्यान्पितॄन्दधे ॥ अन्तर्दधे ऋ-
तुभिरहोरात्रैः ससन्धिकैरर्धमासैश्च मासैर्ऋतुभिः प-
रिवत्सरैः संवत्सरस्य क्लृप्तिभिश्चान्तरन्यान्पितॄन्दधे ॥
यास्तिष्ठन्तीतित्रिष्टुप् ॥ यास्तिष्ठन्ति या धावन्ति
या अद्रुग्धाः परिसुस्रुषीः । अद्भिर्विश्वस्य धत्री-
भिश्चान्तरन्यान्पितॄन्दधे ॥ अमृता वागमृता आपो-
ग्निर्वाचोऽमृतं तत्त्रिवृदेकधाम ताभिर्मत्प्रत्ताभिः स्व-
धया मदध्वमिहास्मभ्यं वसीयोऽस्तु देवा यन्मे माता
प्रलुलोभ यश्चचाराऽननुव्रतं तन्मे रेतः पिता वृङ्क्तां
माभूरन्योऽवपद्यताम् ॥ १ ॥ यास्तिष्ठन्ति० यन्मे पि-
तामही० पितामहो वृंक्तां ॥ २ ॥ यास्तिष्ठन्ति० यन्मे प्र-
पितामही० प्रपितामहो वृंक्तां ॥ ३ ॥ लाजाश्च० । भगवन्तः

CC-0 Pulwama Collection. Digitized by eGangotri

पाद्यं २ पित्रे० वा मात्रे० सांव०पाद्यं स्वाधा । शेषं नि-
वार्य । सव्येनाचम्य । अपसव्येन । यास्तिष्ठन्ति इतिषट् ।
यस्तिष्ठन्ति० यन्मे माता० १ यास्तिष्ठन्ति० यन्मे
माता० २ यास्तिष्ठन्ति० यन्मे पितामही० । ३ ।
यास्तिष्ठन्ति० यन्मे माता० ४ यास्तिष्ठन्ति० य-
न्मे पितामही ० ५ यास्तिष्ठन्ति० यन्मे प्रपितामही ६
आपः क्षीरं० । भगवन्तोऽर्घ्यं २ पितः पिताम-
ह प्रपितामह पितः सां० इदं वोऽर्घ्यं स्वधा ।
पवित्रं निवार्य ॥ पित्रे वा मात्रे सां० समालभनं
गन्धः स्वधा । गन्धलेपं निवार्य । सव्येनाऽचम्य ।
अपसव्येन । पवित्रपाणिः । पित्रे वा मात्रे सां०
अर्घः स्वधा पुष्पं स्वधा । पित्रे दीपः स्वधा धूपः
स्वधा पित्रे वासांसि स्वधा ॥ दक्षिणाग्रान्दर्भाना-
स्तीर्य ॥ सव्येन । शुन्धन्तां लोकाः । अपसव्येन ।

CC-0 Pulwama Collection. Digitized by eGangotri

पितरः पितामहाः परावरेभ्यस्ते माऽवन्त्वऽस्मिन्ब्रह्मण्यस्मिन्क्षत्रेऽस्यामाशिष्यऽस्यां पुरोधायामस्यां देवहूत्यां स्वाहा २१ आकूत्यै त्वा स्वाहा, कामाय त्वा स्वाहा, समृद्ध्यै त्वा स्वाहा ॥ हिरण्यगर्भ इत्यष्टाभिः ॥ हिरण्यगर्भः १ यः प्राणतो २ य ओजोदः ३ येन द्यौ ४ य इमे ५ यस्येमे ६ आपो ह यत् ७ आ नः प्रजां ८ ओंभूःस्वाहा ओंभुवः, ओंस्वः, ओंभूर्भुवःस्वः० । अग्न आयूंषि०, अग्निर्ऋषि०, अग्ने पवस्व०, ॥ ततोऽन्नतचरौ । प्रधानानि । अग्निं पुष्टिपतिं प्रजापतिं च यजेत ॥ ते० । अग्निना रयिं० प्रजापते नहि० । तृतीयचरौ । उदग्ने शुचयस्तव० । अग्ने पवस्व० । त्वं नस्तन्तु० । अग्ने नय० ॥ अष्टकाप्रधानं । ते० । ऋतूनां पत्नी०, ऋतस्य धामा०, देवा ग्रावाणो० ॥ अष्टकानुवाकौ तूष्णी-

CC-0 Pulwama Collection. Digitized by eGangotri

नामार्षम् ॥ इयमेव सा या प्रथमा व्यौच्छत्सा वा स्वन्तश्चरति प्रविष्टा । वधूर्मिमाय नवगाज्जनित्री त्रय एनां महिमानः सचन्ते १ छन्दस्वतीरुषसौ पेपिशाने समानं योनिमनु सञ्चरन्ती । सूर्यपत्नी विचरतः प्रजानती केतुमती अजरे भूरिरेतसः २ ऋतस्य पन्थामनु तिस्र आघुस्त्रयो घर्मासो अनुरेतसाऽगुः । प्रजामेका रक्षत्यूर्जमेका व्रतमेका रक्षति देवयूनाम् ३ चतुष्टोममऽदधाद्या तुरीयां यज्ञस्य पक्षा ऋषयो भवन्ती । गायत्री त्रिष्टुब्जगती विराडर्कं युञ्जाना सुराभन्निदम् ४ पञ्चभिर्धाता विदधा इदं यत्तासांस्वसॄरजनत्पञ्च पञ्च । तासामयन्ति प्रयवेन पञ्च नानारूपाणि क्रतवो वसानाः स्वाहा ५ ॥ ऋतुतिथिन० ॥ नैवेद्यम् । ते० । इळामग्ने०, अग्ने त्वं पारयेति न० । इत्यष्टकां हुत्वा । वैश्वानरोणोति,

CC-0 Pulwama Collection. Digitized by eGangotri

पावमान्यब्राह्मणेन चेत्युपस्थाय ॥ यद्देवा देवहेळनं यद्वाचा०— सौत्रामण्या निचाङ्कुणस्य तावत् इत्यञ्जलिः ॥ पुनर्वैश्वानरायेति पावमानीब्राह्मणेन च तर्पणं कृत्वा । अनेन मन्त्रहोमेण० पितुर्वा मातुः सां-व० अग्निः प्रीयतां अग्निः प्रीतोस्तु० ॥ हुतमेक्षणम् । ब्राह्मणपूजनम् । दक्षिणान्तं । अपसव्येन । अद्यतावत्० पितुः अष्टकाप्रीत्या तिलाम्भसा अष्टकादेवता प्रीयतां प्रीतास्तु सव्येन । ओंगायत्र्यैनमः ३ अच्छिद्रं पूर्ववत् ॥आश्रावितमिति पूर्णाहुतिः त्र्यायुषं० । विमुच्य ३ नयामि ॥ पुनरग्निं परिसमूह्य, पर्युक्ष्य ६ ॥ इत्यष्टकाविधिः । अथ श्राद्धविधिः श्राद्धारम्भे तथाचान्ते पाद्यगन्धे तथैवच । विकिरे पिण्डदाने च षट्सु त्वाऽचमनं स्मृतम् ॥ पृच्छासनाऽक्षये षष्ठी प्रथमा चार्घ्यपिण्डयोः । द्वितीयाऽवाहने प्रोक्ता चतुर्थी शेषकर्मणि ॥ पवित्रं [illegible]

CC-0 Pulwama Collection. Digitized by eGangotri

०००-८७१

भ्यो०, ब्रह्मणे०, ब्रह्मपुरुषेभ्यो०, ऊर्ध्वं आकाशाय०, स्थण्डिले दिवाचरेभ्यो भूतेभ्यो०, नक्तञ्चरेभ्यो भूतेभ्यो नमः। तत्त्वादिभ्यः षट्त्रिंशद्देवताभ्योऽन्नं नमः, आचमनीयं नमः। अपसव्येन। दक्षिणाग्रान्दर्भानास्तीर्य समस्तमातापितृभ्यो द्वादशदैवतेभ्यः पितृभ्यो भूपृष्टे दर्भास्तरणे तिलोदकेनाऽवनेजनंस्वधा॥ उशन्तस्त्वा हवामह उशन्तः समिधीमहि। उशन्नुशत आवह पितॄन्हविषे अत्तवे॥ तिलास्तोयं तथा क्षीरं दीपधूपौ बलिस्तथा। मधु सर्पिःसमायुक्तमष्टाङ्गमन्नसम्भवम्॥ देवताभ्यः पितृभ्यश्च महायोगिभ्य एवच। नमः स्वधा च स्वाहा च नित्यमेव भवन्त्विह॥ ३॥ अद्यतावत् पितः अमुकाऽमुकगोत्र एतत्तेऽन्नं येच त्वाऽनु। पितामह० प्रपितामह०॥ मातः एतत्तेऽन्नं याश्च त्वाऽनु। पिता-

CC-0 Pulwama Collection. Digitized by eGangotri

महि० ॥ प्रपितामहि० ॥ मातामह प्रमातामह वृद्धप्र-
मातामह । मातामहि प्रमातामहि वृद्धप्रमातामहि ।
एवमन्ये च पितरः । मातृपक्षयास्तुये केचिद्येचान्ये पितृ-
पक्षजाः । गुरुश्वशुरबन्धूनां ये कुलेषु समुद्भवाः ।
ये प्रेतभावमापन्ना ये चान्ये श्राद्धवर्जिताः । अन्न-
दानेन ते सर्वे लभन्तां तृप्तिमुत्तमाम् ॥ समस्तमा-
तापितृभ्यो द्वा० अन्नंस्वधा, अन्नलेपं निवारयेत्
समस्तमा० समालभनं गन्धः स्वधा, अर्घः स्वधा
पुष्पं स्वधा, दीपः स्वधा, धूपः स्वधा । समस्त०
भक्ष्यभोज्यफलमूलबलिनैवेद्यमाहाराद्यऽन्नं स्वधा ।
समस्त० तिलमधुमिश्रमुदकपात्रमाचमनीयं जलं स्व-
धा । सम० हिमपानं स्वधा । क्षीरपानं स्वधा म-
धुपानं स्वधा तिलोदकं स्वधा उदकतर्पणं स्वधा
हिमंहिमं रजतं रजतम् ॥ सव्येन ॥ वसन्ताय नमः

CC-0 Pulwama Collection. Digitized by eGangotri

ग्रीष्माय नमः वर्षाभ्यो नमः शरदे नमः हेमन्ताय नमः शिशिरायनमः षड्ऋतुभ्यो नमः ॥ अग्नये स्विष्टकृते स्वाहा । हस्तौ प्रक्षाल्य । प्राणायामं । विमुञ्चामि ३ नयामि ॥ भगवन्नूयद्दम एतत्तेऽन्नं नमः । भग० एतत्ते आचमनीयं नमः ॥ कण्ठोपवीती ॥ हन्तमनुष्येभ्यः सनकादिभ्य ऋषिभ्योऽन्नं नमः सनका० आचमनीयं नमः सव्येन ॥ अथाऽष्टकाविधिः । पुनरग्निं परिसमूह्य ६ आदौ पञ्च० । अपूपचरौ ॥ अग्नये वायवे सूर्याय ब्रह्मणे प्रजापतये कूष्मार्षिभ्यः जुष्टं निर्वपामि । अक्षतचरौ ॥ अग्नये पुष्टिपतये प्रजापतये ॥ अपूपचरौ ॥ अग्नये शुचये अग्नये पवमानाय अग्नये तन्तुमते अग्नये पथिकृते ॥ अपूपचरौ ॥ अग्नये अष्टकादेवतायै जुष्टं निर्वपामि ॥ एवं प्रोक्षामि आज्यभागान्तं हुत्वा ॥ कूष्माण्डं तद्ब्राह्मणं

CC-0 Pulwama Collection. Digitized by eGangotri

च हुत्वा ॥ प्रधानानि । तेजोसि । अ० वा० सू० ब्र० प्र
कू० । स्रुवेणाज्यहोमः । अग्नय जनिविदे स्वाहा
सोमाय ज०, गन्धर्वाय ज०, आयुषः प्राणमित्येका०
ते० । आकूतामति त्रयो आकूतं चाऽकूतिश्चाऽऽधीतं च
धीतिश्च विज्ञातं च विज्ञातिश्च चित्तं च चित्तिश्च नाम च
क्रतुश्च दार्शश्च पौर्णमासश्च प्रजापतिर्जयानिद्राय-वृष्णे
प्रायच्छदुग्रः पृतनाज्येषु । तेभिर्वाजं वाजयन्तो ज-
येम तेनेमा विश्वाः पृतना अभिष्याम स्वाहा ॥ ते० ।
बृहस्पतिपुरोहिता इत्यभ्यातानां देवानाम् ॥ बृहस्पतिपु-
रोहिता देवा देवानां देवा देवाः प्रथमजा देवा देवेषु
पराक्रमध्वम् । प्रथमा द्वितीयेषु द्वितीयास्तृतीयेषु त्रि-
रेकादशास्त्रयस्त्रिंशा अनु व आरभे इदं शकेयं य-
दिदं करोमि तेमावत तेमाजिन्वताऽस्मिन्ब्रह्मण्य-
स्मिन्क्षेत्रेऽस्यामाशिष्यस्यां पुरोधायामस्यां देवहूत्यां

CC-0 Pulwama Collection. Digitized by eGangotri

स्वाहा ॥ स्रुवेणाज्यहोमः । ऋताषाडिति त्रयोदशाहुती-
र्हुत्वा ॥ अग्निर्भूतानामित्येकविंशमाधिपत्याति जुहोति ।
अग्निर्भूतानामधिपतिः स माऽवतु तस्मै स्वाहा १ यमः
पृथिव्याम० २ वायुरन्तरिक्षस्याधि० ३ सूर्यो दि-
वोऽधि० ४ चन्द्रमा नक्षत्राणाम० ५ विष्णुर्दिशा-
नाम० ६ पूषा पथीनाम० ७ त्वष्टा रूपाणाम० ८
सविता प्रसवानाम० ९ इन्द्रो ज्येष्ठाणाम० १०
मित्रः सत्यानाम० ११ वरुणो धर्माणाम० १२
रुद्रः पशूनाम० १३ बृहस्पतिर्ब्रह्मणाम० १४ ब्रा-
ह्मणो वाचाम० १५ सोम ओषधीनाम० १६ स-
मुद्रः स्रवन्तीनाम० १७ अन्नं सम्राज्यानामधिपति
तन्माऽवतु तस्मै स्वाहा १८ गायत्री च्छन्दसाम-
धिपत्नी सा माऽवतु तस्यै स्वाहा १९ मरुतो
गणानामधिपतयस्ते माऽवन्तु तेभ्यः स्वाहा २०

CC-0 Pulwama Collection. Digitized by eGangotri

त्सरिके श्राद्धे तेषां "वा" तासां परलोके वैकुण्ठपदवी-प्राप्त्यर्थं कलशप्रीत्या तिलाम्भसा पुण्यवृद्धिरस्तु स्वर्गप्राप्तिरस्तु इदं तृप्तयेऽस्तु कलशदेवताः प्रियन्तां प्रीताः सन्तु ॥ सव्येन ॥ क्षेत्रेश्वराः प्रियन्तां प्रीताः सन्तु ॥ एता देवताः सदक्षिणान्नेन प्रियन्तां प्रीताः सन्तु ॥ तद्विष्णोः० इति कलशे पुष्पद्वयम् ॥ अथ व्याहृतिपूर्वकं वैश्वदेवं नित्यकर्म ॥ शालिचूर्णेनाऽग्निकुण्डमुल्लिख्य ॥ पात्रं तिलाक्षतैर्मिश्रं० ॥ संव्वः सृजामीति द्वाभ्यां पुष्पाणां त्रितयं क्षिपेत् ॥ निर्दग्धं रक्षो० ॥ प्राणायामं कुर्यात् ॥ ऋतन्त्वा सत्येनाग्निं परिसमूहामि ॥ ६ ॥ यज्ञस्य० ॥ पुरस्तात्० ॥ ४ ॥ इदं हविः प्रजननं मेऽस्तु दशवीरं० ॥ यथावकाशं गायत्रीब्राह्मणहोमः ॥ संक्षेपतो यथा ॥ मुक्ताविद्रुमहेम० ॥ आयातु वरदा० ३ ॥ महाव्याहृतयः प्रजापतेः । ओंअग्नये स्वाहा ओंभूः स्वाहा

CC-0 Pulwama Collection. Digitized by eGangotri

ॐभुवः स्वाहा ॐस्वः स्वाहा ॐभूर्भुवःस्वः स्वाहा ॥ ॐभूः स्वाहा ॐभुवः स्वाहा ॐस्वः स्वाहा ॐमहः स्वाहा ॐजनः स्वाहा ॐतपः स्वाहा ॐसत्यं स्वाहा ॥ ओंतत्सवितुर्व० ३ ॥ अश्वमंधे घोराणामार्षम् ॥ द्रष्ट्रे नम० ॥ यो विश्वचक्षु० ॥ आ ब्रह्मन् ब्रह्मणो० ॥ चतुर्भुजामर्कसहस्र० ॥ देवाश्च वा असुराश्च संय्यत्ता आसंस्तान्गायत्र्यन्तरातिष्ठदोजो वै वीर्यमाद्यं परिगृह्य संवत्सरो वा वैनान्सोऽन्तरातिष्ठच्चतुर्विंशति गायत्र्या अक्षराणि चतुर्विंशति संवत्सरस्यार्धमासास्ते विदुर्यतरान्वा इयमुपवर्त्स्यति त इदं भविष्यति तं व्याह्वयन्तदाभीत्यसुरा आह्वयन्विश्वकर्मन्निति देवास्मान् यतरांश्च नोपवर्तत ते देवा एतद्यजुरपश्यन्नोजोसि सहोसि बलमासि भ्राजोसि देवानान्धाम नामासि विश्वमसि विश्वायुः सर्वमसि सर्वायुरभिभूरिति

CC-0 Pulwama Collection. Digitized by eGangotri

स देवानुपावर्तत, ततो देवा अभवन् पराऽसुरा अभवन्नाग्नेय्यमष्टाकपालं निर्वपेद्भ्रातृव्यवान् वा स्पर्धमानो वा तमासाध्यैतैर्ऋजुरभिमृशेदोजो वै वीर्यं संवत्सर ओज एव वीर्यं भ्रातृव्यस्य वृंक्ते स निर्वीर्यः पराभवति सैषा गायत्री नामेष्टिरथो आहुः क्षेत्रस्य संवर्ग इति महागायत्र्यैस्वाहा, सावित्र्यैस्वाहा, सरस्वत्यैस्वाहा अनेन मन्त्रहोमेन आत्म० पितुः० वा मातुः० सांवत्सरिके श्राद्धे तेषां वा तासां परलोके० महागायत्री सावित्री सरस्वती सव्याहृतिः प्रियतां प्रीतास्तु ॥ अध्वर्योायं० ॥ ध्येयः सदा० ॥ सहस्रशीर्षा० हिरण्यवर्णां हरिणीं० । तद्विष्णोः प० विष्णुपञ्चायतनदेवताभ्यः० वटुकादिभ्यः स्वाहा ॥ यौ ते श्वानौ० । ऐन्द्राग्नं ० । अनेन मंत्रहोमेन० महागणपतिः कुमारः श्रीः सरस्वती लक्ष्मीः विश्वकर्मा द्वार्देवताः प्रजापतिः

CC-0 Pulwama Collection. Digitized by eGangotri

ब्रह्मा कलशदेवताः ब्रह्मविष्णुमहेश्वरदेवताः चातुर्वेदे-
श्वरः सानुचरः ऋतुपतिर्नारायणः दुर्गा त्र्यम्बकः
वरुणः यज्ञपुरुषः अग्निष्वात्तादयः पितृगणदेवताः वा-
सुदेवः० भवोदेवः० विनायकः० हांह्रींसः सूर्यः० भगवती
अमा ० विष्णुपञ्चायतनदेवताः अभयङ्करीदेवी क्षेम-
ङ्करीभवानी सर्वशत्रुघातिनी इह राष्ट्राधिपतिः अमु-
कभैरवः महागायत्री सावित्री सरस्वती हेरकादयो
वटुकादयो यवतिलतण्डुलहोमेन प्रियन्तां प्रीताः स-
न्तु ॥ अथ वैश्वदेवम् ॥ वैश्वदेवस्य सिद्धस्य सर्व-
तोग्रचस्याऽन्नस्य जुहोतिपाकस्य घृतेन संलिप्य स्व-
स्त्यस्तु श्रृतमभिघार्य ॥ अग्नये स्वाहे त्युत्तरतः सो-
माय स्वाहेति दक्षिणतः। तयोर्मध्ये । मित्रय स्वाहा,
वरुणाय, इन्द्राय, इन्द्राग्निभ्यां, विश्वेभ्योदेवेभ्यः,
प्रजापतये, अनुमत्यै, धान्वन्तरये, वास्तोष्पतये,

CC-0 Pulwama Collection. Digitized by eGangotri

वासुदेवाय, सङ्कर्षणाय, प्रद्युम्नाय, अनिरुद्धाय, सत्यपुरुषाय, अच्युताय, माधवाय, गोविन्दाय, सहस्रनाम्ने विष्णवे, लक्ष्मीसहिताय नारायणाय स्वाहा ॥ अमृतेशमुद्रया० नित्यकर्मयागदेवताभ्यो नमो नैवेद्यं निवेदयामि नमः ॥ पूर्वाग्रान्दर्भानास्तीर्य ॥ तत्त्वाय नमः, उपतत्त्वाय, अम्बानामासि नमस्ते, दुलानामा०, नितत्नीनामा०, चुपनीकाना०, अभ्रयन्तीना०, मेघयन्तीना०, वर्षयन्तीना०, नन्दिनि नमस्ते, सुभगे न०, समङ्गले न०, भद्रङ्करि० श्रियैहिरण्यकेश्यै नमः, वनस्पतिभ्यो०, धर्माय०, अधर्माय०, मृत्यवे०, मरुद्भ्यो०, वरुणाय०, विष्णवे०, वैश्रवणायराज्ञे०, भूतेभ्यो० इन्द्राय०, इन्द्रपुरुषेभ्यो०, यमाय०, यमपुरुषेभ्यो सोमाय०, सोमपुरुषेभ्यो०, वरुणाय०, वरुणपुरुष-

CC-0 Pulwama Collection. Digitized by eGangotri

द्ब्रह्माऽद्य० । पित्रे वा मात्रे सांवत्सरिके श्राद्धे दीपःस्वधा० ॥ सव्येन ॥ गायत्र्यै नमः । ॐभूर्भुवःस्वः० ३ ॥ तत्सद्ब्रह्माद्यतावत्० । महागणपतेः कुमारस्य श्रियः सरस्वत्याः लक्ष्म्याः विश्वकर्मणः द्वार्देवतानां प्रजापतेः ब्रह्मणः कलशदेवतानां ब्रह्मविष्णुमहेश्वरदेवतानां चातुर्वेदेश्वरस्य सानुचरस्य ऋतुपतेर्नारायणस्य दुर्गायाः त्र्यम्बकस्य वरुणस्य यज्ञपुरुषस्य अग्निष्वात्तादीनां पितृगणदेवतानां अग्नेः वायोः सूर्यस्य ब्रह्मणः प्रजापतेः कूष्मर्षीणां अग्नेः पुष्टिपतेः प्रजापतेः अग्नेः शुचेः अग्नेः पवमानस्य अग्नेः तन्तुमतः अग्नेः पथिकृतः अग्नेः अष्टकादेवतायाः ॥ वासुदेवस्य० भवस्यदेवस्य० विनायकस्य० ह्रांह्रींसःसूर्यस्य० भगवत्याः अमायाः० विष्णुपञ्चायतनदेवतानां । अमयङ्गीदेव्याः० महा-

CC-0 Pulwama Collection. Digitized by eGangotri

गायत्र्याः० हेरुकादीनां० आत्मनो० पितुः पितामहस्य प्रपितामहस्य, पितुः । वा मातुः पितामह्याः, प्रपितामह्याः, मातुः, सांवत्सारके श्राद्धे तेषां वा तासां परलोके विष्णुसायुज्यार्थं, आत्मनश्चतुर्वर्गप्राप्त्यर्थं कलशपूजनं क्षेत्रेश्वरपूजनमर्चामहं करिष्ये ओं कुरुष्व ॥ तिलसर्षपयवान् विकीर्य ॥ महागणपतेः, इत्यादीनामिदमासनं नमः०॥ महागणपतये कुमाराय श्रियै सरस्वत्यै लक्ष्म्यै विश्वकर्मणे द्वार्देवताभ्यः प्रजापतये ब्रह्मणे कलशदेवताभ्यः ब्रह्मविष्णुमहेश्वरदेवताभ्यः चातुर्वेदेश्वराय सानुचराय ऋतुपतये नारायणाय दुर्गायै त्र्यम्बकाय वरुणाय यज्ञपुरुषाय अग्निष्वात्तादिभ्यः पितृगणदेवताभ्यः । अग्नये वायवे सूर्याय ब्रह्मणे प्रजापतये कुमारादिभ्यः

CC-0. Pulwama Collection. Digitized by eGangotri

अग्नये पुष्टिपतये प्रजापतये अग्नये शुचये अग्नये पवमानाय अग्नये तन्तुमते अग्नये पथिकृते अग्नये अष्टकादेवतायै वासुदेवाय० ८ भवायदेवाय० ८ विनायकाय० ८ ह्रांह्रींसः सूर्याय० ८ भगवत्यै अमायैः० ८ विष्णुपञ्चायतनदेवताभ्यः । अभयङ्करीदेव्यै क्षेमङ्करीभवान्यै सर्वशत्रुघातिन्यै इहराष्ट्राधिपतये अमुकभैरवाय महागायत्र्यै सावित्र्यै सरस्वत्यै हेरका० युष्मान् वः पूजयामि ॐ पूजय ॥ महागणपतिं कुमारं श्रियं सरस्वतीं लक्ष्मीं विश्वकर्माणं द्वार्देवताः प्रजापतिं ब्रह्माणं कलशदेवताः ब्रह्मविष्णुमहेश्वरदेवताः चातुर्वेदेश्वरं सानुचरं ऋतुपतिं नारायणं दुर्गां त्र्यम्बकं वरुणं यज्ञपुरुषं अग्निश्वात्तादीः पितृगणदेवताः अग्निं वायुं सूर्यं ब्रह्माणं प्रजापतिं चन्द्रमसं अग्निं पुष्टि-

CC-0 Pulwama Collection. Digitized by eGangotri

पतिं प्रजापतिं अग्निं शुचिं अग्निं पवमानं अग्निं तन्तुमतं अग्निं पथिकृतं अग्निं अष्टकादेवतां वासुदेवं० ८ भवंदेवं० ८ विनायकं० ८ हांहींसःसूर्यं० ८ भगवतीं अमां० ८ विष्णुपञ्चायतनदेवताः आवाहयिष्यामि ओं आवाहय ॥ यवान्विकीर्य ॥ पाद्यार्थमुदकं नमः ॥ शन्नोदेवीरभीष्टय आपो भवन्तु पीतये । शं य्योरभि स्रवन्तु नः ॥ लाजाश्च कुंकुमं चैव सर्वौषधिसमन्वितम् । दर्भाङ्कुरं जलं चेति पञ्चाङ्गं पाद्यलक्षणम् ॥ भगवन्तः पाद्यम् पाद्यम् ॥ महागणपतये०—इत्यादिभ्यः पाद्यंनमः । पाद्यशेषं निवारयेत् ॥ पुनः । शन्नो देवी० ॥ आपः क्षीरं कुशाग्राणि घृतं च दधि तण्डुलाः । यवाः सिद्धार्थकाश्चेति ह्यर्घ्यमष्टाङ्गमुच्यते ॥ भगवन्तः अर्घमर्घ्यम् ॥ महागण-

CC-0 Pulwama Collection. Digitized by eGangotri

पते कुमार श्रीः सरस्वति लक्ष्मीः विश्वकर्मन् द्वा-
र्देवताः प्रजापते ब्रह्मन् कलशदेवताः ब्रह्मविष्णु-
महेश्वरदेवताः चातुर्वेदेश्वर सानुचर ऋतुपते नारा-
यण दुर्गे त्र्यम्बक वरुण यज्ञपुरुष अग्निष्वात्तादयः
पितृगणदेवताः अग्ने वायो सूर्य ब्रह्मन् प्रजापते
कूष्मर्षयः अग्ने पुष्टिपते प्रजापते अग्ने शुचे अग्ने
पवमान अग्ने तन्तुमत् अग्ने पथिकृत् अग्ने अष्टका-
देवते । वासुदेव० ८ भवदेव० ८ विनायक० ८ हां-
हीसः सूर्य० ८ भगवति अम्बे० ८ विष्णुपञ्चायतनदे-
वताः अभयङ्करीदेवि क्षेमङ्करीभवानि सर्वशत्रुघाति-
नि इह राष्ट्राधिपते अमुकभैरव महागायत्रि सावि-
त्रि सरस्वति हेरुकादयो वटुकादयः इदं वोऽर्घ्यं
नमः ॥ महागणपतये० इत्यादिभ्यः समालभनं
CC-0 Pulwama Collection. Digitized by eGangotri

गन्धो नमः ॥ गन्धलेपं निवारयेत् ॥ महागणपतये० इत्यादिभ्यः अर्घो नमः पुष्पं नमः । महागणपतये० दीपधूपसंकल्पात्तिसिद्धिरस्तु दीपो नमः धूपो नमः ॥ महागणपतये० वासो नमः ॥ एतासां देवतानामर्घ्यदानाद्यर्चनविधिः सर्वः परिपूर्णोऽस्तु ॥ अन्नं नमः २ आज्यं २ अद्यदिने अद्य यथासंकल्पात्तिसिद्धिरस्तु अन्नहीनं क्रियाहीनं विधिहीनं द्रव्यहीनं मन्त्रहीनं च यद्गतं तत्सर्वमच्छिद्रं सम्पूर्णमस्तु एवमस्तु ॥ शन्नोदेवी० ॥ महागणपतये० अपोशानं नमः आचमनीयं नमः ॥ पुनः, शन्नोदेवी० ॥ महागणपतये० दक्षिणायै तिलहिरण्यरजतनिष्कर्णं ददानि ॥ अपसव्येन ॥ ॐ तत्सद्ब्रह्म अद्यतावत्० पितुः पितामहस्य प्रपितामहस्य पितुः "वा" मातुः पितामह्याः प्रपितामह्याः मातुः सांव-

CC-0. Pulwama Collection. Digitized by eGangotri

एकाष्टके सुप्रजसः सुवीरा ज्योग्जीवेम बलिहृतो वयं ते नमः ॥ ४ ॥ तद्विष्णोः परमं पदं सदा पश्यंति सूरयः । दिवीव चक्षुराततम् ॥ तद्विप्रासो विपण्यवो जागृवांसः समिन्धते । विष्णोर्यत्परमं पदम् नमः ॥ वासुदेवाय नमः० ८, लक्ष्मीसहिताय नारायणाय नमः ॥ यो रुद्रो अग्नौ यो अप्सु य ओषधीषु यो वनस्पतिषु । यो रुद्रो विश्वा भुवना विवेश तस्मै रुद्राय नमो अस्तु देवाः नमः ॥ भवायदेवाय नमः० ८, पार्वतीसहिताय परमेश्वराय नमः ॥ गणानान्त्वा गणपतिं हवामहे कविंकवीनामुपमश्रवस्तमम् । ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आनः शृण्वन्नूतिभिः सीद सादनं नमः ॥ विनायकाय नमः० ८, वल्लभासहिताय श्रीमहागणेशाय नमः ॥

CC-0. Pulwama Collection. Digitized by eGangotri

चित्रन्देवानामुदगादऽनीकं चक्षुर्मित्रस्य वरुणस्या-
ग्नेः । आ प्रा द्यावापृथिवी अन्तरिक्षं सूर्य आत्मा
जगतस्तस्थुषश्च नमः ॥ ह्रांह्रींसःसूर्याय नमः० ८,
प्रभासहिताय आदित्याय नमः ॥ जातवेदसे सुन-
वाम सोममरती यतो निदहाति वेदः । स नस्पर्श-
दऽतिदुर्गाणि विश्वा नावेव सिन्धुं दुरितात्याग्निर्नमः ॥
भगवत्यै अमायै नमः० ८, सहस्रनाम्नै देव्यै भवान्यै
नमः ॥ विष्णुपञ्चायतनदेवताभ्योनमः, यत इन्द्र भ-
यामहे ततो नो अभयंकृधि । मघवञ्छग्धि तव तन्न
ऊतिभिर्विद्विषो विमृधो जहि नमः ॥ अभयङ्करीदेव्यै
नमः,क्षेमङ्करीभवान्यै नमः सर्वशत्रुघातिन्यै नमः इह
राष्ट्राधिपतये अमुकभैरवाय नमः, महागायत्र्यै नमः
सावित्र्यै नमः सरस्वत्यै नमः ॥ क्षेत्रस्य पतिना

CC-0 Pulwama Collection. Digitized by eGangotri

वयं हितेनेव जयामसि । गामश्वं पोषयित्वा स नो मृळातीदृशे नमः, हेरकादिभ्यो नमः । वटुकादिभ्यो नमः ॥ यौ ते श्वानौ० । अमृतेशमुद्रया० हिरण्यगर्भः० । ८ । अर्चन्तस्त्वा० ॥ यजमानमानीय ॥ अस्य श्री आसनशोधनमन्त्रस्य० ॥ शुक्लाम्बरधरं० । अनाभौ० । अपसर्पंतु० ॥ तीर्थे स्नेयं तीर्थमेव समानानां भवति मानः शंस्योररुषो धूर्त्तिः प्राणङ् मर्त्यस्य रक्षाणो ब्रह्मणस्पते ॥ वसोः पवित्रमसि शतधारं वसूनां पवित्रमसि सहस्रधारमयक्ष्मा वः प्रजया संसृजामि रायस्पोषेण बहुला भवन्तीः ॥ परमात्मने पुरुषोत्तमाय पञ्चभूतात्मकाय विश्वात्मने मन्त्रनाथाय आत्मने नारायणाय आधारशक्त्यै समालभन्नं गन्धो नमः अर्घो नमः पुष्पं नमः ॥ स्व-

CC-0 Pulwama Collection. Digitized by eGangotri

प्रकाशो महादीपः सर्वतस्तिमिरापहः । प्रसीद मम गोविन्द दीपोयं परिकल्पितः ॥ वनस्पतिरसो दिव्यो गन्धाढ्यो गन्धवत्तमः । आधारः सर्वदेवानां धूपोयं परिकल्पितः ॥ नमो धर्मनिधानाय नमः स्वकृत साक्षिणे । नमः प्रत्यक्षदेवाय भास्कराय नमो नमः ॥ यत्रास्ति माता न पिता न बन्धुर्भ्रातापि नो यत्र सुहृज्जनश्च । न ज्ञायते यत्र दिनं न रात्रिस्तत्रात्मदीपं शरणं प्रपद्ये । आत्मने नारायणाय आधारशक्त्यै दीपधूपसंकल्पात्सिद्धिरस्तु दीपोनमः धूपोनमः ॥ ॐ तत्सद्ब्रह्म० महागणपतये कुमाराय श्रियै सरस्वत्यै लक्ष्म्यै विश्वकर्मणे द्वार्देवताभ्यः । प्रजापतये ब्रह्मणे कलशदेवताभ्यः ब्रह्माविष्णुमहेश्वरदेवताभ्यः चातुर्वेदेश्वराय सानुचराय क्षेत्रपतयेनारायणाय । दुर्गायै त्र्यम्बकाय

CC-0 Pulwama Collection. Digitized by eGangotri

वरुणाय यज्ञपुरुषाय अग्निष्वात्तादिभ्यः पितृगणाया-
गदेवताभ्यः अग्नये वायवे सूर्याय ब्रह्मणे प्रजापतये कू-
ष्मर्षिभ्यः अग्नये पुष्टिपतये प्रजापतये । अग्नये शुचये
अग्नये पवमानाय अग्नये तन्तुमते अग्नये पथिकृते अ-
ग्नये अष्टकादेवतायै ॥ भगवते वासुदेवाय० ८ भवाय-
देवाय० ८ विनायकाय० ८ ह्रांह्रींसःसूर्याय०८ अमा-
यै० ८ विष्णुपञ्चायतनदेवताभ्यः ॥ अभयंकरीदेव्यै०
हेरकादिभ्यः० दीपधूपसङ्कल्पात्तिसिद्धिरस्तु० ॥ अपस-
व्येन ॥ नमः पितृभ्यः प्रेतेभ्यो नमो धर्माय विष्णवे ।
नमो यमाय रुद्राय कान्तारपतये नमः ३ ॥ देवताभ्यः
पितृभ्यश्च महायोगिभ्य एवच । नमः स्वधा च स्वाहा
च नित्यमेव भवन्त्विह ॥ तत्सद्ब्रह्माऽद्य तावत् पित्रे०
समस्तमातामहादिभ्यो दीपःस्वधा नमः स्वधा ॥ तत्स-

CC-0 Pulwama Collection. Digitized by eGangotri

विष्णुबलेअंगेश्राद्धविषये



CC-0 Pulwama Collection. Digitized by eGangotri

कम
एका
ते न
श्यंति

ॐ

श्रीगणेशाय नमः ।

अथ सांवत्सरिकश्राद्धविधिः ॥ आदौ शालिचूर्णेन ब्रह्मकलशमुल्लिख्य ॥ अभिनो देवी०—वषट् ते विष्णा०—तावत् ॥ प्रदानानि ॥ अग्नये नमः, वायवे नमः, सूर्याय नमः, ब्रह्मणे नमः, प्रजापतये नमः, कूर्ष्मार्षिभ्यः नमः ॥ १ ॥ अग्निना रयिमश्नवत्पोषमिव दिवेदिवे । यशसं वीरवत्तमं नमः ॥ प्रजापते नहि त्वदन्य एता विश्वा जातानि परिता बभूव । यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणाम् नमः ॥ २ ॥ उदग्ने शुचयस्तव शुक्र भ्राजन्त ईरते । तव ज्योतींष्यर्चय नमः ॥

CC-0 Purwama Collection. Digitized by eGangotri

अग्ने पवस्व स्वपा अस्मे वर्चः सुवीर्यम् । दध
मयि पोषम् नमः ॥ त्वं नस्तन्तुरुत सेतुरग्ने
पन्था भवासि देवयानैः । त्वयाग्ने पृष्टं वय
माऽथा देवैः सदमादं मदेम नमः ॥ अग्ने नय सु
पथा राये अस्मान्विश्वानि देव वयुनानि विद्वान् ।
युयोध्यस्मज्जुहुराणमेनो भूयिष्ठान्ते नम उक्तिं वि-
धेम नमः ॥ ३ ॥ अष्टकाप्रधानम् ॥ ऋतूनां पत्नी
प्रथमेयमगादह्नां नेत्री जनित्री प्रजानाम् । एका
सती बहुधोषो व्युच्छा जीर्णा त्वं जरय सर्वम-
न्यत् नमः ॥ ऋतस्य धामा प्रथमा व्युषस्यऽपा-
मेका महिमानं बिभर्ति । सूर्यस्यैका चरति निष्कृ-
तानि घर्मस्यैका सवितैका नियच्छति नमः ॥ देवा
ग्रावाणो घोषमकृत हविष्कृण्वन्तः परिवत्सरीयम्

CC-0 Pulwama Collection. Digitized by eGangotri

मासिकविषये



CC-0 Pulwama Collection. Digitized by eGangotri

ॐ ऊनषाण्मासिक विषये



CC-0 Pulwama Collection. Digitized by eGangotri

प्रेतदीपदानविषये



CC-0 Pulwama Collection. Digitized by eGangotri

वार्षिकश्राद्धपिण्डविषये



CC-0 Pulwama Collection. Digitized by eGangotri

कन्यासंस्कार विषये

कम

एका ... याप्यम्

ते न

श्यां





अग्निकुण्डम्



निसरण (भावयावोजूस मंज)
स्नानार्थं पीठरेखेयम्

CC-0 Pulwama Collection. Digitized by eGangotri

पञ्चगव्यम्

गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् । निर्दिष्टं पञ्चगव्यंच पवित्रं कायशोधनम् । गोमूत्रे गोमये क्षिप्य तं संक्षेप घृते तथा । तानि दध्नि प्रक्षिप्यानि तत्सर्वं पयसोन्तरे । एकीकृत्य तु तत्सर्वं कुशोदकविमध्यगाम् ।

देवस्यत्वा कुशोदकम् ६	दधिक्राव्णोति वै दधि ✿ ४	देवस्यत्वा
गायत्रेण समादाय गोमूत्र ✿ त्रं १	आप्यायस्वेति च क्षीरं ✿ २	तेजोसीति घृत प्रोक्षो ✿ ३
आपोहिष्ठेति	गन्धद्वारेति गोमयं ✿ २	देवस्यत्वा

CC-0 Pulwama Collection. Digitized by eGangotri

अन्त्येष्टिविधये



CC-0 Pulwama Collection. Digitized by eGangotri

श्मशानविषये



CC-0 Pulwama Collection. Digitized by eGangotri

एकादशाह्निक एकोद्दिष्टविषये



CC-0 Pulwama Collection. Digitized by eGangotri

द्वादशाह्निकसापिण्ड्यविषये





CC-0 Pulwama Collection. Digitized by eGangotri

सामान्यहोम कपालहोमविषये



CC-0 Purwama Collection. Digitized by eGangotri

सामान्यतो व्रतोद्यापनविषये



CC-0 Pulwama Collection. Digitized by eGangotri

श्लाश्लेषगण्डान्तादिशान्तिविषये



CC-0 Pulwama Collection. Digitized by eGangotri



CC-0 Pulwama Collection. Digitized by eGangotri

पश्चिमतोरणम् वेश्मप्रतिष्ठा: उत्तरतोरणम्



CC-0 Pulwama Collection. Digitized by eGangotri

पक्षपहारयुत रुद्रशान्त्यादि होमविधये



CC-0 Pulwama Collection. Digitized by eGangotri

होमं विना तुलादानविषये





होमयुततुलापुरुषविषये

CC-0 Pulwama Collection. Digitized by eGangotri

चातुर्मासोद्यापनविषये



विष्णुप्रतिमा।

अग्निकुण्डम्



कार्तिकोद्यापनार्थे विष्णुप्रतिमास्थाने स्थाप्यमिदम्।

CC-0 Pulwama Collection. Digitized by eGangotri

…णभागार्थंवास्तुयागार्घम् वेश्मप्रतिष्ठादिषये



CC-0 Pulwama Collection. Digitized by eGangotri

उपनयनविषये



CC-0 Pulwama Collection. Digitized by eGangotri

विवाहविषये

इन्द्रकलशम्



स्वस्तिरेखा



होरेशाद्वयम्

अग्निकुण्डम्



CC-0 Pulwama Collection. Digitized by eGangotri

त्रैवर्णिकानां पितृक्रियोपयोगिनी

पं० केशवभट्टज्योतिर्विदा

संस्कृता- शोधिता च

इयम्

कर्मकाण्डी नं २

सप्तर्षिसंवत्सरे ५००९ वैक्रमे १९९०

ईस्वीये १९३३ परोपकाराय

प्रकाश्यं नीता

मूल्यम् ॥)

पत्ता
१ पं० केशवभट्टज्योतिषी पाठशाला टीचर रैणावारी
भाग काश्मीर श्रीनगर
२ { राधाकृष्ण ठुक्ला
३ { रघुनाथ ज्यलाली } बुकसेलर भानुमहल्ला

CC-0 Pulwama Collection. Digitized by eGangotri

नं	विषय	पृष्ठ
१	कलशस्थापनोद्धार	१-२४
२	साष्टकश्राद्ध	१
३	एकोद्दिष्टश्राद्ध	५३
४	एतदन्वष्टका	७७
५	सपिण्डी	८४
६	एतदन्वष्टका	११२
७	पितृ (रुचि) स्तवः	११६
८	श्राद्धब्राह्मण	१३६
९	श्लोकतर्पणम्	१४३
१०	गोप्रदान	१६६
११	छत्रदान	१६०
१२	नौकादान	२०३
१३	दीपदान	२०८
१४	गायत्रीब्रा०	२३२
१५	कूष्माण्डार्ष	२४४
१६	कूष्माण्डमंत्र	२४८
१७	कूष्माण्डब्राह्म	२६२
१८	पावमान्यब्रा	२६४
१९	पावमानीब्रा	२६७
२०	अग्निसाधन	२७१
२१	शय्यादान	२७
२२	दानप्रतिष्ठा	२६४

CC-0 Pulwama Collection. Digitized by eGangotri

शंकुप्रतिष्ठायां पूजामंडपे पूजावेश्चदेवादि पद्मे



CC-0 Pulwama Collection. Digitized by eGangotri

वामभागोयं वेधमप्रतिष्ठाविषये



CC-0 Pulwama Collection. Digitized by eGangotri